
## ॥ केनोपनिषद्भाष्यम् ॥

## 1456. KENOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 6537. Page 30. Right column. Substance—Paper. Size—$13\frac{3}{8} \times 5\frac{3}{8}$ inches. Sheets—32. Lines—8 to a Page. Script—Devanāgarī. No. of Grantha —400. Author—Śaṅkarācārya. Complete.

**Beginning:**

॥ श्रीगणेशाय नमः ॥

'केनेषित'मित्याद्युपनिषत्परब्रह्मविषया वक्तव्येति नव-मस्याध्यायस्यारम्भः । प्रागेतस्मात्कर्माण्यशेषतः परिसमा-पितानि । समस्तकर्माश्रयभूतस्य च प्राणस्योपासनान्यु-क्तानि । कर्माङ्गसामविषयाणि च ॥

* * *

'आचार्यवान्पुरुषो वेदाचार्याद्धैव विद्या विदिता साधि-ष्ठं प्रापदिति', 'तद्विद्धि प्रणिपातेने'त्यादि श्रुतिस्मृतिनि-यमाच्च कश्चिद्गुरुं ब्रह्मनिष्ठं विधिवदुपेत्य प्रत्यगात्मविषया-दन्यत्र शरणमपश्यन्नभयं नित्यं शिवमतु(च)लमिच्छन् पप्रच्छेति कल्प्यते । केनेषितमित्यादि ॥

End

'अमृतत्वं हि विन्दते' इत्युक्तमपि ब्रह्मविद्याफलमन्ते निगम्यते (मयति)। अपहत्य पाप्मानमविद्याकामकर्मलक्षणं संसारबीजं विधूयानन्तेऽपर्यन्ते स्वर्गे लोके सुखात्मके ब्रह्मणीत्येतत्। अनन्ते अपर्यन्ते स्वर्गे लोके सुखात्मके ब्रह्मणीत्येतत्। अनन्ते इति विशेषणान्न त्रिविष्टपेऽनन्तशब्द औपचारिकोऽपि स्यादित्यत आह— ज्येय इति। ज्येये ज्यायसि सर्वमहत्तरे स्वे आत्मनि मुख्ये एव प्रतितिष्ठति। न पुनः संसारमापद्यत इति अभिप्रायः॥

Colophon :

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीमच्छङ्करभगवतः कृतौ केनोपनिषद्भाष्यं समाप्तम्॥

Subject : Kenopaniṣadbhāṣya—Padabhāṣya, according to the Advaita school of Philosophy.

Remarks :—The Ms. is in excellent condition. Floral designs decorate the front and back pages. The paper is of English manufacture.

---

## ॥ केनोपनिषद्भाष्यम् ॥

## 1457. KENOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 9752 b. Page 30. Right column. Substance—Palm leaf. Size—18¾ × 1½ inches. Leaves—25 (15-39 out of 255). Lines—5 to a Page. Script—Grantha. No. of Granthas—400. Author—Śaṅkarācārya. Complete.

Beginning, end and subject—Same as No. 1456.

Colophon :

इति श्रीगोविन्दभगवत्पूज्यपादशिष्य परमहंसपरिव्राजकाचार्य श्रीमच्छङ्करभगवतः कृतौ तलवकारोपनिष-

तक्षुद्रविवरणे न(व)मोऽध्यायः ॥

श्रीसाम्बशिवाय नमः । श्रीगणपाय नमः ।

ग्रन्थसङ्ख्या चतुश्शतम् ।

Remarks:—For the other works contained herein see the list under Remarks on No 1438. The Ms. is in good condition.

## ॥ केनोपनिषद्भाष्यम् ॥

## 1458. KENOPANISAD BHĀSYAM.

S. S. Collection No. 13 b. Substance—Paper. Size—12⅞ × 7¾ inches. Sheets—8. Lines—15 or 16 to a page. Script—Devanāgarī. No. of Granthas—100. Author—Śaṅkarācārya. Complete.

Beginning, end, colophon and subject—Same as No. 1456.

Remarks:—The Ms. is old and is in good condition. The Paper is blue in colour and bears the watermark year 1833. For the other works contained in this Ms. see the list under Remarks on No. 1439.

---

## ॥ केनोपनिषद्भाष्यम् ॥

## 1459. KENOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 6318. Page 30. Left column. Substance—Paper. Size—11 × 1½ inches. Sheets—16. Lines—12 or 13 to a Page. Script—Devanāgarī. No. of Granthas—395. Author—Śaṅkarācārya. Incomplete.

Beginning and subject—Same as No. 1456.

End:

'अश्वमेधसहस्रश्च सत्यञ्च तुलया धृतम् ।

अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ॥'

सत्यमेव विशिष्यत इति । यो वै एतां ब्रह्मविद्यां के-

नेषितमित्यादिना यथोक्तामेवं महाभागां 'ब्रह्म ह देवेभ्य' इत्यादि प्रस्तुतां सर्वविद्याप्रतिष्ठातां(ष्ठां) वेद। 'अमृतत्वं हि विन्दत' इत्युक्तमपि ब्रह्मविद्याफलमन्ते निगम्यते— अपहत्य पाप्मानमविद्याका(मकर्मलक्षणं संसारबीजं वि- धूय०) ॥

Colophon : Nil.

Remarks :—Only a few lines are wanting at the end of this Ms. On the title page is given "तुलजाराजस्येदं पुस्तकम्" ॥ The Ms. is completely worm-eaten.

---

## ॥ केनोपनिषद्भाष्यम् ॥

## 1460. KENOPANIṢAD BHĀṢYAM.

S. S. Collection No. 14 a. Substance—Paper. Size—$11\frac{1}{8}\times4\frac{3}{4}$ inches. Sheets—14 (6-19). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—350. Author—Śaṅkarācārya. Incomplete.

Beginning :

(यद्धि करणगोचरः, तदन्यस्मै) उपदेष्टुं शक्यं। जातिगुणक्रियादिविशेषणैः न तज्जात्यादिविशेषणवद्ब्रह्म। तस्माद्विषमं शिष्यानुपदेशेन प्रत्याययितुमित्युपदेशे तदर्थग्रहणे च यत्नातिशयकर्तव्यतां दर्शाप(शय)ति। (अन्यदेव +व्याचक्षिरे ॥)

End, colophon and subject—Same as No. 1456.

Remarks :—The Ms. is old and is in a fairly good condition. The Ms. abruptly begins in the introductory bhāṣya on the fourth verse of the First Khaṇḍa of Kenopaniṣad. This Ms. contains also Kenopaniṣad vākya bhāṣya.

## ॥ केनोपनिषद्भाष्यम् ॥

## 1461. KENOPANIṢAD BHĀṢYAM.

S. S. Collection No. 14 b. Substance—Paper. Size—$11\frac{1}{8} \times 4\frac{3}{4}$ inches. Sheets—15 (19-33). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—350. Author—Śaṅkarācārya. Incomplete.

Beginning :

समाप्तं कर्मात्मभूतप्राणविषयां(यं) विज्ञानं कर्म चानेकप्रकारं ययोर्विकल्पसमुच्चयानुष्ठानाद्दक्षिणोत्तराभ्यां सृतिभ्यामावृत्त्यनावृत्ती भवतः । अत ऊर्ध्वं फलनिरपेक्षज्ञानकर्मसमुच्चयानुष्ठानात्कृतात्मसंस्कारस्योच्छिन्नात्म (ज्ञान)प्रतिबन्धकस्य द्वैतविषयदोषप्रदर्शिनो निर्ज्ञाताशेषबाह्यविषयत्वात्संसारबीजमज्ञानमुच्चिच्छित्सतः प्रत्यगात्मविषयजिज्ञासोः 'केनेषित' मित्यात्मस्वरूपतत्त्वविज्ञानाय चायमध्याय आरभ्यते ॥

End :

इतीदित्यनर्थको निपातौ । निमिषितवदिव तिरोभूतमित्येवमाधिदैवतं देवताया अधि यद्दर्शनमधि दैवतं तत् ॥ (अथाध्यात्मं+सङ्कल्पः ॥ ५ ॥) अथानन्तरमध्यात्मम् । आ(त्मनः अधि आत्मविषयं अध्यात्मं उच्यत इति वाक्यशेषः ॥)

Colophon : Nil.

Subject : Kenopaniṣadbhāṣya—Vākyabhāṣya. 1-4 Khaṇḍas.

Remarks :— The Ms. is old and is in a fairly good condition. The Ms. breaks off in the beginning of the bhāṣya on the fifth Vākya of the Fourth Khaṇḍa of this Upaniṣad. The other work contained in this Ms. is Kenopaniṣad padabhāṣya.

## ॥ केनोपनिषद्भाष्यटिप्पणम् ॥

## 1462. KENOPANIṢAD BHĀṢYAṬIPPAṆAM.

J. L. Collection No. 155. Substance—Paper. Size—9 × 4 inches. Sheets—3 (7-9). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—75. Author—Śivānandayati(?). Incomplete.

Beginning:

........ वमारोप्यात्मना तस्य वेद्यत्वं भाष्यमिति निरुपाधिकास्थितिर्नस्यादित्याह— नत्र भवति सोपाधिकत्व इति ॥ स्वयं वेद्यत्वानङ्गीकारे बलात्परवेद्यत्वं प्रसज्यत इत्यपि न वाच्यमित्याह— संवेदनस्वरूपत्वादिति ॥

End:

सगुणब्रह्मविद्यायाः क्रममुक्त्यर्थत्वात्क्रमेण प्राप्यं यत्कैवल्यं निर्गुणविद्याफलं तत्पूर्वोक्तमिहोपसंह्रियत इत्याह— यो वा तमेतामित्यादिना ॥

योऽसौ सर्वेश्वरो विष्णुः सर्वात्मा सर्वदर्शनः ।
शुद्धो बोधाम्बुधिः साक्षात्सोऽहं नित्योऽभय[ः] प्रभुः ॥

Colophon:

इति श्रीशङ्करस्य तलवकारोपनिषद्भाष्यस्य टिप्पणं समाप्तम् ॥

श्रीमृत्युञ्जयार्पणमस्तु ॥

Subject: Kenopaniṣadbhāṣyaṭippaṇa, a gloss on Śaṅkara's Kenopaniṣadpadabhāṣya.

Remarks:— The Ms. is old and is in good condition. This Ms. abruptly begins in the middle of the commentary on the bhāṣya on the fourth verse of the Second Khaṇḍa.

## ॥ केनोपनिषद्दीपिका ॥

## 1463. KENOPANISAD DĪPIKĀ.

T. S. Collection No. 102. Substance—Paper. Size—9⅝ × 4½ inches. Sheets—20. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—230. Author—Śaṅkarānanda. Complete.

Beginning:

केनोपनिषदं सम्यक् व्याकरिष्ये पदाध्वना ।
रम्यां तलवकाराणां शाखायामात्मबोधिनीम् ॥

ब्रह्मणः प्रत्यक्षादिप्रमाणैरनवगम्यत्वात्सदस्तित्वस्य च प्रमाणसिद्धत्वाद्विचित्रेणापि कर्माद्युपासनेन ब्रह्मज्ञानोत्पादमन्तरेण ब्रह्मावाप्तेः सम्पादयितुमशक्यत्वादशुद्धान्तःकरणस्य च ब्रह्मज्ञानोत्पादस्य चासम्भावितत्वादतः कर्माणि प्राणाद्युपासनानि चोक्त्वा ब्रह्मविद्यां वक्तुमुपक्रमते । तत्रापि प्रतिपत्तिसौकर्यार्थं गुरुशिष्यसंवादमेव शिष्यः पृच्छति । केन असता सता अचेतनेन चेतनेन वाऽभिन्नेन वा भिन्नेन वा ईषितं इष्टं कस्येच्छानिमित्तमित्यर्थः । पतति सर्वासु दिक्षु गच्छति ॥

End:

सः अपहत्य स्वस्मादविच्छेदपुरःसरं विनाश्य पाप्मानं ब्रह्मविद्यो तृप्तिप्रतिबन्धहेतुमनन्ते स्वर्गे स्वर्गवासिभिर्गेये आनन्दात्मनि लोके स्वयंप्रकाशे ज्याये ज्यायसि सर्वस्मादप्याधिके ब्रह्मणीत्यर्थः प्रतितिष्ठति । सञ्जातचरमसाक्षात्कारः प्रकर्षेण पुनरुत्थानशून्यत्वेनावस्थानं करोति । प्रतितिष्ठति व्याख्यातम् । पदाभ्यास उपनिषत्समाप्त्यर्थः ।

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्य श्रीशङ्करा-

नन्दभगवतः कृता(तौ) केनोपनिषद्दीपिका समाप्ता ॥
श्रीसाम्बसदाशिवार्पणमस्तु ॥

Subject: Kenopaniṣaddīpikā—a commentary on Kenopaniṣad, according to the Advaita system of philosophy.

Remarks :— The Ms. is in good condition.

---

## ॥ केनोपनिषद्दीपिका ॥

## 1464. KENOPANIṢAD DĪPIKĀ.

Burnell's Catalogue No. 9753 b. **Page** 30. Right column. **Substance**— Palm leaf. Size —16½ × 1½ **inches.** Leaves — 14 (8-21 out of 167). Lines —5 to a Page. Script—Telugu. No. of Granthas—230. Author—Śaṅkarānanda. Complete.

Beginning, end, colophon and subject—Same as No. 1463.

Remarks :—The Ms. is in good condition. For the other works contained in this Ms. see the list under Remarks on No. 1441.

## ॥ केनोपनिषद्दीपिका ॥

## 1465. KENOPANIṢAD DĪPIKĀ.

Burnell's Catalogue No. 9751 e. Page 30. Right column. Substance—Palm leaf. Size —19¼ × 1¾ inches. Leaves— 4 (24-27 out of 69). Lines—12 to a Page. Script—Telugu. No. of Granthas—230. Author —Śaṅkarānanda. Complete.

**Beginning, end and subject**—Same as No. 1463.

**Colophon:**

इति श्रीमत + शङ्करानन्दभगवतः कृतिस्तलवकारोपनिष
द्व्याख्या समाप्ता ॥

**Remarks :**—The Ms. is in good condition. For the other works contained in this Ms. see the list under Remarks on No. 1428.

## ॥ कैवल्योपनिषद्दीपिका ॥

## 1466. KAIVALYOPANIṢAD DĪPIKĀ.

Burnell's Catalogue No. 9711 a. Page 31. Left column.
Substance—Palm leaf. Size—16¾ × 1¼ inches. Leaves—7 (1-7 out of 69). Lines—9 to a Page. Script—Grantha. No. of Granthas—250. Author—Śaṅkarānanda. **Complete.**

Beginning:

प्रणम्य तातं वाञ्छेशं वेङ्कटाम्बां च मातरम् ।
कैवल्योपनिषद्व्याख्या लिख्यते स्वार्थसिद्धये ॥
कैवल्याख्योपनिषदं कैवल्यार्थस्य बोधिनीम् ।
व्याख्यास्ये केवलस्तेन कैवल्यात्मा प्रसीदतु ॥

भगवती श्रुतिर्मातेव सुखप्रतिपत्त्यर्थं कञ्चनाश्वलायनमु- रीकृत्याख्यायिकामवतारयति ब्रह्मविद्यायामौत्सुक्यं जन- यितुम् । अथ साधनचतुष्टयसम्पत्त्यनन्तरमाश्वलायन ऋ- ग्वेदाचार्यः भगवन्तं पूजावन्तं षड्गुणैश्वर्यपरिपूर्णं परमे- ष्ठिनं सर्वोत्कृष्टस्थाननिवासं परिसमेत्य शास्त्रीयेण विधिना समीपमागत्योवाच । उक्तवान् । अधीहि मदनुग्रहार्थम् । स्मारय भगवन् ॥

End:

एवमुक्तेन प्रकारेण त्रिणेत्रध्यानरुद्राध्यायाध्ययनादि- ना विदित्वा साक्षात्कृत्य एनं परमात्मानं कैवल्यं केवल- स्यात्मनो भावः कैवल्यं तत्फलं पुरुषाभिलाषविषयं स- र्वपुरुषार्थसमाप्तिभूतं अश्नुते प्राप्नोति ॥ कैवल्यफलमश्नु- ते व्याख्यातम् । पादाभ्यास उपनिषत्परिसमाप्त्यर्थः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यस्य

श्रीशङ्करानन्दभगवतः कृतिः कैवल्योपनिषद्दीपिका समाप्ता ॥

हरिः ॐ ॥ श्रीवाञ्छेश्वराय नमः । शुभमस्तु ।

आनन्दाय नमः ॥ श्रीवेङ्कटाम्बाय नमः ॥ शुभमस्तु ॥

Subject: Kaivalyopaniṣaddīpikā—an independent commentary on Kaivalyopaniṣad, according to the Advaita system of philosophy.

Remarks:—The first introductory verse in this Ms. seems to have belonged to the scribe of this Ms. who is said to be the son of Vāñcheśa and Veṅkaṭāmbā. The Ms. is in a fairly good condition. This Ms. also contains 'विवरणतत्त्वदीपनम्।'

---

## ॥ कैवल्योपनिषद्दीपिका ॥

## 1467. KAIVALYOPANIṢAD DĪPIKĀ.

Burnell's Catalogue No. 9754 k. Page 31. Left column. Substance—Palm leaf. Size—19¦ × 1¾ inches. Leaves—3 (43-45 out of 69). Lines—12 or 13 to a Page. Script—Telugu. No. of Granthas—250. Author—Śaṅkarānanda. Complete.

Beginning, end, colophon and subject—Same as No. 1466.

Remarks:—For the other works contained in this Ms. see the list under Remarks on No. 1428.

The Ms. is in good condition.

## ॥ कैवल्योपनिषद्दीपिका ॥

## 1468. KAIVALYOPANIṢAD DĪPIKĀ.

Burnell's Catalogue No. 9755 b (a). Page 31. Left column. Substance—Palm leaf. Size—18½ × 1½ inches. Leaves—8 (116-123). Lines—6 to a Page. Script—Telugu. No. of Granthas—250. Author—Śaṅkarānanda. Complete.

Beginning, end, colophon and subject—Same as No. 1466.

Remarks :—The Ms. is in a fairly good condition. The other two works contained in this Ms. are (1) अमृतबिन्दूपनिषद्दीपिका ॥ (2) ब्रह्मोपनिषद्दीपिका ॥

## ॥ कैवल्योपनिषद्दीपिका ॥

## 1469. KAIVALYOPANIṢAD DĪPIKĀ.

J. L. Collection No. 156. Substance—Paper. Size—6¾ × 3½ inches. Sheets— 15. Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Śaṅkarānanda. Complete.

Beginning, end, colophon and subject—Same as No. 1466.

Remarks :—The Ms. is old and is in a fairly good condition.

---

## ॥ कैवल्योपनिषद्दीपिका ॥

## 1470. KAIVALYOPANISAD DĪPIKĀ.

J. L. Collection No. 157. Substance—Paper. Size—10¾ × 4½ inches. Sheets—11 to a Page. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Śaṅkarānanda. Complete.

Beginning, end and subject—Same as No. 1466.

**Colophon:**

श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमच्छङ्करा[चार्या]नन्दभगवतः कृतिः कैवल्योपनिषद्दीपिका समाप्ता ॥

Remarks :—The Ms. is old and is in good condition.

## ॥ क्षुरिकोपनिषद्दीपिका ॥

## 1471. KṢURIKOPANIṢAD DĪPIKĀ.

J. L. Collection No. 161 c. Substance—Paper. Size—11⅜ ×

5⅛ inches. Sheets—7 (24-30). Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—180. Author—Nārāyaṇāśramin. Complete.

Beginning :

क्षुरिका शस्त्रिका प्रोक्ता तत्तुल्या धारणा यतः ।
तद्वाचकस्त्रिखण्डोऽयं क्षुरिकाग्रन्थ उच्यते ॥

गुरुतः प्राप्तविद्यस्य तत एव लब्धजातप्रणवमन्त्रस्य षडङ्गयोगेऽधिकार इति तदर्थमुत्तरो ग्रन्थः— "क्षुरिकामित्यादि" ॥ क्षुरिका क्षुरिकामिव संसारोत्थित(छित्त)ये शरीरे शस्त्रिकामिव रूपक (पकं) धारणां आत्मनि चित्तावस्थानलक्षणं । उक्तं च योगयाज्ञवल्क्ये—

"शमादिगुणयुक्तस्य मनस(ः) स्थितिरात्मनि ।
धारणेत्युच्यते सद्भिः शास्त्रतात्पर्यवेदिभिः ॥"

इति न पुनर्जन्म भवतीति शेषः ॥

End :

मात्राधारेण मात्रा द्वादशादिसङ्ख्याः । प्रणवमात्रास्ता एव धारा यस्य मनःक्षुरस्य स तथा तेन तन्तुं वासनारूपं नाडीरूपश्च । द्विरुक्ति(ः) निश्चयार्था । समाप्त्यर्थ इतिशब्दः ।

अयमारोहप्रकार उत्क्रान्तिसमये खेचरीपटले उक्तः । तद्यथा—

यदा तु योगिनो बुद्धिस्त्यक्तुं देहमिमं भवेत् ।
तदा स्थिरासनो भूत्वा मूलाच्छक्तिसमुज्वलाम् ॥
सूर्यकोटिप्रतीकाशां भावयेच्चिरमात्मनः ।

* * *

"तत्तत्कर्माणि संयोज्य स्वच्छदेहः सुखं व्रजेत् ।
अनेन देवियोगेन वञ्चयेत्कालमागतम् ॥" इति ॥

आरोहावरोहाभ्यास एव सर्वयोगशास्त्रेषु मुख्यो योग

इति द्रष्टव्यम् । स च क्षुरिकायां प्रकाशितः ॥

नारायणेन रचिता श्रुतिमात्रावलम्बिना ।

अस्पष्टपदवाक्यानां दीपिका क्षुरिकाभिधे ॥

Colophon:

इति क्षुरिकोपनिषद्दीपिका समाप्ता ॥

Subject: Kṣurikopaniṣad dīpikā–a commentary on this Upaniṣad according to the Advaita system of Philosophy.

Remarks:—For the other works contained herein see the list under Remarks on No. 1429.

The Ms. is old and the sheets are here and there rat-eaten.

## ॥ गर्भोपनिषद्दीपिका ॥

## 1472. GARBHOPANIṢAD DĪPIKĀ.

Burnell's Catalogue No. 9754 j. Page 31. Right column. Substance—Palm leaf. Size—$19\frac{1}{4} \times 1\frac{3}{4}$ inches. Leaves—5 (39—43). Lines—12 to a Page. Script—Telugu. No. of Granthas—250. Author—Śaṅkarānanda. Complete.

Beginning:

गर्भोपनिषदो व्याख्यां करिष्येऽस्मिञ्छरीरके ।

अहंबुद्धेरहं तस्याः करणाज्जुष्यतां ह(द्ध)रः ॥

गर्भोपनिषदां सम्बन्धचतुष्टयस्य साधारण्यात् तत्पृथक् न वर्णनीयम् । तत्र तु सत्यप्युपनिषत्साधारण्ये शारीरके वैराग्यं विशेषतः प्रतिपाद्यते । ततः शरीरमगोचरीकृत्याह । पञ्चात्मकं पञ्चपृथिव्यप्तेजोवाय्वाकाश आत्मा स्वरूपम् ॥

End:

इदानीमस्य शास्त्रस्य मलमूत्रादिपरिमाणाभिधायित्वे-

नानादेयत्वं प्राप्तं वारयति। पैप्पलादं पिप्पलादेन स्वशिष्यान्मोक्षकामिनः प्रत्युक्तम्। पैप्पलादं मोक्षशास्त्रं मोक्षस्याविद्यानिवृत्तिरूपस्य हि तस्य शासनान्मोक्षशास्त्रं परिसमाप्तम्। व्याख्यातं। वाक्याभ्यास उपनिषत्परिसमाप्त्यर्थः॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपाद-
शिष्यस्य श्रीशङ्करानन्दभगवतः कृतिः
गर्भोपनिषद्दीपिका समाप्ता॥

Subject: Garbhopaniṣaddīpikā—a commentary on Garbhopaniṣad, according to the Advaita system of philosophy.

Remarks:—For the works contained herein see the list under Remarks on No. 1428. The Ms. is in good condition.

## ॥ गर्भोपनिषद्दीपिका ॥

## 1473. GARBHOPANIṢAD DĪPIKĀ.

J. L. Collection No. 164 g. Substance—Paper. Size—11¾ × 5⅛ inches. Sheets—6 (44-49). Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—180. Author—Nārāyaṇāśramin. Complete.

Beginning:

गर्भसङ्ख्यां निरूप्याथ गर्भोपनिषदित्यतः।
पञ्चखण्डाष्टमीमुण्डा पैप्पलादाभिधा तथा॥

गर्भवासान्मुच्यत इत्युक्तं। तत्र को गर्भः कथं च तत्र वासः इत्यपेक्षायां संसारवैराग्यार्थं च जन्ममरणादिदुःखं निरूपणीयमिति गर्भोपनिषदारभ्यते। तत्र गर्भस्य मातापितृशरीरापेक्षया प्रथमं शरीरस्वरूपमाह। पञ्चात्मकं पञ्चभूतात्मकं पञ्चसु धारणादिषु शब्दादिषु आनन्दा-

दिषु च वर्तमानं। पञ्चस्वित्यत्र वीप्सा द्रष्टव्या। प्रश्नोत्त-रपश्चकानां त्रित्वात् षडक्षरां षण्णां मधुरादिरसानामाश्र-यं आश्रययतीत्याश्रयं। पचाद्यच्। षड्रसभोगायतनमित्यर्थः॥

End:

मेदः प्रस्थौ द्वाविति। याज्ञवल्क्ये तु द्वौ भेदौ इत्युक्तं। अञ्जलिग्रहणं वर्तते अनियतमिति। याज्ञवल्क्ये तु नि-यम उक्तः। सप्तैव तु पुरीषस्य चत्वारो मूत्रमेव चेति। अञ्जल(य) इति वर्तते। तत्तु प्रायोऽभिप्रायेण। निष्कर्षे क्रियमाणे तु नास्ति नियमः। अनियमे हेतुः आहारप-रिमाणादिति। तस्मिन्नधिकेऽधिकं न्यूने न्यूनमित्यर्थः। पिप्पलादेन प्रोक्तं पैप्पलादं। द्विरुक्तिः समाप्त्यर्था। अत्र प्रसङ्गात् पलादिज्ञानार्थं मागधपरिभाषोच्यते। तद्यथा—

अथ मानिकाः—

"न मानेन विना भ(भु)क्तिर्द्रव्याणां जायते क्वचित्।
अतः प्रयोगकार्यार्थं मानमात्रोच्यते मया॥
त्रसरेणुर्बुधैः प्रोक्तस्त्रिंशता परमाणुभिः।
त्रसरेणुस्तु पर्यायनाम्ना वंशी निगद्यते॥
जालान्तरगतैः सूर्यकरैर्वंशी विलोक्यते।
षड्वंशीभिर्मरीचिः स्यात्ताभिः षड्भिश्च राजिका॥

* * * *

मृद्वृत्तवेणुलोह्रादेर्भाण्डं यच्चतुरङ्गुलम्।
विस्तीर्णञ्च तथोच्चं च तन्मानं कुडवं वदेत्॥
यदौषधं तु प्रथमं यस्य योगस्य कथ्यते।
तत्तन्नाम्नैव संयोगो [हि] कथ्यतेऽत्र विनिश्चयः॥" इति।

नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्टपदवाक्यानां गर्भोपनिषद्दीपिका ॥

Colophon:

इति गर्भोपनिषद्दीपिका समाप्ता ॥

Subject: Garbhopaniṣaddīpikā—a commentary on Garbhopaniṣad, according to the Advaita school of philosophy.

Remarks:—For the other works contained herein see the list under Remarks on No. 1429.

The Ms. is old and is in a fairly good condition. The sheets are here and there rat-eaten.

## ॥ गोपालतापिन्युपनिषद्दीपिका ॥

## 1474. GOPĀLATĀPINYUPANIṢAD DĪPIKĀ.

T. S. Collection No. 170 Substance—Paper. Size—10 × 1⅓ inches. Sheets—37 (1-39; 37 and 38 are missing). Lines—9 to a page. Script—Devanāgarī. No. of Granthas—750. Author—Viśveśvara. Incomplete.

Beginning:

श्रीगुरुभ्यो नमः ॥

गोपीजनवल्लभाय नमः ।

स जयति भगवान्कृष्णः कंसारिः केलिवर्धनः सुहृदाम् ।
गङ्गाविपिनविहारी वनमाली (कोपि) सजलजलदाभः ॥

परमकारुणिकतया सगुणोपासनक्रमेणाधिकारी(रि)जनानर्थनिवृत्तये सच्चिदानन्दस्वरूपश्रीकृष्णप्रभावाप्तये च श्रीगोपालमुद्दिशति तापिनीश्रुतिः । श्रोतॄणामविघ्नविद्यासिद्धये सदाचारावबोधनाय विषयसौलभ्यप्रकाशनेन तत्प्रवृत्तिसिद्धये च प्रतिपाद्यपरमदैवतप्रणतिलक्षणं मङ्गलं प्रकाशयति – सच्चिदानन्दरूपायेति ॥

"सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥"
कृष्णाय नम इति सम्बन्धः ।

End:

तदेवं ब्रह्मसंवादेन गान्धर्वप्रश्नोत्तरं निरूप्याथ कण्ठतो मुनिर्गान्धर्वीप्रश्नोत्तरमवतारयति— दत्वा स्तुतिमिति ।

"दत्वा स्तुतिं पुण्यतमां ब्रह्मणे स्वस्वरूपिणे ।
कर्तृत्वं सर्वभूतानामन्तर्धाने बभूव सः ॥
ब्रह्मणे ब्रह्मपुत्रेभ्यो नारदात्तु श्रुतं यथा ।
तथा प्रोक्तं तु गान्धर्वि गच्छ त्वं स्वालयान्तिकम् ॥"

स विष्णु(ः) स्वस्वरूपिणे स्वमूर्तये ब्रह्मणे पुण्यतमां प्रागुक्तां स्तुतिं दत्वा तथा सर्वलोकानां कर्तृत्वं कर्तृसामर्थ्यं ब्रह्मणे दत्वा अन्तर्धाने बभूव अदृश्यो बभूव । मया चेदं तत्सम्प्रदायतो यथा श्रुतं तथा युष्मान्प्रति प्रोक्तमित्याह ॥ ब्रह्मणे......... ॥

Colophon: (Sheet No. 17)

इति श्रीमद्विश्वेश्वरविरचितायां(नां) गोपीनाथध्यानरसनभजननिरूपणानां पूर्वतापिनीयोपनिषद्दीपिका समाप्ता ॥

Subject: Gopālatāpinyupaniṣaddīpikā—an independent commentary on this Upaniṣad, both Pūrva and Uttara, according to the Advaita school of philosophy.

Remarks:—The Ms. is old and is damp in appearance. Only a few lines are wanting at the end of this Ms.

## ॥ चूलिकोपनिषद्दीपिका ॥

## 1475. CŪLIKOPANISAD DĪPIKĀ.

J. L. Collection No. 161 d. Substance—Paper. Size—11¾ × 5⅛ inches. Sheets—3 (30-32). Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—110. Author—Nārāyaṇāśramin. Complete.

Beginning :

चूलिका चूडिकालोके स्तम्भाग्रं तीक्ष्णमुच्यते ।
तद्वद्वेदान्तभागोऽयं चतुःखण्डा हि पञ्चमी ॥

योगफलमात्मदर्शनम् । स चात्मातिसन्निहितो कण्ठस्य हारवत् पराग्दृष्टिना गुरुं विना न दृश्यत इति तद्बोधनार्थमुत्तरो ग्रन्थस्तत्र हाररूपकेणाह— अष्टपादमिति । अष्टौ प्रकृतिरूपाः पादा अवयवा अपि अस्य तमष्टपादम् । तदुक्तम् ।

"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा"— इति ॥

अस्याः पादत्वं सर्वतः प्राप्यसाम्यात् शुचिरुज्वलं ॥

शुचिश्शब्दः सकारान्तो नपुंसकः । शुचिमिति वा पाठः ॥

End :

ब्रह्मकूटस्थं ब्रह्मविधानं तद् ज्ञानोपायं लीनास्या क्लीं(ली)नमास्यं मुखं प्रवृत्तिद्वारं भागादि येषां ते तथोक्ताः । किमर्थं लीनास्याः ब्रह्मशायिनें ब्रह्मणि शेरते तच्छीलो ब्रह्मशायी । भावप्रधानो निर्देशः ब्रह्मशायित्वाय ब्रह्मणि शयनमेकीभवितुमित्यर्थः । द्विरुक्तिः समाप्त्यर्था ॥

नारायणेन रचिता श्रुतिमात्रोपजीविना ।

अस्पष्टपदवाक्यानां दीपिका चूलिकाभिधे ॥

Colophon :

समाप्ता चूलिकोपनिषद्दीपिका ॥ ५ ॥

Subject: Cūlikopaniṣaddīpikā otherwise known as Mantrikopaniṣaddīpikā, a commentary on this Upaniṣad, according to the Advaita school of philosophy.

Remarks:—For the other works contained in this Ms. see the list under Remarks on No. 1429. The Ms. is old and is in a fairly good condition. The sheets are here and there rat-eaten.

---

## ॥ छान्दोग्योपनिषद्भाष्यम् ॥

## 1476. CHĀNDOGYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 6323. Page 32. Left Column.
Substance—Paper. Size—11¾ × 5½ inches. Sheets—25. Lines—12 to 15 to a Page. Script—Devanāgarī. No. of Granthas—5600. Author—Śaṅkarācārya. Complete.

Beginning :

श्रीगुरुभ्यो नमः ॥

श्रीशङ्करं सदानन्दं माधवं कमलजं गुरुम् ।
शारदां वरदां नौमि जाड्यापनुतये तथा ॥

ॐमित्येतदक्षरमित्याद्यष्टाध्यायी छान्दोग्योपनिषत्तस्याः संक्षेपतो(ऽ)र्थजिज्ञासुभ्यः ऋजुविवरणमल्पग्रन्थमिदमारभ(भ्य)ते । तत्र सम्बन्धः । समस्तं कर्माधिगतं प्राणादिदेवताविज्ञानसहितमर्चिरादिमार्गेण ब्रह्मलोकप्रतिपत्तिकारणं । केवलं च धूमादिमार्गेण चन्द्रलोकप्रतिपत्तिकारणं । स्वभाव[प्र]वृत्तानाञ्च मार्गद्वयपरिभ्रष्टानां कष्टा(ऽ)धोगतिरुक्ता ॥

* * * *

तत्र कर्माभ्यासस्य दृढीकृतत्वात्कर्मपरित्यागेनोपासन एव दुःखं चेतःसमर्पणं कर्तुमिति कर्माङ्गविषयमेव तावदादावुपासनमुपन्यस्यते — ॐमित्येतदक्षरमुद्गीथमुपासीत । ॐमित्येतदक्षरं परमात्मनोऽभिधानं नेदिष्ठं । तस्मिन् हि प्रयुज्यमाने स प्रसीदति प्रियनामग्रहण इव लोकः ॥

End :

धार्मिकानार्चिरादिना मार्गेण[।]कार्यब्रह्मलोकमभिसम्पद्य यावद्ब्रह्मलोकस्थि(ति)स्तावत्तत्रैव तिष्ठति प्राक् ततो नावर्तत इत्यर्थः । द्विरभ्यास उपनिषद्विद्यापरिसमाप्त्यर्थः ॥ १४ ॥

Colophon :

इति श्रीगोविन्दभगवत्पादपूज्यशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशङ्करभगवतः कृतौ छान्दोग्योपनिषद्विवरणे ऽष्टमोऽध्यायः समाप्तः ॥ ८ ॥

Subject : Chāndogyopaniṣadbhāṣya belonging to the Advaita system of Philosophy.

Remarks:—On the title page of the Ms. is given 'हे पुस्तक श्रीमन्त राज श्रीशरभोजीमहाराजसाहेबसांच्या कारकर्तीतकाशीदेशाहून खरिदीकरून आणिले अस्से' ; i.e. this Ms. is brought down to Tanjore from Benares with the benevolent patronage and help of King Śarabhoji who reigned between 1800—1832 A. D. The Ms. is in good condition. The introductory verse given in the beginning might be the scribe's own.

## ॥ छान्दोग्योपनिषद्भाष्यम् ॥

## 1477. CHĀNDOGYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 9738. Page 32. Left column.

Substance—Palm leaf. Size—16×1¼ inches. Leaves—180. Lines—5 or 6 to a Page. Script—Nandināgarī and Grantha. No. of Granthas—5600. Author—Śaṅkarācārya. Complete.

Beginning, end and subject—Same as No. 1476.

Colophon:

छान्दोग्योपनिषद्भाष्यं समाप्तम् ॥

ॐ ब्रह्मणे नमः । नमो ब्रह्मादिभ्यो नमो ब्रह्मविद्यासम्प्रदाय-
कर्तृभ्यो नमो वंशऋषिभ्यो नम आचार्येभ्यो नमो गणाधिपतये
नमः सरस्वत्यै नमः ।

कल्याणगुणसम्पूर्णं निर्वाणावितरा(?)चणम् ।
गीर्वाणेन्द्रसरस्वत्याश्चरणं शरणं मम ॥

Remarks:—The Ms. is old and is in a fairly good condition. A fragment of Chāndogyopaniṣad—eighth Adhyāya only, is also given in the beginning of this Ms.

## ॥ छान्दोग्योपनिषद्भाष्यम् ॥

## 1478. CHĀNDOGYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 9739. Page 32. Left column. Substance—Palm leaf. Size—12¾×1½ inches. Leaves—173. Lines—8 to a Page. Script—Grantha. No. of Granthas—5600. Author—Śaṅkarācārya. Complete.

Beginning, end and subject—Same as No. 1476.

Colophon:

इति श्रीगोविन्द + उपनिषद्विवरणेऽष्टमः प्रपाठकः समाप्तः ॥

श्रीगुरुभ्यो नमः ॥

अब्दे विश्वावसुख्याते मासे भाद्रपदे शुभे ।
भाष्यं छान्दोग्यसंज्ञस्य गोपालयतियोगिनाम् ॥
गोपालकृष्णालिखितं भक्तिभीतिसमन्वितम् ।

दीर्घबिन्दुविसर्गाणामक्षराणाञ्च विस्तृतिः ।
यद्यस्ति दृष्ट्वा दयया क्षन्तुमर्हथ सज्जनाः ॥

श्रीगुरुदक्षिणामूर्तये नमः ॥ श्रीगोपालकृष्णाय नमः ॥

Remarks:—The Ms. is in good condition. The scribe of this Ms. is Gopālakṛṣṇa. It belonged to one Gopālayatiyogin.

## ॥ छान्दोग्योपनिषद्भाष्यम् ॥

## 1479. CHĀNDOGYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 6324. Page 32. Left column. Substance—Paper. Size—10½ × 4½ inches. Sheets—135. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—3900. Author—Śaṅkarācārya. Incomplete.

Beginning—Same as No. 1476.

End:

कोसौ भगवान्—

उत्पत्तिं प्रलयञ्चैव भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥

एवंधर्मा सनत्कुमारस्तमेवं सनत्कुमारं देवं स्कन्द इति आचक्षते कथयन्ति तद्विदः । द्विर्वचनमध्यायपरिसमाप्त्यर्थं

Colophon:

इति श्रीमद्गोविन्द+छान्दोग्यविवरणे सप्तमः प्रपाठकः ॥

Subject: Chāndogyopaniṣadbhāṣya. 1—7 Prapāṭhakas (Adhyāyas).

Remarks:—The Ms. is in very good condition. It is well preserved. The introductory portion of the commentary on the 8th Adhyāya "यद्यपि दिग्देशकालादिभेदशून्यं+दिग्देशगुणगतिफल-

भेदशून्यं हि परमार्थसदद्वयं.... ॥ " is given on the last sheet.

## ॥ छान्दोग्योपनिषद्भाष्यम् ॥

## 1480. CHĀNDOGYOPANIṢAD BHĀṢYAM.

T. S. Collection No. 144. Substance.—Paper. Size—9½ × 4½ inches. Sheets—43. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—750. Author—Śaṅkarācārya. Sixth Adhyāya only.

Beginning:

॥ श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥
श्रीगुरुभ्यो नमः ॥

ॐ श्वेतकेतुर्हारुणेय आसेत्यस्याध्यायसम्बन्धः — 'सर्वं खल्विदं ब्रह्म तज्जलान्' इत्युक्तम् । कथं तस्माज्जगदिदं जायते । तस्मिन्नेव च लीयते । अनिति च । तेनैवेत्येवं तद्वक्तव्यम् । अनन्तरं चैकस्मिन्भुक्ते विदुषि सर्वं जगत्तृप्तं भवतीत्युक्तम् । तदेकत्वे सत्यात्मनः सर्वभूतस्थस्योपपद्यते । नात्मभेदे । कथं पुनस्तदेकत्वमिति तदर्थोऽयं षष्ठोऽध्याय आरभ्यते । पिता पुत्राख्यायिका विद्यायाः सारिष्टत्वप्रदर्शनार्था । श्वेतकेतुरिति नामत. । ह इति ऐतिह्यार्थः । आरुणेय अरुणस्य पुत्र आस बभूव ॥

End:

कथमेवं व्यतिरिक्तविज्ञाने(ऽ)सति तेषां कर्तृत्वादिविज्ञानं सम्भवति दृश्यते च । तद्वत्तस्यापि देहादिष्वात्मबुद्धित्वान्नस्यात् सदात्मविज्ञानम् । तस्माद्विकारानृताधिकृतजीवात्मविज्ञाननिवर्तकमेवेदं वाक्यं 'तत्त्वमसीति' सिद्धम् ॥

Colophon:

इति श्रीगोविन्द + छान्दोग्योपनिषद्विवरणे षष्ठ:
प्रपाठकः समाप्त: ॥

Subject: Chāndogyopaniṣad bhāṣya. Sixth Adhyāya or Prapāṭhaka only.

Remarks:—The Ms. is in good condition.

## ॥ छान्दोग्योपनिषद्भाष्यम् ॥

## 1481. CHĀNDOGYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 9740. Page 32. Left column.
Substance—Palm leaf. Size—19 × 1½ inches. Leaves—86. Lines—6 to a Page. Script—Grantha. No. of Granthas—750. Author—Śaṅkarācārya. Sixth Adhyāya only.

Beginning, end, colophon and subject—Same as No. 1480.

Remarks:—The Ms. is old and is in a fairly good condition.

---

## ॥ छान्दोग्योपनिषद्भाष्यम् ॥

## 1482. CHĀNDOGYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 9741 a. Page 32. Left column.
Substance—Palm leaf. Size—20 × 1⅝ inches. Leaves—27 (1-27). Lines—12 to a Page. Script—Telugu. No. of Granthas—750. Author—Śaṅkarācārya. Sixth Adhyāya only.

Beginning, end, colophon and subject—Same as No. 1480.

Remarks:—The other work contained herein is ईशावास्योपनिषद्भाष्यम् ॥ The Ms. is in a fairly good condition.

## ॥ छान्दोग्योपनिषद्भाष्यम् ॥

## 1483. CHĀNDOGYOPANISAD BHĀSYAM.

Burnell's Catalogue No. 6515. Page 32. Left column. Substance—Paper. Size—7¾ × 4¾ inches. Sheets—10. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas —140. Author—Śaṅkarācārya. Incomplete.

Beginning:

श्रीगणपतये नमः ।

अथ य एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपं(प)सम्पद्य स्वेन रूपेणाभि[ः] सं(निष्प)द्यते एष आत्मेति होवाच एतदमृतमभयमेतद्ब्रह्म इत्युक्तम् । तत्र कोऽसौ सम्प्रसादः । कथं वा (तस्याधिगमः) ॥

End:

अतस्तत्क्षपणाय वस अपराणि द्वात्रिंशतं वर्षाणि इत्युक्त्वा तथोषितव्रते क्षपितदोषाय तस्मै होवाच ॥

अथात्मा(य आत्मा)ऽपहतपाप्मादिलक्षणो 'य एषोऽक्षिणी' त्यादिना व्याख्या(त एष सः) ॥

Subject: Chāndogyopaniṣad bhāṣya. 7—9 Khaṇḍas of the eighth Adhyāya only.

Remarks:—This Ms. begins with the bhāṣya on the 7th Khaṇḍa and breaks off in the beginning of the bhāṣya on the 10th Khaṇḍa of the 8th Adhyāya. The Ms. is old and is in good condition.

## ॥ जाबालोपनिषद्दीपिका ॥

## 1484. JĀBĀLOPANIṢAD DĪPIKĀ.

Burnell's Catalogue No. 9754 f. Page 32. Left column. Substance—Palm leaf. Size—19¼ × 1¾ inches. Leaves—4

(27—30 out of 69). Lines—12 to a Page. Script—Telugu. No. of Granthas—250. Author—Śaṅkarānanda. Complete.

Beginning:

ॐ कृष्णद्वैपायनं व्यासं शङ्करं लोकशङ्करम् ।
आनन्दात्मानमध्यात्मगुरुं देवं नतोऽस्म्यहम् ॥
जाबालोपनिषद्व्याख्यां ख्यापयन्तीं सुधानिधिम् ।
करिष्ये प्रीयतां देवो अ(वि)मुक्तो यथेश्वरः ॥ (विमुक्तोयं तयेश्वरः) ॥

सर्वासामुपनिषदां सङ्गतिर्या कर्मकाण्डेन सा अस्या अपि । तत्सङ्गतिश्चास्माभिः बृहदारण(ण्य)कदीपिकारम्भे प्रदर्शिता । अत्र सर्वतीर्थसार आत्मा अशेषसंसारधर्मैरसंस्पृष्टोऽहंप्रतिपाद्यः । तादृशज्ञानेन निःशेषानर्थनिवृत्तिरानन्दावाप्तिश्च प्रयोजनं । उपनिषदन्तरवत् । अनयैव सम्बन्धाधिकारिणावपि न पृथग्वर्णनीयौ । ब्रह्मज्ञानोपायश्च सन्यासानधिकारिणां शतरुद्रीयजपश्च सन्यासिनामपि श्रवणाद्यनधिकारिणां सर्वसङ्गपरित्यागश्च आक्षेपसमाधानाभ्यां प्रतिपाद्यत इत्युपनिषदर्थसंक्षेपः ॥

End:

शुक्लध्यानपरायणः शुक्लः । प्रणवः । अशेषदोषशून्यत्वात् स्वयम्प्रकाश आनन्दात्मा तस्य ध्यानं विजातीयप्रत्ययशून्यत्वेन सजातीयप्रत्ययप्रवाहः तदेकमेव परमयनमाश्रयो यस्य स तथा । अध्यात्मनिष्ठः । अध्यात्मनिष्ठा यस्य स तथा अन्तर्मुख इत्यर्थः । अशुभकर्मनिर्मूलनपरः । अशुभानां कर्मणामनेकजन्मार्जितानां पापानां निर्मूलनं (ने) विनाशो(शे) परस्तात्पर्यवान् यस्स तथा ।

किं बहुना । यः सन्यासेन उक्तलक्षणेनानेककाल-

मनुष्ठितेन स्वल्पकालं वा देहत्यागं देहस्य मोक्षं करोति ।
स्पष्टं । सः स्वल्पमधिकं वा कालमनुष्ठितसन्यासः ।
परमहंसः । परमहंसशब्दाभिधेयः । नाम निश्चितम् ।
इति । इतिरुपनिषत्समाप्त्यर्थः ॥

Colophon :

इति चतुर्थः खण्डः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यस्य
श्रीशङ्करानन्दभगवतः कृतिजाबालोपनिष-
द्दीपिका समाप्ता ॥

कृष्णार्पणमस्तु ॥

Subject: Jābālopaniṣaddīpikā—a commentary on Jābālopaniṣad according to the Advaita system of philosophy.

Remarks:—The Ms. is in good condition. For the other works contained in this Ms. see the list under Remarks on No. 1428.

## ॥ जाबालोपनिषद्दीपिका ॥

## 1485. JĀBĀLOPANIṢAD DĪPIKĀ.

Burnell's Catalogue No. 9756. Page 32. Left column. Substance—Palm leaf. Size—20½ × 1½ inches. Leaves—11. Lines—6 to a Page. Script—Telugu. No. of Granthas—250. Author—Śaṅkarānanda. Complete.

Beginning, end, colophon and subject—Same as No. 1484.

Remarks:—The Ms. is old and is in a worn-out condition. The leaves are completely worm-eaten. The first leaf of this Ms. contains the last few lines of Amṛtabindūpaniṣaddīpikā.

## ॥ जाबालोपनिषद्दीपिका ॥

## 1486. JĀBĀLOPANIṢAD DĪPIKĀ.

J. L. Collection No. 158. Substance—Paper. Size—10⅞ × 4⅞

inches. Sheets—22. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Śaṅkarānanda. Complete.

Beginning, end, colophon and subject—Same as No. 1481.

**Remarks** :—The Ms. is old and is in good condition. The readings of this Ms. are slightly different from those found in No. 1484.

## ॥ तैत्तिरीयोपनिषद्भाष्यम् ॥

## 1487. TAITTIRĪYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 6542. Page 32. Right column. Substance—Paper. Size—13¼ × 5⅛—inches. Sheets—86. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1500. Author—Śaṅkarācārya. Complete.

Beginning :

श्रीगणेशाय नमः ॥ ॐ ॥

यस्माज्जातं जगत्सर्वं यस्मिन्नेव च लीयते ।
येनेदं धार्यते चैव तस्मै ज्ञानात्मने नमः ॥ १ ॥
यैरिमे गुरुभिः पूर्वं पदवाक्यप्रमाणतः ।
व्याख्याताः सर्ववेदान्तास्तान्नित्यं प्रणतोऽस्म्यहम् ॥ २ ॥
तैत्तिरीयकसारस्य मयाचार्यप्रसादतः ।
विस्पष्टार्थरुचीनां हि व्याख्येयं सम्प्रणीयते ॥ ३ ॥

नित्यान्यधिगतानि कर्माण्युपात्तदुरितक्षयार्थानि ; काम्यानि च फलार्थिनां पूर्वस्मिन् ग्रन्थे। इदानीं कर्मोपादानहेतुपरिहाराय ब्रह्मविद्या प्रस्तूयते ।

* * * *

उपनिषदिति विद्योच्यते । तत्सेविनां गर्भजन्मजरानिशातनात्, तदवसादनाद्वा ब्रह्मणो वोपगमयितृत्वादुपनिषण्णं वास्यां परं श्रेय इति । तदर्थत्वाद्ग्रन्थोऽप्युपनि-

षत् । शं सुखं प्राणवृत्तेरहश्चाभिमानी देवतात्मा मित्रः । नः अस्माकम् । भवतु । तथैवापानवृत्ते रात्रेश्चाभिमानी वरुणः । चक्षुष्यादित्योऽर्यमा बले इन्द्रः । वाचि बुद्धौ च बृहस्पतिः । विष्णुरुरुक्रमः । विस्तीर्णक्रमः पदयोरभिमानी । एवमाद्या अध्यात्मदेवताः शं नः भवत्विति सर्वत्रानुषङ्गः ॥

End :

सुवर्णः(नेः) । सुवरादित्यः (नकार उपमार्थे ।) आदित्य इव सकृद्विभातमस्मदीयज्योतिः प्रकाशत इत्यर्थः । इतीयं वल्लीद्वयविहितोपनिषत् परमात्मज्ञानम् । तामेतां यथोक्तामुपनिषदम् । शान्तो दान्त उपरतस्तितिक्षुस्समाहितो भूत्वा भृगुवत्तपो महदास्थाय य एवं वेद । तस्येदं फलं यथोक्तमिति ॥

**Colophon:**

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्य- भगवत्पादकृतं तैत्तिरीयोपनिषद्भाष्यं समाप्तम् ॥

श्रीशिवाय नमः ॥

Subject: Taittirīyopaniṣad bhāṣya belonging to the Advaita system of Philosophy. 1– 3 Vallīs.

**Remarks** :—The Ms. is in excellent condition. Floral designs decorate the front and back pages. The Paper is of English manufacture. The readings of this Ms. are slightly different from those found in the Printed Volumes. The Upaniṣad text also is given in this Ms.

## ॥ तैत्तिरीयोपनिषद्भाष्यम् ॥

## 1488. TAITTIRĪYOPANIṢAD BHĀṢYAM.

**Burnell's Catalogue No. 9752 g. Page 32. Right column.**

Substance—Palm leaf. Size—18¼ × 1½ inches. Leaves—71 (159-229 out of 255). Lines—6 to a Page. Script—Grantha. No. of Granthas—1500. Author—Śaṅkarācārya. Complete.

Beginning, end, colophon and subject—Same as No. 1487.

Remarks :— The Ms. is in a fairly good condition. For the other works contained in this Ms. see the list under Remarks on No. 1438.

---

## ॥ तैत्तिरीयोपनिषद्भाष्यम् ॥

## 1489. TAITTIRĪYOPANIṢAD BHĀṢYAM.

S. S. Collection No. 13 g. Substance—Paper. Size—12¾ × 7¾ inches. Sheets—20. Lines—15 or 16 to a Page. Script—Devanāgarī. No. of Granthas—1500. Author—Śaṅkarācārya. Complete.

Beginning, end, colophon and subject—Same as No. 1487.

Remarks :—The Ms. is old and is in good condition. The Paper is blue in colour For the other works contained in this Ms. see the list under Remarks on No. 1439.

## ॥ तैत्तिरीयोपनिषद्भाष्यम् ॥

## 1490. TAITTIRĪYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 6320. Page 32. Right column. Substance—Paper. Size—10¾ × 4½ inches. Sheets—22. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—380. Author—Śaṅkarācārya. Śikṣā Valli only.

Beginning—Same as No. 1487.

End:

कर्मभ्य एव पूर्वोपचितदुरितप्रतिबन्धक्षयाद्विद्योत्पद्यते चेत् कर्मभ्यः पृथगुपनिषच्छ्रवणादियत्नोऽनर्थक इति चेत्, न, नियमाभावात् । न हि, प्रतिबन्धक्षयादेव विद्योत्पद्यते, नत्वीश्वरप्रसादतपोध्यानाद्यनुष्ठानात्’ इति नियमोऽ-

स्ति ; अहिंसाब्रह्मचर्यादीनां च विद्यां प्रत्युपकार(क)त्वात्, साक्षादेव च कारणत्वात् श्रवणमनननिदिध्यासनादीनाम् । अतः सिद्धान्याश्रमान्तराणि । सर्वेषां चाधिकारो विद्यायाम् । परं च श्रेयः केवलाया विद्याया एवेति सिद्धम् ॥

मद्गुरुभ्यो नमः ॥

Colophon: Nil.

Subject: Taittirīyopaniṣad bhāṣya The first Vallī (Śikṣā Valli only).

Remarks:—On the title page is given "शिक्षा उपनिषद्भाष्य तुलजराजभोसलेंद्रस्य" ॥ i. e. the Ms. belonged to Tulaja Mahārāja of Tanjore who reigned between 1765—87 A. D. The Ms. is good but the sheets are fully worm-eaten.

॥ तैत्तिरीयोपनिषद्भाष्यम् ॥

## 1491. TAITTIRĪYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 6321. Page 32 Right column. Substance—Paper. Size—8¾ × 5 inches. Sheets—7. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—100. Author—Śaṅkarācārya. Incomplete.

Beginning—Same as No. 1487.

End:

संहिताविषयमुपासनमुक्तं । तदनु मेधाकामस्य श्रीकामस्य चानुक्रान्ता मन्त्राः ॥

* * * *

तासामियं चतुर्थी व्याहृतीमह इति ; तामेतां चतुर्थीं महाचमसस्यापत्यं माहाचमस्यः प्रवेदयते, उ ह स्म इत्येतेषां वृत्तानुकथनार्थत्वाद्विदितवान्ददर्शेत्यर्थः । माहा.... ॥

Colophon: Nil.

Subject: Taittirīyopaniṣad bhāṣya. First Vallī (Śikṣā Vallī only).

Remarks:—This Ms. abruptly ends in the beginning of the commentary on the first Pañcādi of the fifth Anuvāka. The Ms. is good but the sheets are worm-eaten.

## ॥ तैत्तिरीयोपनिषद्भाष्यम् ॥

## 1492. TAITTIRĪYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 6329. Page 32. Right column. Substance—Paper. Size—10 × 4¼ inches. Sheets—21 (14-34). Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—660. Author—Śaṅkarācārya. Ānanda Vallī only.

Beginning:

'शन्नो मित्रो(त्रः)' -इत्याद्यतीतविद्याप्राप्त्युपसर्गप्रशमनार्था शान्तिः पठिता । इदानीं तु वक्ष्यमाणब्रह्मविद्याप्राप्त्युपसर्गोपशमार्था शान्तिः पठ्यते । [शं नो मित्रः] सह नाववत्विति [च] । सह नाववतु नौ शिष्याचार्यौ सहैवावतु रक्षतु सह नौ भुनक्तु (ब्रह्म) भोजयतु । सह वीर्यं विद्यानिमित्तं सामर्थ्यं करवावहै निर्वर्तयावहै ॥

End:

को य एवं वेद यथोक्तमद्वैतमानन्दं ब्रह्म वेद । तस्यात्मभावेन दृष्टे पुण्यपापे निर्वीर्ये अतापके जन्मा(न्तरा)रम्भके न भवतः । इतीयमेवं यथोक्ता अस्यां वल्ल्यां ब्रह्मविद्योपनिषत्, सर्वाभ्यो विद्याभ्यः परमरहस्यं दर्शितमित्यर्थः— परं श्रेयोऽस्यां निषण्णमिति ॥

Colophon:

इति समाप्ता(प्तं) आनन्दवल्लीभाष्य(म्) ॥

Subject: Taittirīyopaniṣad bhāṣya. (Ānanda Vallī) the second Vallī only. 1-9 Anuvākas.

**Remarks**:—This Ms. belonged to Tulaja Mahārāja of Tanjore between 1765—87 A. D. The Ms. is old and is in a fairly good condition.

---

## ॥ तैत्तिरीयोपनिषद्भाष्यम् ॥

## 1493. TAITTIRĪYOPANISAD BHĀSYAM.

Burnell's Catalogue No. 6313. Page 32. Right column. Substance—Paper. Size—$8\frac{1}{2} \times 6\frac{1}{2}$ inches. Sheets—12. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—170. Author—Śaṅkarācārya. Bhṛgu Vallī only.

Beginning:

**श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः । श्रीगुरुभ्यो नमः ।**

**सत्यं ज्ञानमनन्तं ब्रह्म आकाशादिकार्यमन्नमयान्तं सृष्ट्वा तदेवानुप्रविष्टं विशेषवदिवोपलभ्यमानं यस्मात्, तस्मात् सर्वकार्यविलक्षणम् अदृश्यादिधर्मकमेव आनन्दं तदेवाहमिति विजानीयात्, अनुप्रवेशस्य तदर्थत्वात् । तस्यैवं विजानतः शुभाशुभे कर्मणी जन्मान्तरारम्भके न भवतः इत्येवमानन्दवल्ल्यां विदितोऽर्थः परिसमाप्ता च ब्रह्मविद्या । ततः परं ब्रह्मविद्यासाधनं तपो वक्तव्यम् । अन्नादिविषयाणि चोपासनान्यनुक्तानीत्यत इदमारभ्यते ॥ आख्यायिका विद्यास्तुतये प्रियाय पुत्राय पित्रोक्तेति—'भृगुर्वै वारुणिः' ॥**

End :

**सुवर्ग(र्ण) ज्योतिः(तीः) सुवरादित्यः । नकार उपमार्थे । आदित्य इव सकृद्विभातमस्मदीयं ज्योतिः प्रकाश इत्यर्थः । इतीयं वल्लीद्वि(द्वयवि)हिता उपनिषत्परमात्मविज्ञानं । तामेतां यथोक्तामुपनिषदं शान्तो दान्त**

उपरतस्तितिक्षुः समाहितो भूत्वा भृगुवत्तपो महदास्थाय
य एवं वेद तस्येदं फलं यथोक्तमोक्ष इति ॥

Colophon :

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यश्रीशङ्कर-
भगवत्पूज्यपादकृतौ तैत्तिरीयोपनिषद्भाष्यं सम्पूर्णम् ॥

श्रीमद्गुरुभ्यो नमः ।

राक्षसेऽब्दे पुष्यमासे पञ्चम्यां रविवासरे
तस्मिन्दिने कृष्णपक्षे भृगुवल्लीसमाप्त... ।
यदक्षरपदभ्रष्टं मात्राहीनं तु यद्भवेत् ।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥

श्रीरस्तु ।

इदं पुस्तकं नृसिंहभट्टसूनुना वेङ्कटभट्टेन गोविन्दपण्डितपुत्राय
महादेवपण्डिताय लिखितम् ॥

Subject: Taittirīyopaniṣad bhāṣya. Third Valli—Bhṛgu Valli only. 1-10 Anuvākas.

Remarks :-- On the title page is given " तुलजामाहाराजस्य पुस्तकं '
i. e. the Ms. belonged to Tulaja Mahārāja of Tanjore who reigned between 1765—87 A. D. The Ms. is fully worm-eaten. The Ms. is dated Sunday—fifth day after the full Moon—in Puṣya Month in Rākṣasa year which exactly corresponds to Saka 1597 or 26th December 1675 A. D.

The scribe of this Ms. is known as Venkaṭa bhaṭṭa, son of Nṛsimha bhaṭṭa and the Ms. originally belonged to one Mahādeva paṇḍita, son of Govinda Paṇḍita.

---

## ॥ तैत्तिरीयोपनिषल्लघुदीपिका ॥

## 1494. TAITTIRĪYOPANIṢALLAGHUDĪPIKĀ.

Burnell's Catalogue No. 9753. Page 32. Right column.

Substance—Palm leaf. Size—16½ × 1½ inches. Leaves—48 (107-154). Lines—6 to a Page. Script—Telugu. No. of Granthas—1150. Author—?. Complete.

Beginning:

सीतापतिस्सर्वजगन्निदानं
बाह्योपघातानखिलान्निरस्य ।
बौद्धांश्च बुद्धिप्रतिबन्धका ये
बध्वा चिदानन्दमया(य)श्वरा(का)स्तु ॥

विश्ववन्द्यं विघ्नराजं सर्वशुक्लां सरस्वतीम् ।
पूर्वाचार्यान् सम्प्रपूज्यान् कुर्वे नतिपदं गुरून् ॥

कृष्णानन्दा(न्दः) पूर्णचन्द्रः क्षयवृद्धिविवर्जितः ।
निष्क्रियो निष्कलङ्कश्च जयत्यन्तस्तमोपहः ॥

विद्यारण्यं भजे हृद्यं सद्योऽविद्योत्थतापहम् ।
यत्सन्दर्शितमार्गेण गन्तुं मन्ददृशोऽप्यलम् ॥

श्रीरामं गुरुमानम्य सम्प्रदायानुसारतः ।
तैत्तिरीयोपनिषदस्तन्यते लघुदीपिका ॥

सेयं तैत्तिरीयोपनिषत्त्रिविधा — सांहिती वारुणी याज्ञिकी चेति । तत्र प्रथम(प्र)पाठके सांहिताख्यास्योक्तत्वात्तद्रूपोपनिषत्सांहिती । द्वितीयतृतीययोः प्रपाठकयोर्या ब्रह्मविद्याभिहिता तस्याः सम्प्रदायप्रवर्तको वरुण(ः) । तस्मादुभयरूपोपनिषद्वारुणी ॥

End:

तदा विदुष एव वाखिलं नेतरस्य । विदुषस्त्ववश्यं फलं भवत्येवेति द्विविधं (एवंविध)नियमार्थं । य एवं वेदे·

ति पुनराम्नातमनुवाकार्थमुपसंहरति— उपनिषदिति ।
'भृगुर्वै वारुणि'रित्यारभ्य 'य एवं वेदे'त्यन्तेन ग्रन्थेन प्रतिपादिता येयं ब्रह्मविद्या सेयमितिशब्देन परामृश्यते । सैवोपनिषच्छब्दवाच्या उपनिषण्णमस्यां श्रियत इत्याद्यवयवार्थस्य विद्यायामेव सम्भवादुपनिषदं भो ब्रूहीत्यादिवैदिकप्रयोगदृष्टेश्च । क्वचिद्ग्रन्थे तत्प्रयोगस्तु लाङ्गलं जीवनमित्यादिवद्गौणः । एषा उपनिषत्समाप्तेति वाक्यशेषः ।

विद्यारण्यकृतव्याख्यादुग्धाब्धिं पातुमक्षमाः ।
एतस्मादुद्धृतं सारं तृप्तिदं ते पिबन्त्वमुम् ॥
रविवंशार्णवोद्भूतश्रीरामाभिधसन्मणिः ।
कृत्यानया प्रसन्नस्स हार्दं हरतु मे तमः ॥

**Colophon:**

इति श्री वारुण्युपनिषदि लघुदीपिकायां भृगुवल्ल्याख्यस्तृतीयो(ऽ)नुवाकः ॥
वारुण्युपनिषत्संपूर्णम्(र्णा) । ॐतत्सत् ।
श्रीसाम्बशिवाय नमः । श्रीरामार्पणमस्तु ।
श्रीगुरुभ्यो नमः । श्रीरामचन्द्रसहायम् ॥

Subject: Taittirīyopaniṣallaghudīpikā—a commentary on this Upaniṣad, according to the Advaita school of philosophy. 1-3 Vallīs.

Remarks:—The Ms. is in good condition. For the other works contained in this Ms. see the list under Remarks on No. 1441. The author of this commentary is described as a disciple of Kṛṣṇānanda and Śrī Rāma. But his exact name is not known. His commentary is based on that of Vidyāraṇya. See the introductory and concluding verses given above.

## ॥ तैत्तिरीयोपनिषद्भाष्यटीका ॥

## 1495. TAITTIRĪYOPANIṢAD BHĀṢYAṬĪKĀ.

Burnell's Catalogue No. 9742. Page 32. Right column.
Substance—Palm leaf. Size—16¼×1¼ inches. Leaves—38. Lines—6 to a Page. Script—Grantha. No. of Granthas—600. Author—Ānandagiri. Complete.

Beginning:

यत्प्रकाशसुखाभिन्नं यन्मन्त्रेण प्रदर्शितम् ।
विवृतं ब्राह्मणे तस्मामदृश्यं ब्रह्म निर्भयम् ॥

यजुर्वेदशाखाभेदतैत्तिरीयकोपनिषदं व्याचिख्यासुर्भगवान् भाष्यकारस्तत्प्रतिपाद्यं ब्रह्म जगज्जन्मादिकारणत्वेन तटस्थलक्षणेन मन्दमतीन् प्रति सामान्येनोपलक्षितसत्यज्ञानादिना च स्वरूपलक्षणेन विशेषणतो विनिश्चितं नमस्कारछलेन संक्षेपतो दर्शयति— यस्माज्जातमिति । निमित्तोपादानत्वयोः पञ्चम्याः साधारण्यादुभयमपि कारणत्वमिह विवक्षितम् । कार्यविलयस्य प्रकृतावेव नियतत्वाद्विशेषतः प्रकृतित्वमाह— यस्मिन्नेवेति ।

End:

इदानीं वल्लीसमाप्तिपर्यन्तस्य ग्रन्थस्य तात्पर्यं वृत्तसङ्कीर्तनेनाह— सत्यं ज्ञानमित्यादिना । अविद्यालेशवशेन द्वैताभासमनुभवन्विद्वान् सर्वस्यात्माहमिति मन्यमानोऽणिमाद्यैश्वर्यभुजां योगिनां यत्कामाप्तत्वं कामरूपत्वं च तत् ममैवेति पश्यन् युगपत्सर्वान् विषयानन्दानश्नुत इत्युच्यत इत्याह— सर्वात्मत्वा(त्वोप)पत्तेरिति । प्रथमजो हिरण्यगर्भोऽप्यहम् । प्रुतिस्तावद्वानार्था । देवेभ्यश्च

व्यष्टिरूपेभ्यः पूर्वं विराड्रूपमहमेवेत्यर्थः । अत्रेति लोण्म-
ध्यमैकवचनम् । पौनः पुन्येन सर्वाख्यातेषु निपात्यत
इति अवतीति व्याख्यातम् । अस्मि भवामि । उपसंह-
रामीत्यर्थः । ऐश्वरात्मताज्ञानेन वाहंबाधे द्वैतं ततो नास्ति
भयकारणमित्यर्थः ॥

तैत्तिरीयकभाष्यस्य शाङ्करस्य द्रढीयसः ।
स्फुटावबोधकामेभ्यो निरमायि सुदर्पणम् ॥

Colophon: Nil.

शुभमस्तु । हरिः ॐ । श्रीमद्गुरुनृसिंहाय नमः ॥
असङ्गः सच्चिदानन्दस्वप्रभोऽदेहसाक्ष्यहम् ।
सत्यं ज्ञानानन्दसद्ब्रह्मास्मि शुद्धाणुमुक्तकम् ॥

Subject: Taittirīyopaniṣad bhāṣyaṭīkā, a gloss on the Bhāṣya of this Upaniṣad, according to the Advaita school of Philosophy. 1—3 Vallīs.

Remarks:—The Ms. is in good condition, though the leaves are a bit worm-eaten.

---

## ॥ तैत्तिरीयोपनिषद्भाष्यटीका ॥

## 1496. TAITTIRĪYOPANIṢAD BHĀṢYAṬĪKĀ.

Burnell's Catalogue No. 9744 a. Page 32. Right column.
Substance—Palm leaf. Size—$18\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves—5 (1-5). Lines—17 to 19 to a Page. Script—Telugu. No. of Granthas—600. Author—Ānandagiri. Complete.

Beginning, end and subject—Same as No. 1495.

Colophon: Nil.

बोधज्ञानेन्द्रयोगीन्द्रपादपद्मरजोरविः ।
राजते मे हृदाकाशे तमोध्वान्तनिवर्तकः ॥

Remarks:—The other work contained in this Ms, is 'तैत्तिरीयोपनिषद्भाष्यवार्तिकटीका ॥' The Ms. is in good condition.

## ॥ तैत्तिरीयोपनिषद्भाष्यटीका ॥

## 1497. TAITTIRĪYOPANIṢADBHĀṢYAṬĪKĀ.

N. S. Collection No. 83. Substance—Palm leaf. Size—15¾ × 1½ inches. Leaves—24 (39—62). Lines—7 to a Page. Script—Grantha. No. of Granthas—600. Author—Ānandagiri. Complete.

Beginning, end and subject—Same as No. 1495.

Colophon: Nil.

हरिः ओं श्रीगुरुभ्यो नमः ॥

मायूरक्षेत्रनिकटे क्षेत्रपालपुराभिधे ।
अग्रहारे महत्यासीत्कौशिकान्वयसम्भवः ॥
ख्यातः श्रीवैद्यनाथार्यः तस्य सत्यपरायणः ।
सुतः पञ्चनदार्योऽभूच्छिवपूजारतस्सुधीः ॥
तत्सूनोर्नीलकण्ठस्य सर्वशास्त्रार्थवेदिनः ।
तैत्तिरीयकभाष्यस्य टीकेयं पाल्यतां मुदा ॥

Remarks:— The Ms. is old and is in a fairly good condition, though the leaves are here and there worn out. According to the verses given in the colophon, this Ms. belonged to Nīlakaṇṭha Śāstri, son of Pañcanadārya, grandson of Vaidyanāthārya of Kauśika gotra in the Kṣetrapālapura village near Māyavaram in Tanjore Dt.

## ॥ तैत्तिरीयोपनिषद्भाष्यवार्तिकम् ॥

## 1498. TAITTIRĪYOPANIṢAD BHĀṢYA VĀRTIKAM.

Burnell's Catalogue No. 6311. Page 32. Right column.

Substance—Paper. Size—11¾×4 inches. Sheets—25. Lines—12 to 14 to a Page. Script—Devanāgarī. No. of Granthas—1050. Author—Sureśvarācārya. Complete.

Beginning:

सुरेश्वरं गुरुं नत्वा वार्तिकं ज्ञानदायकम् ।
लिखाम्यतिप्रयत्नेन प्रसादाद्गुरुरीश(साम्ब)योः ॥

सत्यं ज्ञानमनन्तमेकसकलं ध्वस्तान्धकारं परं
निर्द्वैतं हृदि पद्ममध्यनिलयं निश्शेषधीसाक्षिणम् ।
वेदान्तोपनिविष्टबोधविषयं प्रत्यक्तया योगिनां
भक्त्या तं प्रणिपत्य वेदशिरसो वक्ष्यामि सद्वार्तिकम् ॥

यस्येदं सकलामलेन्दुकिरणप्रख्यैर्यशोरश्मिभि-
र्व्याप्तं यश्च कृपालुतापरवशश्चक्रे हितं दुःखिनाम् ।
यद्वाणीकुलिशाभिरुग्णमतयः पेतुर्दिशस्तार्किकाः
भक्त्या पूज्यतमं प्रणम्य तमहं तद्भाष्यनीतौ यते ॥ २ ॥

तैत्तिरीयकसारस्य मयाचार्यप्रसादतः ।
विस्पष्टार्थरुचीनां हि व्याख्येयं सम्प्रणीयते ॥ ३ ॥

दुरितक्षयहेतूनि नित्यानि ब्राह्मणे जगुः ।
काम्यानि चेह कर्माणि दृष्टादृष्टफलानि तु ॥ ४ ॥

विद्या प्रस्तूयतेऽतो(चो)र्ध्वं यथा भूतार्थबोधिनी ।
कर्मोपादानहेतूंस्तान्सैवोच्छेत्तुमलं यतः ॥ ५ ॥

स यथाकाम इत्येवं यो कामश्चेति सादरम् ।
कामाकामैकहेतू नो बन्धमोक्षौ श्रुतिर्जगौ ॥ ६ ॥

End:

यो मां ददाति पात्रेभ्यो देशकालसमन्वितम् ।
दददित्थमसावन्नं माममत्त्येव सर्वदा ॥

सत्यज्ञानादिरूपोऽहमविद्योत्थमशेषतः ।
अहं ह्यभिभवाम्येको दिनकृच्छार्वरं यथा ॥ ८८ ॥
ध्यानैकताननिबिडाहितचेतसोऽयं
प्रध्वस्तकृत्स्ननिजमोहसमस्तदोषम् ।
प्रत्यक्तया शुभधियो यतयोऽभ्युपेत्य
यं देवमेकममलं प्रविशन्ति सोऽव्यात् ॥ ८९ ॥
तैत्तिरीयकसारस्य वार्तिकामृतमुत्तमम् ।
मस्करीन्द्रप्रणीतस्य भाष्यस्यैतद्विवेचनम् ॥ ९० ॥
मुमुक्षुसार्थवाहस्य भवनामधृतो यतेः ।
शिष्यश्चकार तद्भक्त्या सुरेशाख्यो महार्थवित् ॥ ९१ ॥

Colophon:

(sheet No. 23.) इति श्रीमत्परमहंसपरिव्राजकश्रीमच्छङ्करभगवत्पादपूज्यशिष्यस्य श्रीमत्सुरेश्वराचार्यभगवतः कृतौ तैत्तिरीयवार्तिकं द्वितीयवल्ल्याः समाप्तम् ॥

(sheet No. 25.) तैत्तिरीयवार्तिकं समाप्तम् ॥

यस्याज्ञानवशात्स्वरूपमलभद्द्वन्द्वेऽरविन्दाननं
तं सत्यादिपदोपलक्षितशिवं कैवल्यसंस्थं मुहुः ।
विश्वं यस्य कृपाकटाक्षजनितज्ञानेन नष्टं पुनः
स्वार्थाङ्काङ्कितशक्तिमुत्तममहं भक्त्या प्रवन्दे गुरुम् ॥

Subject: Taittirīyopaniṣad bhāṣya Vārtika. 1-1026 verses. (Vallī I. 186. Vallī II. 749. Vallī III. 91).

Remarks:—On the title page is given— 'हे पुस्तक श्रीमन्त राजेश्री शरभोजी महाराज साहेबयांच्या कारकर्तीत काशीदेशाहून खरिदीकरून आणिले असें' ॥ i. e. this Ms. is brought down to Tanjore with the benevolent patronage and help of Srī Sarabhoji Mahārāja of Tanjore who reigned between 1800-1832 A. D. The Ms. is in good condition. The first verse given in the beginning might be the scribe's own..

## ॥ तैत्तिरीयोपनिषद्भाष्यवार्तिकम् ॥

## 1499. TAITTIRĪYOPANIṢAD BHĀṢYA VĀRTIKAM.

Burnell's Catalogue No. 9745. Page. 32. Right column.
Substance—Palm leaf. Size—$16\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves—42. Lines—6 to a Page. Script—Telugu. No. of Granthas—1050. Author—Sureśvarācārya. Complete.

Beginning, end, colophon and subject—Same as No. 1498.

Remarks :—The Ms. is very old and is in a fairly good condition.

---

## ॥ तैत्तिरीयोपनिषद्भाष्यवार्त्तिकम् ॥

## 1500. TAITTIRĪYOPANIṢAD BHĀṢYA VĀRTIKAM.

Burnell's Catalogue No. 9875 a. Page 32. Right column.
Substance—Palm leaf. Size—$18\frac{3}{4} \times 1\frac{3}{4}$ inches. Leaves—9 (1-9). Lines—20 to a Page. Script—Telugu. No. of Granthas—1050. Author—Sureśvarācārya. Complete.

Beginning :

बोधज्ञानेन्द्रयोगीन्द्रपदपद्मरजोरविः ।
भ्राजते मे हृदाकाशे तमोध्वान्तनिवर्तकः ॥
सत्यज्ञानमनन्त० Same as No. 1498.

End, colophon and subject—Same as No. 1498.

Remarks:—The other work contained in this Ms. is a fragment of
बृहदारण्यकोपनिषद्भाष्यटीका— Adhyāya IV. Brahmaṇa III.

The Ms. is in a fairly good condition. Dr. Burnell groups this Ms. among Taittirīyopaniṣads. Evidently this Ms. contains the Sureśvara Vārtika on Taittirīyopaniṣad bhāṣya.

## ॥ तैत्तिरीयोपनिषद्भाष्यवार्तिकटीका ॥

## 1501. TAITTIRĪYOPANIṢAD BHĀṢYA VĀRTIKAṬĪKĀ.

Burnell's Catalogue No. 6310. Page 32. Right column.

Substance—Paper. Size—11¾ × 4 inches. Sheets—64. Lines—12 or 13 to a Page. Script—Devanāgarī. No. of Granthas—3300. Author—Ānandagñāna (Ānandagiri). Complete.

Beginning:

न यत्र स्थेमानं दधुरतिभयोद्भ्रान्तनयना
गलद्दानोद्रेकभ्रमदलिकदम्बाः करटिनः ।
लुठन्मुक्ताभारे भवति परदेशं गतवति
हरेरद्य द्वारे शिवशिवशिवानां कलकलः ॥
कृष्णाय सच्चिदानन्दतनवे परमात्मने ।
नमो विधीयते त्रेधा गुरवे च तदात्मने ॥ १ ॥
गुरुभक्ती पुरस्कृत्य सम्प्रदायानुसारतः ।
व्याख्यास्येऽहं यथाशक्ति तैत्तिरीयकवार्तिकम् ॥ २ ॥

तैत्तिरीयकशाखोपनिषदस्तद्भाष्यस्य च वार्तिकमुक्तानुक्तदुरुक्तचिन्तात्मकं चिकीर्षुराचार्यश्चिकीर्षितस्य वार्तिकस्याविघ्नपरिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय शास्त्रीयवस्तुतत्त्वानुस्मरणपूर्वकं तन्नमस्काररूपं मङ्गलाचरणं मुखतः सम्पादयन्नर्थादपेक्षितमनुबन्धजातं च सूचयन्नुद्देश्यस्यैकदेशं प्रतिजानीते— सत्यमित्यादिना । तं प्रकृतं परमात्मानं प्रत्यञ्चं भक्तिश्रद्धाभ्यां प्रकर्षेण त्रिधा नत्वा वेदशिरसस्तैत्तिरीयकोपनिषदस्सदबाधितन्यायसन्दृब्धं दुरुक्तादिचिन्तात्मकं वार्तिकं वक्ष्यामीति सम्बन्धः ॥

End:

भक्तिमात्रेण कृतस्य वार्तिकस्य ग्रन्थविद्भिरुपादेयत्वं, तत्राह—महार्थविदिति । महान्तं बहुप्रकारमबाधितश्चार्थं

वेत्तीति तथोच्यते। तथा च तेन प्रणीतमिदं वार्त्तिकामृतं वृद्धैः श्रद्धेयमेवेत्यर्थः ॥

परापरं गुरुं नत्वा सम्प्रदायानुसारतः ।
व्याकृतं सङ्ग्रहेणैव तैत्तिरीयकवार्तिकम् ॥
सा चेयं व्याक्रिया प्रीतिं भगवत्येव कुर्वती ।
चिराय वर्ततां कृष्णे तृष्णां त्यक्त्वान्यगामिनीम् ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीशुद्धानन्द-
पूज्यपादशिष्यस्य भगवदानन्दज्ञानस्य
विरचिता तैत्तिरीयवार्तिकटीका
समाप्ता ॥

श्रीसदाशिवार्पणमस्तु ॥

Subject: Taittirīyopaniṣad bhāṣya Vārtika Ṭīkā—a commentary on Sureśvara Vārtika on Taittirīyopaniṣad bhāṣya.

Remarks:—On the title Page is given—हे पुस्तक श्रीमन्त राजेश्री शरभोजी महाराजसाहेब यांच्या करतींत काशीदेशाहून खरदीकरून आणिले असें ॥ i.e. the Ms. was brought down to Tanjore from Benares with the benevolent patronage and help of Śarabhoji Mahārāja of Tanjore between 1800—1832 A. D. The Ms. is in good condition. The author of this work is Ānandajñāna, popularly known as Ānandagiri, the disciple of Śuddhānanda Pūjyapāda. The first verse given in the beginning might be the scribe's own.

## ॥ तैत्तिरीयोपनिषद्भाष्यवार्तिकटीका ॥

## 1502. TAITTIRĪYOPANIṢAD BHĀṢYA VĀRTIKA ṬĪKĀ.

Burnell's Catalogue No. 9743. Page 32. Right column.
Substance—Palm leaf. Size—$16\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—

103 (43-145). Lines—6 to a Page. Script—Telugu. No. of Granthas—3300. Author—Ānandagñāna. Complete.

Beginning:

गोविन्दानन्दसरस्वतीभ्यो नमः ॥

कृष्णाय सच्चिदानन्दतनवे परमात्मने ॥ ०

Same as No. 1501.

End, colophon and subject—Same as No. 1501.

Remarks:—The Ms. is in good condition.

---

## ॥ तैत्तिरीयोपनिषद्भाष्यवार्तिकटीका ॥

## 1503. TAITTIRĪYOPANIṢAD BHĀṢYA VĀRTIKA ṬĪKĀ.

Burnell's Catalogue No. 9744 b. Substance—Palm leaf. Size—18½×1¼ inches. Leaves—21 (215-235). Lines—16 to a Page. Script—Telugu. No. of Granthas—3300. Author—Ānandagñana (Ānandagirī). Complete.

Beginning, end, and subject—Same as No. 1501.

Colophon:

इति श्रीमत् + वार्तिकटीका समाप्ता ॥

बोधज्ञानेन्द्रयोगीन्द्रपदपद्मरजोरविः ।

भ्राजते मे हृदाकाशे तमोध्वान्तनिवर्तकः ॥

Remarks:—The Ms. is in good condition. The other work contained in this Ms. is "तैत्तिरीयभाष्यटीका ॥" This work is not, however, noticed by Dr. Burnell under this Ms.

## ॥ नारायणोपनिषद्भाष्यम् ॥

## 1504. NĀRĀYAṆOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 9748 a. Page 33. Left column. Substance—Palm leaf. Size—16×1¼ inches. Leaves—21 (1-21). Lines—6 to a Page. Script—Grantha. No. of Granthas—1500. Author—Mādhavācārya. Complete.

Beginning :

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
वारुणोपनिषद्युक्ता ब्रह्मविद्या ससाधना ।
याज्ञिक्यां खिलरूपायां सर्वशेषोऽभिधीयते ॥

यथा बृहदारण्यके सप्तमाष्टमाध्यायौ खिलकाण्डत्वेनाचार्यैरुदाहृतौ। तथेदं(यं) नारायणीयाख्या याज्ञिक्युपनिषत् खिलकाण्डरूपा । तल्लक्षणोपेतत्वात्कर्मोपासनब्रह्मकाण्डेषु त्रिष्वपि यदुक्तव्यमवशिष्टं तस्य सर्वस्याभिधानेन प्रकीर्णकरूपत्वं खिलत्वम् । बृहदारण्यके सप्तमाध्याये 'पूर्णमदः पूर्णमिद'मित्यादिना ब्रह्मतत्वमभिहितम् । 'ॐ खं ब्रह्मे'त्यादिभिरष्टमाध्यायगतैश्च 'यो ह वै ज्येष्ठं च श्रेष्ठं च वेदे'त्यादिभिर्वाक्यैर्नानाविधान्युपासनान्यभिहितानि । 'स यः कामयेत महत्प्राप्नुया'मित्यादिना महदाख्यं कर्माभिहितम् । तथा पुत्रविशेषादिकामनायुक्तानां तत्तत्कर्माण्यभिहितान्येव । एवमत्रा'प्यम्भस्य पार' इत्यादिना ब्रह्मतत्वमभिहितं। 'आदित्यो वा एष एतन्मण्डल'मित्यादिना उपासनमभिहितं। 'भूरग्नये पृथिवी स्वाहे'त्यादिना कर्माण्यभिहितानि । तत्र कर्मणां बाहुल्याद्याज्ञिकीत्युच्यते । उपक्रमे ब्रह्मतत्वाभिधानादुपसंहारे च ब्रह्मज्ञानसाधनानां सत्यादीनां सन्यासान्तानामभिधानात् उपनिषदित्युच्यते । तदीयपाठसम्प्रदायस्तु देशविशेषेषु बहुविध उपलभ्यते ।

तत्र यद्यपि शाखाभेदः कारणम्। तथापि तैत्तिरीयशाखा- व्यापकैस्तत्तद्देशनिवासिभिः शिष्टैरादृतस्तत्सर्वोऽपि पाठ उपादेय एव। तत्र द्रमिडानां चतुःषष्ट्यनुवाकपाठः, आन्ध्राणामशीत्यनुवाकपाठः, कर्णाटकेषु केषाञ्चित् चतुःसप्ततिपाठः, अपरेषां नवाशीतिपाठः। अत्र वयं पाठान्तरं यथासम्भवं सूचयन्तः चतुःषष्ट्यनुवाकपाठं प्राधान्येन व्याख्यास्यामः। प्रथमानुवाकस्यादौ काश्चिदृचो ब्रह्मतत्त्वं प्रतिपादयन्ति, तासु प्रथमामृचमाह— अंभस्य पारे + अन्तरिति ॥

End:

अपि च तैत्तिरीयाणामुपासनमिदं; किं तर्हि ब्रह्मविद्या; प्रशंसा। 'तस्यैवं विदुष' इति ब्रह्मविदो(ऽ)नुकर्षणात् तस्मान्न विद्यैक्यशङ्काया अप्यवकाशोऽस्ति। कर्ममुक्तिस्त्वेतस्मिन्ननुवाके तत्त्वज्ञानिसेवानिमित्ताभिवारणत्वशेषमिति मन्तव्यम् ॥

Colophon:

इति श्रीमाधवीये वेदार्थप्रकाशे यजुरारण्यके नारायणीयापर- नामधेययुक्तायां याज्ञिक्यामुपनिषदि चतुःषष्टि- तमोऽनुवाकः ॥

इति यजुरारण्यके षष्ठप्रश्नव्याख्यानं संपूर्णम् ॥

सपरिवाराय श्रीरामचन्द्राय नमः ॥ श्रीगुरुभ्यो नमः ॥

Subject: Nārāyaṇopaniṣad bhāṣya, according to the Advaita system of Philosophy.

Remarks:—The other work contained herein is ज्ञानाङ्कुशः ॥ The Ms. is old and is in a fairly good condition. The letters are too small but are legible.

## ॥ नारायणोपनिषद्विवरणम् ॥

## 1505. NĀRĀYAṆOPANIṢAD VIVARAṆAM.

Burnell's Catalogue No. 9709 gg (2). Page 33. Left column. Substance—Palm leaf. Size—17¼×1 inches. Leaves—98 (141-238). Lines—7 to a Page. Script—Grantha. No. of Granthas—2500. Author—Vijñānātman. Complete.

Beginning :

सरस्वतीं गणाध्यक्षं वेदव्यासं मुनीश्वरम् ।
शङ्कराचार्यवर्यं च प्रणमामि सदाऽदरात् ॥
योगिनां योगरूपाय ज्ञानिनां ज्ञानमूर्तये ।
मुक्तानां मोक्षरूपाय दक्षिणामूर्तये नमः ।
प्रमाणन्यायनखरैः प्रतिवादीभभेदिने ॥
ज्ञानोत्तममृगेन्द्राय नमो वेदादिवारिणे ।

श्रियः पतिं श्रियं वाण्याः पतिं वाणीं शिवं शिवान् ।
प्रणम्य याज्ञिकं वेदशिरो व्याख्यायते मया ॥

कैश्चिद्विपश्चिद्भिरुदारसत्वैरिदं पुरा व्याकृतमप्युदारम् ।
तत्पक्षपाताकुलितं विलोक्य समं विधातुं क्रियते प्रयत्नः ॥

वेदाध्ययनदाराग्न्याधेयपूर्विकाः सर्वाः क्रियाः समाप्य वेदो ब्रह्मात्मैकत्वविद्यामुपनिषद्भागेन वक्तुं प्रक्रमते । तत्रोपनिषदस्त्रिविधाः सांहितिक्यो वारुण्यो याज्ञिक्यश्चेति । तत्र सांहितिक्यो वारुण्यश्च गताः । तत्र सांहितिक्योपनिषत्सु सगुणब्रह्मप्राप्तिरुपादिष्टा ; वारुणीषूपनिषत्सु 'ब्रह्मविदाप्नोति पर'मित्यारभ्य केवलब्रह्मात्मैकत्वज्ञानमुपदिष्टम् इदानींससन्यासं तदेव ज्ञानं प्रतिपादयितुं

याज्ञिक्यः प्रवर्तन्ते। नारायणाख्योयं समस्तः प्रश्नः याज्ञिक्यो(क्यु)पनिषदित्युच्यते। यज्ञात्मना भगवता नारायणेन दृष्टत्वात्। ॐ अम्भस्य पारे इति॥

End:

विद्वान् ब्राह्मणोऽभिजयति। आभिमुख्येनात्मत्वेन प्राप्नोति। स्वानन्दज्ञानादिलेशत्वात् तयोरानन्दातिमहिम्नोरतसत्य(स्त्य)क्तौ स्वात्मन्येव पश्यति। एतस्यैवानन्दस्यान्यानि भूतानि (मात्रामुपजीवन्ति) तमेव भान्तमनुभाति सर्वं। वामनीर्भामनीस्सोऽश्नुते सर्वान् कामान् स जयति।

'यद्यद्विभूतिमत्सत्त्वं यच्चदूर्जितमेव वा।
तत्तदेवे(वा)वगच्छ त्वं मम तेजोंशसंभवम्॥

यावानर्थ उदपाने' इत्यादिश्रुतिस्मृतिभ्यः॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमत् ज्ञानोत्तमपूज्यपादशिष्यस्य विज्ञानात्मभगवतः कृतौ नारायणाख्यप्रश्नयाज्ञिक्युपनिषद्विवरणे एकादशानुवाकः॥

वासुदेवेन्द्रसरस्वतीप्रियशिष्य श्रीमद्देवेन्द्रसरस्वतीचरण...... ॥

Subject: Nārāyaṇopaniṣad Vivaraṇa—a commentary on Nārāyaṇopaniṣad, belonging to the Advaita system of Philosophy.

Remarks:—For the other works contained herein see the list under Remarks on No. 903. The Ms. is very old and is in a fairly good condition, though the leaves are a bit worm-eaten.

The second colophon given above might be the scribe's own and according to that, the scribe's name is Devendra Sarasvatī, pupil to Vāsudevendra Sarasvatī.

## ॥ नारायणोपनिषद्विवरणम् ॥

## 1506. NĀRĀYAṆOPANIṢAD VIVARAṆAM.

Burnell's Catalogue No. 9746. Page 33. Left column. Substance—Palm leaf. Size—18×1½ inches. Leaves—85. Lines—6 to a Page. Script—Telugu. No. of Granthas—2500. Author—Vigñānātman. Complete.

Beginning and subject—Same as No. 1505.

Colophon : Nil.

हरिः ॐ । शुभमस्तु ॥

Remarks :—The Ms. is in a fairly good condition.

---

## ॥ नारायणोपनिषद्विवरणम् ॥

## 1507. NĀRĀYAṆOPANIṢAD VIVARAṆAM.

Burnell's Catalogue No. 9747. Page 33. Left column. Substance—Palm leaf. Size—16¼×1 inches. Leaves—124. Lines—6 to a Page. Script—Grantha. No. of Granthas—2500. Author—Vigñānātman. Complete.

Beginning, end, and subject—Same as No. 1505.

Colophon: Nil.

हरिः ॐ शुभमस्तु ।

ப்ரஜோத்பத்தி,..யது வாத்ரு அதாவெஷ்டியன் கிலி,

श्रीमहागणपतये नमः ।

Remarks :—The Ms. is old and is in a worn-out condition.

## ॥ नारायणोपनिषद्दीपिका ॥

## 1508. NĀRĀYAṆOPANIṢAD DĪPIKĀ.

Burnell's Catalogue No. 9854. Page 33. Left column. Substance—Palm leaf. Size—19¼×3¼ inches. Leaves—2

(68 & 69). Lines—11 to a Page. Script—Telugu. No. of Granthas—100. Author—Śaṅkarānanda. Complete.

Beginning:

नारायणोपनिषदं भेदपर्वतभेदिनीम् ।
व्याख्यास्ये ब्रह्मविद्याया जननीं पापहारिणीम् ॥

सम्बन्धो विषयस्तद्वदधिकारी प्रयोजनम् ।
सर्वोपनिषदां तुल्यं तस्मान्नात्रोच्यते पृथक् ॥

पुरुषः परिपूर्णदेशकालवस्तुपरिच्छेदशून्य इत्यर्थः । ना प्रसिद्धः सर्वासूपनिषत्सु । वै स्मर्यमाणः । नारायणः । आपो नाराः ताः अयनं आयतनं यस्य स नारायणः । अथवा नराः प्रतिबिम्बकल्पाः तेऽयनमात्मत्वेनाश्रयो यस्य स नरायणः नरायण एव नारायणः । अथवा नरा विक्षिप्तचित्ताः तेषामयनं आश्रयो विद्या नरायणं तस्य अयनमाश्रयत्वेन च सम्बन्धान्नारायणः ॥

End:

यः प्रजाशून्यः स्यादित्याशङ्क्य नेत्याह । प्राजापत्यं प्रजापतेः सन्तानवतो गृहस्थस्य भावः प्राजापत्यं तत् । न केवलमेवमेनं लोकं विन्दते किन्तु परमपीत्याह । ततः कीर्तिसुवर्णगोप्रजायाः प्राप्त्यनन्तरं जीवन् मृतो वा अमृतत्वं ब्रह्मज्ञानं तत्साध्यं फलं अश्नुते । प्राप्नोति । ततोऽमृतत्वमश्नुते । व्याख्यातम् । अभ्यास उपनिषत्समाप्त्यर्थः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्य-श्रीमच्छङ्करानन्दभगवतः कृतौ नारायणोपनिषद्दीपिकायां द्वितीयोऽध्यायः ॥

Subject: Nārāyaṇopaniṣad dīpikā—a gloss on this Upaniṣad according to the Advaita system of Philosophy. This Ms. contains the commentary on the first three sections of this Upaniṣad, which is here divided into two Adhyāyas as given in the colophon.

Remarks :—For the other works contained in this Ms. see the list under remarks on No. 1428. The Ms. is in good condition.

## ॥ नृसिंह्मतापनियोपनिषद्भाष्यम् ॥

## 1509. NRSIHMATĀPANĪYOPANISAD BHĀSYAM.

Burnell's Catalogue No. 6316. Page 33. Left column.
Substance—Paper. Size—$9\frac{1}{2} \times 3\frac{7}{8}$ inches. Sheets—62. Lines — 10 to a Page. Script—Devanāgarī. No. of Granthas —1350. Author—Śaṅkarācārya. Pūrvatāpanīya only.

Beginning :

वेदव्यासाय नमः ॥

श्री नृसिंहाय नमः ॥

ॐ यन्नाम्नोपनिषद्भाजा(त्त्व्याता)त्तपनं तं विधे(धुं)र्गुरुम् ।
प्रणम्योपासनागर्भां तद्व्याख्यां श्रद्धयाऽरभे ॥ १ ॥

आब्रुह्मस्तम्बपर्यन्तं यस्मान्नारसिंहादिदं जगत् ।
जातं यस्मिन्स्थितं लीनं नमस्तस्मै त्रिशक्तये ॥

'भद्रं कर्णेभिः शृणुयाम देवा' इति मन्त्रगतभद्रपद-
व्याख्यानपरामृचमुदितां शान्तिं पठन्नन्याभ्यः श्रौतस्मार्त-
पौराणिककल्पप्रतिपादिताभ्यः साकारब्रह्मविद्याभ्य इयं
सुभद्रेति दर्शयति । भद्रं कल्याणम् । कर्णेभिरिति छा-
न्दसम् ।

End :

तस्य गन्तव्यतामाह— तद्विप्रास इति । तच्चाहशं

स्थानं विप्रासो विप्राः ब्राह्मणाः उपासकाः विपन्यवो मेधाविनः समाधौ धारणशक्तियुक्ताः जागृवांसः जागरितावस्थायामेवावस्थात्रयात् प्रच्युत्य समिन्धते समृद्धिं कुर्वन्ति। तादात्म्यपक्षे तु मन्त्रब्राह्मणयोर्यथास्वरूपं व्याख्येयम्। इति शब्दो मन्त्रसमाप्तिं द्योतयति। पदचतुष्टयाभ्यासः सर्वोपनिषत्समाप्तिं द्योतयति। इति सर्वं निर्मलं सिद्धम्। श्रीलक्ष्मीनृसिंहाय नमः ॥

Colophon :

इति श्रीगोविन्दभगवत्पादपूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशङ्करभगवतः कृतावाथर्वणतापनीयोपनिषद्भाष्ये पञ्चमोपनिषद्भाष्यं समाप्तम् ॥

श्रीलक्ष्मीनृसिंहाय नमः ॥ शुभमस्तु ।

श्रीरस्तु । श्रीमन्नारायणः ।

Subject : Nṛsiḥmatāpanīyopaniṣad bhāṣya. Pūrvatāpanīya. 1—5 Upaniṣads.

Remarks :— The Ms. is in good condition.

## ॥ नृसिंहतापनियोपनिषद्दीपिका ॥

## 1510. NṚSIḤMATĀPANĪYOPANIṢAD DĪPIKĀ.

Burnell's Catalogue No. 9758 a & b. Page 33. Right column. Substance—Palm leaf. Size—13¾ × 1½ inches. Leaves—46. Lines—5 to a Page. Script—Telugu. No. of Granthas—700. Author—Śaṅkarānanda. Uttaratāpanīya—incomplete.

Beginning :

एवमुपदिष्टात्मतत्त्वादेवावाङ्मनसातीतमात्मानं कथमस्मानुपदिशत्ययं च कथं च वयमधिगच्छाम इति मन्वानाः

पुनः पृष्टवन्त इति स्वकीयमौत्सुक्योक्तिं परिसमाप्य पुनर्देवप्रश्नमवतारयति । देवा ह वै प्रजापतिमब्रुवन् । व्याख्यातम् । भूय एव पुनरेव । नः अस्मान् । वाङ्मनसातीतं वस्तु कथं भवानुपादिशति । कथं च वयमधिगच्छाम इति संशयाविष्टहृदयानित्यर्थः ॥

End :

अद्वयं द्वयशून्यम् । तर्हि किमत्रैव पर्यवसानमित्याशङ्क्य नेत्याह । लब्ध्वा । साक्षात्कृत्य । उपद्रष्टारम् । तुरीय तुरीयमविकल्पं वाङ्मनसातीतम् । अवगतभेदवासनो निरिन्धनाग्निवत् । समन्ताद्गच्छेत् ।

Colophon :

इति नवमः खण्डः ।

उक्ता मयैषोत्तरतापनीय-
व्याख्याक्षराणां पदवाक्यगानाम् ।
येन प्रसिद्धोपनिषत्पदानां
पुरा कृता वेदचतुष्टयेऽपि ॥

प्रायोऽल्पकालो भुवि देहभाजां
विद्यार्थिनां बुद्धिविशुद्धिरल्पा ।
तत्रापि केषाञ्चिदनुग्रहमित्थं
प्रवृत्तिरेषा तदनुग्रहार्थम् ॥

कृता मया वेदचतुष्टयेऽपि
प्रसिद्धशाखोपनिषत्पदेषु ।
व्याख्यातया तुष्यतु सर्वजीव
आनन्द आत्माऽद्वय ईश्वरोऽयम् ॥

यो मे धियं ह्यात्मनि वर्तमानं
सम्प्रेरयेच्छ्रौतपदावलोके ।

व्यासः सदायाससहिष्णुरीशः
स शङ्करः किङ्कर एव यस्य ॥
अगण्यपुण्यः शृणुतेदमत्र
त्रयं नराणामतिदुर्लभं स्यात् ।
वेदार्थबोधो गतमत्सरत्वं
स्वदोषदृष्टिः परवत्सदैव ॥
ततो धनानामपकारहेतो-
र्व्याख्यासु सर्वोपनिषत्पदेषु ।
अहो कृतार्था वयमात्मबोधं
सुदुर्लभं शक्रविरोदनाद्यैः ॥
प्राप्ता गुरूणामवलोकनेन
वेदान्तवाक्यार्थविबोधकेन ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपाद-
शिष्यस्य शङ्करानन्दभगवतः कृतावुत्तरताप-
नीयोपनिषद्दीपिका समाप्ता ॥

श्रीसुब्रह्मण्यः ॥

Subject : Nṛsihmatāpanīyopaniṣaddīpikā. Uttaratāpanīya. 7 to 9 Khaṇḍas.

Remarks :—The other work contained herein is षट्पदीस्तुतिः (2 leaves) which is not, however, noticed by Dr. Burnell. The Ms. is old and is in a fairly good condition.

## ॥ नृसिह्मतापनियोपनिषद्दीपिका ॥

## 1511. NṚSIHMATĀPANĪYOPANIṢADDĪPIKĀ.

J. L. Collection No. 159 a. Substance—Paper. Size—10 × 4½ inches. Sheets—31 (1-31). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—775. Author—Nārāyaṇāśramin. Pūrvatāpanīya only.

Beginning :

श्रीगणेशाय नमः ॥

श्री सरस्वत्यै नमः । श्रीगुरुभ्यो नमः ॥

नृसिंहस्तापिनी पूर्वा पञ्चोपनिषदुज्ज्वला ।
खण्डानि सप्त चत्वारि चैकं त्रीणि च त्रीणि च ॥ १ ॥

सशक्तिकः परमेश्वरो(ऽ)नादिरनन्त इत्युक्तमद्वैतप्रकरणे। स च स्वलीलया जगदातनोति । लीला च न भोगेच्छा । नापि रिरंसा । किन्तु मायालक्षणो नैसर्गिकः स्वभाव एव । अकामस्य स्पृहाऽसम्भवात् । तदुक्तमाद्यप्रकरणे—

"भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे ।
देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहे"ति ॥

धर्माधर्मौ चान्यप्रतियोगिता(ना)वाह्वयमानौ राजेव भटौ विलोकयितुं निर्मिमीते। तदधिकारिणश्च स्वमायाकल्पितानज्ञानिनो जीवानाविःकरोति । तेषु च धर्माधर्मानुसारेण निग्रहानुग्रहावातनोति। तत्र यदा केचिदधमाः स्वकृतधर्माधर्मव्यवस्थाभङ्गाय प्रवर्तन्ते, तान्निग्रहीतुं साधूंश्चानुग्रहीतुं स्वयमदेहोऽपि देहवानिव भवति । तदावतीर्ण इत्युच्यते । * * * * *
जगन्मङ्गलस्य भगवतो भजने प्रत्यूहनिरासार्थमाशीरूपं मङ्गलमाचरति—ॐ भद्रं कर्णेभिरिति ॥

End

ॐमत्र प्रणवादित्रयस्य द्विः स्वरेण गानं अनुष्टुप्वर्णानामक्षरसामवत् । स्तोभानामनुलोमप्रतिलोमानामुदात्तेनेति द्रष्टव्यम् । सामविधानं रुद्रयामल उक्तम् । तद्यथा—

गापयेत्सामगानैश्च पदपादाक्षरैः स्वरैः ।
द्वि[ः]क्षरैः त्रि[ः]क्षरैश्चैव चतुःषट्सप्तगानतः ॥
अष्टक्षीरब्रह्मसामदशभेदेन गापयेत् ।
तारेण तारमालोक्य कलाकाशेन संयुतम् ॥
अनुष्टुम्मन्त्रराजेन गानं कृत्वा विधानतः ।
तुरीयमन्त्रराजेन बीजाक्षरपुटीकृतम् ॥
बीजत्रयोदशं विद्याद्गायन्ति सामगानतः ।
एवं गानविधानेन गानं शार्दूलशाखया ॥
सामराजविधानेन बृहत्साम्नैव गापयेत् ।
गीतं गन्धर्वगानेन तथर्षभस्वरेण च ॥
सिंहानन्दनतालेन नृसिंहं गापयेत्क्रमात् ।
प्रस्तारषोडशं दिव्यमथर्वोक्तविधानत(ः)॥ इति ॥
नारायणेन रचिता शङ्करोक्त्युपजीविना ।
अस्पष्टपदवाक्यानां दीपिका पूर्वनाहरेः ॥

Colophon :

समाप्ता पूर्वनृसिंहतापिन्युपनिषद्दीपिका ॥
ॐ नमः सिद्धम ॥ ॐ नृसिंहाय नमः ॥

Subject : Nṛsihma Pūrvatāpanīyopaniṣaddīpikā—a commentary on this Upaniṣad according to the Advaita school of Philosophy.

Remarks:—The other wooks contained herein are:—

1. षट्चक्रोपनिषद्दीपिका ॥
2. नृसिंहोत्तरतापनीयोपनिषद्दीपिका ॥

The Ms. is old and is in good condition.

## ॥ नृसिंहतापनीयोपनिषद्दीपिका ॥

## 1512. NṚSIṂHATĀPANĪYOPANIṢAD DĪPIKĀ.

J. L. Collection No. 159 c. Substance—Paper. Size—10×4½ inches. Sheets—41 (33-73). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—600. Author—Nārāyaṇāśramin. Uttaratāpinī only.

Beginning:

नृसिंहोत्तरतापिन्यां त्रिंशयां स्युः खण्डका नव ।
नृहरेः परमं रूपं प्रणवेनात्र गीयते ॥

पूर्वतापिन्यनुष्टुब्निरूपणपरा । उत्तरा तु प्रणवात्मकं नारसिंहरूपं निर्णेतुमारभ्यते । तत्रापि मङ्गलार्थं भद्रमित्यादिशान्तिपाठः । विद्यायाः साम्प्रदायिकत्वद्योतनायाख्यायिकामाह —देवा ह वा इति । अणीयस्त्वं दुर्ग्रहत्वात् । ॐकारस्यात्मत्वं तदर्थत्वात् । शब्दार्थस्य शब्दमात्रत्वं वाचारम्भःश्रुत्या सिद्धम् । तत्प्रतीकत्वाद्वा । ॐ तथेत्यङ्गीकारे । शेषं माण्डूके व्याख्यातं ॥

End:

तत्र त्रयः पादाः क्रमेणोत्तरोत्तरप्राप्तिहेतवः । पद्यते प्राप्यते उत्तरं पदमेभिरिति पादा इति करणव्युत्पत्त्या । चतुर्थस्तु प्रपद्यते यः स पाद इति कर्मव्युत्पत्त्या फलं तेनौतमोतेनाद्येनैव जानीयात् । अनुज्ञातारमोतेनैव ताभ्यां चानुज्ञातैश्चोपद्रष्टारं साक्षिणः सर्वज्ञानफलभूतं जानीयादित्यर्थः । द्विरुक्तिरादरार्था । इतिशब्द उत्तरतापनीयसमाप्त्यर्थः ।

तापि(प)नीयद्वयं तीर्णं कुम्भकाशावलम्बनात् ।
शुद्धाशुद्धपरिज्ञाने निकषः सन्त एव नः ॥

नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्टपदवाक्यानां दीपिकोत्तरनाहरेः ॥

Colophon:

नृसिंहतापनीयदीपिका समाप्ता ॥
नृसिंहोत्तरतापिनीदीपिका नारायणाश्रमीया समाप्ता ॥
नृसिंहाय नमः । श्रीनृसिंहार्पितमस्तु ॥

Subject: Nṛsihmottaratāpinyupaniṣaddīpikā—a commentary on this Upaniṣad, according to the Advaita school of Philosophy.

Remarks:—The Ms. is old and is in a good condition. The other works contained in this Ms. are:

(1) नृसिंहपूर्वतापिन्युपनिषद्दीपिका ॥
(2) षट्चक्रोपनिषद्दीपिका ॥

## ॥ प्रश्नोपनिषद्भाष्यम् ॥

## 1513. PRAŚNOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 6539. Page 33. Right column. Substance—Paper. Size—13¾ × 5¾ inches. Sheets—38. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—700. Author—Śaṅkarācārya. Complete.

Beginning:

श्रीगणेशाय नमः ॥

मन्त्रोक्तस्यार्थस्य विस्तरानुवादीदं ब्राह्मणमारभ्यते । ऋषिप्रश्नप्रतिवचनाख्यायिका तु विद्यास्तुतये एवं संवत्सर-ब्रह्मचर्यसंवासादितपोयुक्तैर्ग्राह्या पिप्पलाद(दादि)वत् सर्वज्ञकल्पैराचार्यैर्वक्तव्या च । न सा येन केनचिदिति विद्यां स्तौति । ब्रह्मचर्यादिसाधनसूचनाच्च तत्कर्तव्यता स्यात् ।

सुकेशा नामतः । भरद्वाजस्यापत्यं भारद्वाजः ॥ शैब्यः ।
शिबेरपत्यं शैब्यः । सत्यकामो नामतः ॥

End :

पितृत्वं तव अस्मान् प्रत्युपपन्नं त(इतर)स्मात् । इतरो-
पि हि पिता शरीरमात्रं जनयति तथापि स पूज्यतमो लोके
किमुत वक्तव्यम् आत्यन्तिकाभयस्य दातुरित्यभिप्रायः ।
नमः परमर्षिभ्यो ब्रह्मविद्यासम्प्रदायकर्तृभ्यो नमः परम-
र्षिभ्य इति । द्विर्वचनमादरार्थम् ॥

Colophon :

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरि-
व्राजकाचार्यस्य शङ्करभगवतः कृतौ अथर्वण-
प्रश्नोपनिषद्विवरणं समाप्तम् ॥

Subject: Praśnopaniṣadbhāṣya—belonging to the Advaita system of Philosophy. 1-6 Praśnas.

Remarks :—The Ms. is in excellent condition. Floral designs decorate the front and back pages. The paper is of English manufacture nearly 100 years old.

---

## ॥ प्रश्नोपनिषद्भाष्यम् ॥

## 1514. PRAŚNOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 9727 b. Page 33. Right column.
Substance—Palm leaf. Size—16 × 1¼ inches. Leaves—23 (5-27). Lines—9 to a Page. Script—Grantha. No. of Granthas—700. Author—Śaṅkarācārya. Complete.

Beginning :

विश्ववन्द्यं विघ्नराजं सर्वशुक्लां सरस्वतीम् ।
पूर्वाचार्यान् सर्वपूज्यान् कुर्वे नतिपदं गुरून् ॥

मन्त्रोक्तार्थस्य Same as No. 1513.

End and subject—Same as No. 1513.

Colophon:

इति श्रीगोविन्द + प्रश्नविवरणं समाप्तम् ॥

ॐ ब्रह्मादिभ्यो + महद्भ्यो गुरुभ्यः ॥

चन्द्रशेखरेन्द्रसरस्वतियतिना प्रश्नोपनिषद्भाष्यं लिखितम् ।

ॐ दक्षिणामूर्तये नमः ॥ सरस्वत्यै नमः ॥

Remarks:—For the other works contained herein see Remarks on No. 912. The Ms. is old and is in a worn-out condition.

---

## ॥ प्रश्नोपनिषद्भाष्यम् ॥

## 1515. PRAŚNOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 9752 d. Page 33. Right column. Substance—Palm leaf. Size—$18\frac{1}{4} \times 1\frac{1}{2}$ inches. Leaves—30 (78-107). Lines—6 to a Page. Script—Grantha. No. of Granthas—700. Author—Śaṅkarācārya. Complete.

Beginning, end, colophon and subject—Same as No. 1514.

Remarks:—The Ms. is in a fairly good condition. For the other works contained in this Ms. see the list under Remarks on No. 1438.

## ॥ प्रश्नोपनिषद्भाष्यम् ॥

## 1516. PRAŚNOPANIṢAD BHĀṢYAM.

S. S. Collection No. 13 d. Substance—Paper. Size—$12\frac{3}{4} \times 7\frac{3}{4}$ inches. Sheets—12. Lines—15 or 16 to a page. Script—Devanāgarī. No. of Granthas—700. Author—Śaṅkarācārya. Complete.

Beginning, end, colophon and subject—Same as No. 1513.

Remarks:—The Ms. is old and is in good condition. For the other works contained in this Ms. see the list under Remarks on No. 1439.

## ॥ प्रश्नोपनिषद्भाष्यम् ॥

## 1517. PRAŚNOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 6319. Page 33. Right column.
Substance—Paper. Size—$10\frac{1}{4}\times4$ inches. Sheets—7 (1-8; 2nd sheet missing). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Śaṅkarācārya. Incomplete.

Beginning:

श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादशङ्करं लोकशङ्करम् ॥
विश्ववन्द्यं विघ्नराजं etc. Same as No. 1514.

End:

यद्वाह्यं वा प्रसिद्धं सामान्यं तेजस्तच्छरीरे उदानं वायुमनुगृह्णाति स्वेन प्रकाशात्म(शे)नेत्यभिप्रायः । यस्मात्तेजः स्वभावो बाह्यतेजोनुगृहीत (उत्क्रान्तिकर्ता) ॥

Subject: Praśnopaniṣad bhāṣya, 1-3 Praśnas.

Remarks:—This work ends abruptly in the commentary on the 9th Vākya of the third Praśna. The Ms. is very old and is in a worn-out condition.

## ॥ प्रश्नोपनिषद्भाष्यम् ॥

## 1518. PRAŚNOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 6312. Page 33. Right column.
Substance—Paper Size—$11\times4\frac{1}{2}$ inches. Sheets—13 (10-22). Lines—10 to 12 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Śaṅkarācārya. Incomplete.

Beginning:

.... उत्क्रान्तिकर्त्ता तस्माद्यदा लौकिकः पुरुषः उपशान्ततेजाः भवति । उपशान्तं स्वाभाविकं तेजो यस्य

तं क्षीणायुषं मुमूर्षुं विद्यात् । स पुनर्भवशरीरान्तरं प्रति-
पद्यते । कथं । सह इन्द्रियैः मनसि सम्पद्यमानमित्येतत् ।
येन देहं मनोकृतेन मनः कृतेन मनः सङ्कल्पेच्छादिनिष्प-
न्नकर्मनिमित्तेनेत्येतत् ॥

End and colophon—Same as No. 1513.

Subject: Praśnopaniṣad bhāṣya. 3-6 Praśnas.

Remarks :—The Ms. is very old and is worm-eaten. The sheets are completely worn out. The Ms. is full of scriptorial errors. This Ms. seems to be the continuation of No. 1517 owing to the similarity of script. On the last sheet 'तुलजाराजस्येदं पुस्तकं' is written; i.e., the Ms. belonged to Tulaja Mahāraja who reigned between 1765-87 A. D.

---

## ॥ प्रश्नोपनिषद्दीपिका ॥

## 1519. PRAŚNOPANIṢAD DĪPIKĀ.

T. S. Collection No. 106. Substance—Paper. Size—$9\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—52. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—560. Author—Śaṅkarānanda. Complete.

Beginning :

नमः श्रीशङ्करानन्दगुरुपादाम्बुजन्मने ।
सविलासमहामोहग्राहग्रास्यै(है)ककर्मणे ॥
प्रश्नमुण्डकमन्त्राणां ब्राह्मणं कोऽहमीदृशः ।
इत्यादिप्रश्ननामाख्यं(नार्थं) व्याख्यास्ये ब्रह्मबोधकम् ॥

प्रथमतो ब्रह्मविद्यास्तुत्यर्थमाख्यायिकामवतारयति—

ॐ सुकेशा च सुकेशा नामतः । भारद्वाजः भरद्वाजस्यापत्यं, शैब्यश्च शिबेरपत्यं, सत्यकामः सत्ये ब्रह्मणि कामो यस्य सः सत्यकामो यथार्थनामा(कामः) ॥

End:

एवशब्दव्यावर्त्यं स्वयमाह— नातः परमस्तीति ।
अत अस्म(स्मा)दुक्ताद्ब्रह्मज्ञानात्परमधिकं मम वा अन्यस्य
वा नास्ति इति । ये(ए)वं पिप्पलादेनोक्ते सति ते पिप्पला-
दशिष्याः भारद्वाजाते(द)यः तं स्वगुरुं पिप्पलादं अर्चयन्तः
मनोवाक्कायैः यथोचितं पूजयन्तः * * *

तारयसि दर्शयसि इति अनेन प्रकारेण । नमः नमस्का-
रः । परमऋषिभ्यः उत्कृष्टेभ्यः अतीन्द्रियब्रह्मविद्यासम्प्र-
दायकर्तृभ्यो ब्रह्मादिभ्यो नम्रः(मः) परमऋषिभ्यः व्या-
ख्यातं । वाक्याभ्यासः उपनिषत्परिसमाप्त्यर्थः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्य-
श्रीशङ्करानन्दभगवत्पादकृतौ प्रश्नोपनिषद्दीपिकायां
षष्ठः प्रश्नः ॥

दत्तात्रेयपरब्रह्मणे नमः । साम्बसदाशिवार्पणमस्तु ॥

Subject: Praśnopaniṣad dīpikā-a commentary on this Upaniṣad according to the Advaita school of Philosophy. 1-6 Praśnas.

Remarks :— The Ms. is in good condition.

## ॥ प्रश्नोपनिषद्दीपिका ॥

## 1520. PRAŚNOPANIṢAD DĪPIKĀ.

Burnell's Catalogue No. 9753 c. Page 34. Right column. Substance— Palm leaf. Size —16½×1½ inches. Leaves— 29 (22-50). Lines —5 to a Page. Script—Telugu. No. of Granthas—560. Author—Śaṅkarānanda. Complete.

Beginning, end, colophon and subject—Same as No. 1519.

**Remarks**:—The Ms. is in good condition. For the other works contained in this Ms. see the list under Remarks on No. 1441.

## ॥ प्रश्नोपनिषद्दीपिका ॥

## 1521. PRAŚNOPANIṢAD DĪPIKĀ.

Burnell's Catalogue No. 9754 d. Page 34. Left column. Substance—Palm leaf. Size—19¼ × 1¾ inches. Leaves—9 (16-24). Lines—11 or 12 to a Page. Script—Telugu. No. of Granthas—560. Author—Śaṅkarānanda. **Complete.**

Beginning, end, colophon and subject—Same as No. 1519.

**Remarks**:—For the other works contained herein see the list under Remarks on No. 1428. The Ms. is in good condition.

## ॥ प्राणाग्निहोत्रोपनिषद्दीपिका ॥

## 1522. PRĀṆĀGNIHOTROPANIṢAD DĪPIKĀ.

J. L. Collection No. 164 j. Substance—Paper. Size—11⅝ × 5⅛ inches. Sheets—3 (57-59). Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—60. Author—Nārāyaṇāśramin. Complete.

Beginning:

श्रीरस्तु ।

प्राणाग्निहोत्रोपनिषच्चतुःखण्डविराजिता ।
एकादशी शौनकीये सारभूता हि सर्वतः ॥

ननु विरक्तस्यापि देहस्य स्थितये अन्नादनमावश्यकं। तच्च मुक्तावनुपयुक्तत्वादनर्थकं स्यादित्याशङ्क्योपासनया सार्थकत्वायाग्निहोत्रोपनिषदारभ्यते– अथात इति। संसारज्ञानं संसारो हेयतया ज्ञायते अनेनेति अधीतं वेदेषु। अन्नसूत्रं। अन्नमेव सूत्रं साधनं यस्मिन् शारीरं शरीरभवं

यज्ञं । प्ररोचनार्थमादौ फलमाह— अस्मिन्निति ॥

End :

ननु भवन्तु यज्ञोपकरणानि । तथापि देवता(ऽ)भावे कथं यज्ञः स्यादित्यत आह— सर्वा हीति । यावदधिदैवतं तावदध्या(त्म)तां(ता) वर्तते । चक्षुरादीनां मूर्च्छायाद्यधिष्ठितत्वादिति भावः । ननु ज्ञानाभावे कथं मोक्ष इत्याशङ्क्य वाराणसीमरणं दृष्टान्ता(न्तयति ।)द्विरुक्तिः समाप्त्यर्था ।

नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्टपदवाक्यानां अग्निहोत्रस्य दीपिका ॥

Colophon :

अग्निहोत्रोपनिषद्दीपिका समाप्ता ॥ ११ ॥
श्रीरामार्पणमस्तु ॥

Subject: Prāṇāgnihotropaniṣad dīpikā—a commentary on this Upaniṣad, according to the Advaita school of Philosophy.

Remarks:—For the other works contained herein see the list under Remarks on No. 1429. The Ms. is old and is in a fairly good condition. The sheets are here and there rat-eaten.

## ॥ बृहदारण्यकोपनिषद्भाष्यम् ॥

## 1523. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 9728. Page 34. Left column. Substance—Palm leaf. Size—$18\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—115. Lines—6 to a Page. Script—Telugu. No. of Granthas—3500. Author—Śaṅkarācārya. First and Second Adhyāyas only.

Beginning :

ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्यासम्प्रदायकर्तृभ्यो वंशऋषिभ्यो नमो गुरुभ्यः ।

ॐ 'उषा वा अश्वस्ये'त्येवमाद्या वाजसनेयिब्राह्मणोपनिषत्-स्या इयमल्पग्रन्था वृत्तिरारभ्यते। संसारविवृत्सुभ्यः संसार-हेतुनिवृत्तिसाधनविद्याप्रतिपत्तये। सेयं ब्रह्मविद्योपनिषच्छ-ब्दवाच्या, तत्पराणां सहेतोः संसारस्यात्यन्तावसादना-दुपनिपूर्वस्य सदेस्तदर्थत्वात्। तादर्थ्याद्ग्रन्थोऽप्युपनिषदि-त्युच्यते। सेयं षडध्याय्यरणे(ण्ये)ऽनूच्यमानत्वादारण्य-कम्। बृहत्त्वात्परिमाणतो बृहदारण्यकम्। + तत्र तावदश्व-मेधविज्ञानायो'षा वा अश्वस्ये'त्यादि। तत्राश्वविषयमेव दर्श-नमुच्यते। प्राधान्यादश्वस्य। प्राधान्यञ्च तन्नामाङ्कितत्वा-त्क्रतोः प्राजापत्यत्वाच्च। उषा इति ब्राह्मो मुहूर्तः उषाः; वैशब्दः स्मारणार्थः प्रसिद्धं कालं स्मारयति। शिरः प्रा-धान्यात्। शिरश्च प्रधानं शरीरावयवानाम्। अश्वस्य मेध्यस्य मेधार्हस्य या(य)ज्ञियस्य उषाः शिर इति सम्बन्धः॥

End :

अध्यायचतुष्टयस्याचार्यपरम्पराक्रमो वंश इत्युच्यते। तत्र प्रथमान्तः शिष्यः। पञ्चम्यन्त आचार्यः। (परमेष्ठी विराट्। ब्रह्मणो हिरण्यगर्भात्। ततः परमाचार्यपरम्परा) नास्ति। यत्पुनर्ब्रह्म तन्नित्यं स्वयंभु तस्मै ब्रह्मणे स्वयं-भुवे नमः॥

Colophon :

इति श्रीगोविन्द + बृहदारण्यकटीकायां चतुर्थोऽध्यायः समाप्तं(प्तः)
मधुकाण्डं समाप्तम्॥

इति श्रीगुरुभ्यो नमः॥

Subject : Bṛhadāraṇyakopaniṣadbhāṣya according to the Advaita school of Philosophy. 1—2 Adhyāyas.

Remarks :— The Ms. is in a fairly good condition.

## ॥ बृहदारण्यकोपनिषद्भाष्यम् ॥

## 1524. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 9729 a. Page 34. Left column. Substance— Palm leaf. Size—19½×1½ inches. Leaves—43 (1-43). Lines—6 or 7 to a Page. Script—Telugu. No. of Granthas—1300. Author—Śaṅkarācārya. Third Adhyāya only.

Beginning:

श्रीमहासरस्वत्यै नमः ॥

'जनको ह वैदेह' इत्यादि याज्ञवल्कीयं काण्डमारभ्यते । उपपत्तिप्रधानार्थत्वादतिक्रान्तेन मधुकाण्डेन समानार्थत्वेऽपि सति न पुनरुक्तता। + अपि च तद्विद्यसंयोगस्तैश्च सह वादकारणं विद्याप्राप्त्युपायो न्यायविद्यायां दृष्टः । तच्चास्मिन्नध्याये प्राबल्येन प्रदर्श्यते । प्रत्यक्षा च विद्वत्संयोगे प्रज्ञा [दानप्रदर्शनार्थाख्यायिका-प्रज्ञा]वृद्धिस्तस्माद्विद्याप्राप्त्यु(पाय)प्रदर्शनार्था(र्थैवा)ख्यायिका । जनको नाम ह किल सम्राट्-राजा बभूव विदेहानाम् । विदेहेषु भवो वैदेहः ॥

End:

नामरूपकृतकार्यकरणोपाधिसम्पर्कजनितभ्रान्त्यध्यारोपितत्वात् सुखित्वदुःखित्वादिविशेषस्येति परिहृतमेतत्सर्वम् । विरुद्धश्रुतीनां च विषयमवोचाम । तस्मात् 'एषोऽस्य परम आनन्दः' इतिवत् सर्वाण्यानन्दवाक्यानि द्रष्टव्यानि ॥

**Colophon:**

इति श्रीगोविन्द + बृहदारण्यकटीकायां पञ्चमस्याध्यायस्य
नवमं ब्राह्मणं समाप्तम् ॥

समाप्तश्चाध्याय: ॥

श्रीसाम्बसदाशिवार्पणमस्तु ॥ श्रीवासुदेवार्पणमस्तु ॥

Subject: Bṛhadāraṇyakopaniṣadbhāṣya. Third Adhyāya.

Remarks:—The other work contained herein is Bṛhadāraṇyakopaniṣadbhāṣyaṭīkā.

The Ms. is in a fairly good condition.

## ॥ बृहदारण्यकोपनिषद्भाष्यम् ॥

## 1525. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 9732. Page 34. Left column. Substance—Palm leaf. Size—$17\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves—136. Lines—7 to a Page. Script—Grantha. No. of Granthas—4800. Author—Śaṅkarācārya. First, Second and Third Adhyāyas only.

Beginning—Same as No. 1523.

End—Same as No. 1521.

**Colophon:**

बिन्दुदुर्लिपिविसर्गवीथिकाश्रृङ्गपङ्क्तिपदभेददूषणम् ।
हस्तवेगजमबुद्धिपूर्वकं क्षन्तुमर्हथ समीक्ष्य सज्जना: ॥

Remarks:—On the title page is given—

"कैवल्ययोगीन्द्रगुरुपादाम्बुजन्मने ।
नमो विधीयते त्रेधा विधूतध्वान्तपांसवे ॥"

नम: सच्चिदानन्दयोगिप्रभृतिभ्योऽस्मद्गुरुभ्य: ॥

The Ms. is very old and is in a decaying condition, since many leaves are completely broken out.

## ॥ बृहदारण्यकोपनिषद्भाष्यम् ॥

## 1526. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 6322. Page 34. Left column. Substance—Paper. Size—9⅜ × 4½ inches. Sheets—56. Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—1900. Author—Śaṅkarācārya. Fourth Adhyāya only.

Beginning:

श्रीगणेशाय नमः ।

जनको ह वैदेह आसाञ्चक्रे । अस्य सम्बन्धः—शारीराद्यानष्टौ पुरुषान्निरुह्य प्रत्युह्य पुनर्हृदये दिग्भेदेन च पुनः पञ्चधा व्यूह्य हृदये प्रत्युह्य हृदयं शरीरं च पुनरन्योन्यप्रतिष्ठितं प्राणादिपञ्चवृत्त्यात्मके समानाख्ये जगदात्मनि सूत्र उपसंहृत्य जगदात्मानं शरीरहृदयसूत्रावस्थमतिक्रान्तवान् । य औपनिषदः पुरुषो नेति नेतीति व्यपरि(दि)ष्टः स साक्षाचो(पा)दान(कारणत्व)रूपेण च निर्दिष्टो "विज्ञानमानन्द"मिति तस्यैव वागादिदेवताद्वारेण पुनरधिगमः कर्तव्य इत्यधिगमोपायान्तरार्थः । सोयमारम्भो ब्राह्मणद्वयस्य । आख्यायिका त्वाचारप्रदर्शनार्था—"जनको ह वैदेह आसाञ्चक्रे" ॥ आसनं कृतवान् आस्था-(स्था)मि(यि)कां दत्तवानित्यर्थः, दर्शनकामेभ्यो राज्ञः ॥

End:

तस्मात्पुरुषसामर्थ्यज्ञानवैराग्यकाम्या(मा)द्यपेक्षया व्युत्थानविकल्पक्रमपारिव्राज्यप्रतिपत्तिप्रकारा न विरुध्यन्ते । अनधिकृतानां च पृथग्विधानात् पारिव्राज्यस्य 'स्नातको वा(स्नातको)वोत्सन्नाग्निरनग्निकोवे'त्यादि(ना) । तस्मा-

तिसद्धान्याश्रमान्तराणि अधिकृतानामेव ॥

इति पञ्चमं ब्राह्मणम् ॥

अथानन्तरं याज्ञवल्कीयस्य काण्डस्य वंश आरभ्यते यथा मधुकाण्डस्य वंशः । व्याख्या(नं) तु पूर्ववदिति ।

इति षष्ठं ब्राह्मणम् ॥

Colophon :

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीमच्छङ्करभगवतः कृतौ बृहदारण्यकोपनिषद्भाष्ये षष्ठोऽध्यायः । (चतुर्थोऽध्यायः) अध्यायश्च समाप्तः ॥

समाप्तमिदं बृहदारण्योपनिषद्भाष्यं षष्ठाध्यायस्य पुंडोपनामकवें-काजीनायकस्येदं पुस्तकम् ॥

श्रीरस्तु ॥

Subject: Bṛhadāraṇyakopaniṣad bhāṣya. Fourth Adhyāya only.

Remarks:—The Ms. is in a good condition.

The Ms. belonged to one Puṇḍa Veṅkāji Nāyaka.

## ॥ बृहदारण्यकोपनिषद्भाष्यम् ॥

## 1527. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 9730. Page 34. Left column. Substance—Palm leaf. Size—19 × 1½ inches. Leaves—98. Lines—6 to a Page. Script—Grantha. No. of Granthas—1900. Author—Śaṅkarācārya. Fourth Adhyāya only.

Beginning, end, colophon and subject—Same as No. 1526.

Remarks :—The beginning of the Aitareyopaniṣadbhāṣya is given after the colophon.

The Ms. is in a fairly good condition.

## ॥ बृहदारण्यकोपनिषद्भाष्यम् ॥

## 1528. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYAM.

T. S. Collection No. 140. Substance—Paper. Size—9½ × 4½ inches. Sheets—40. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—Śaṅkarācārya. Fourth Adhyāya—Incomplete.

Beginning—Same as No. 1526.

End:

इदानीं यो(ऽ)सौ सर्वात्मभावो मोक्षो विद्याफलं क्रिया-
कारकफलशून्यं सप्रत्यक्षतो निर्दिश्यते । यत्र विद्याकामक-
र्माणि न सन्ति तदेतत्प्रस्तुतं यत्र सुप्तो न कश्चन कामं
कामयते न कश्चन स्वप्नं पश्यति ।

Colophon: Nil.

Subject: Bṛhadāraṇyakopaniṣad bhāṣya. Fourth Adhyāya.

Remarks:—The Ms. abruptly ends in the commentary on 21st Ṛk of the third Brāhmaṇa of this fourth Adhyāya.

The Ms. is in good condition.

## ॥ बृहदारण्यकोपनिषद्भाष्यम् ॥

## 1529. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYAM.

S. S. Collection No. 15. Substance—Paper. Size—11 × 4¾ inches. Sheets—241 (1-270; Sheets 142, 143, 144, 150, 151, 217-220, 223-242=29 are missing). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—5200. Author—Śaṅkarācārya. Incomplete.

Beginning—Same as No. 1523.

End:

इळासीत्यनेन तं वा एतमाहुरित्यनेन विधिना जातः
पुत्रः पितरं पितामहं चातिशेते श्रिया यशसा ब्रह्मवर्च-

सेन परमां निष्ठां प्रापदित्येवं स्तुत्यो भवतीत्यर्थः । यस्य चैवंविदो ब्राह्मणस्य पुत्रो जायते सचैवं स्तुत्यो भवतीत्यभ्याहार्यं ॥

**Colophon:**

अष्टमस्य चतुर्थं ब्राह्मणम् ॥

Subject: Bṛhadāraṇyakopaniṣad bhāṣya. 3-8 (1-6) Adhyāyas.

**Remarks**:—The Ms. is in a good condition. This Ms. abruptly ends with the beginning of the 5th Brāhmaṇa of the 8th Adhyāya.

## ॥ बृहदारण्यकोपनिषद्भाष्यटीका ॥

## 1530. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYA ṬĪKĀ.

Burnell's Catalogue No. 9731. Page 34. Left column.
Substance—Palm leaf. Size—17¾×1⅜ inches. Leaves—175. Lines—6 or 7 to a Page. Script—Telugu. No. of Granthas—5300. Author—Ānandagñāna. First and Second Adhyāyas only.

**Beginning:**

शुभमस्तु ॥

यदविद्यावशाद्विश्वं दृश्यते रशनाहिवत् ।
यद्विद्यया च तद्धानिस्तं वन्दे पुरुषोत्तमम् ॥
नमस्त्रय्यन्तसन्दोहसरसीरुहभानवे ।
गुरवे परपक्षौघध्वान्तध्वंसि(स)पटीयसे ॥
भगवत्पादपादाब्जद्वन्द्वं द्वैत(द्वन्द्व)निबर्हणम् ।
सुरेश्वरादिसद्भृङ्गैरवलम्बितमाभजे ॥
बृहदारण्यके भाष्ये शिष्योपकृतिसिद्धये ।
सुरेश्वरोक्तिमाश्रित्य क्रि(क्रि)यते न्यायनिर्णयः ॥

बृहदारण्यको(काण्वो)पनिषद्विवरणव्याजेनाशेषामेवोप- निषदं शोधयितुकामो भगवान् भाष्यकारो विघ्नोपशमादि- समर्थं शिष्टाचारप्रमाणकं परापरगुरुनमस्काररूपं मङ्गल- माचरति। नमो ब्रह्मादिभ्यो (भ्य इति)। वेदो हिरण्य- गर्भो वा ब्रह्मा(ह्म) तन्नमस्कारेण सर्वा देवता नमस्कृता भवन्ति। तदर्थत्वात्तदात्मकत्वाच्च 'एष उ ह्येव सर्वे दे- वा' इति श्रुतेः। आदिपदेन परमेष्ठी(ष्ठि)प्रभृतयो गृह्य- न्ते। यद्यपि ये(ते)षामुक्तो ब्रह्मान्तर्भावस्तथापि तेष्व- नादरनिरासार्थं पृथग्ग्रहणम्॥

End:

कुतस्तर्हि वेदो जायते, तत्राह - यत्पुनरिति। परस्ये- (स्यै)व ब्रह्मणो वेदरूपेणावस्थानात्तस्य नित्यत्वान्न हेत्वपे- क्षेत्यर्थः। आदावन्ते च कृतमङ्गलग्रन्थाः प्रचारिणो भव- न्तीति द्योतयितुमन्ते 'ब्रह्मणे नम' इत्युक्तं। तद्याचष्टे— तस्मा इति॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दपूज्य- पादशिष्येण भगवदानन्दज्ञानेन कृतायां बृहदा- रण्यकभाष्यटीकायां चतुर्थो(ऽ)ध्यायः॥

श्रीसदाशिवार्पणम्।

श्रीदक्षिणामूर्तये नमः। श्रीरामः॥

Subject: Bṛhadāraṇyakopaniṣad bhāṣyaṭīkā—a gloss on the Bhāṣya according to the Advaita school of philosophy. 3 and 4 (1 and 2) Adhyāyas.

Remarks:—The Ms. is in a fairly good condition.

## ॥ बृहदारण्यकोपनिषद्भाष्यटीका ॥

## 1531. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYAṬĪKĀ.

Burnell's Catalogue No. 9729 b. Page 34. Left Column. Substance—Palm leaf. Size—18⅜ × 1½ inches. Leaves—42 (44-85). Lines—6 to a Page. Script—Telugu. No. of Granthas—1300. Author—Ānandagñāna. Third Adhyāya only.

Beginning :

(…एकस्य पलस्य) चत्वारो भागास्तेषामेको भागः पाद इत्युच्यते । प्रत्येकं शृङ्गयोर्दश दशपादाः सम्बध्येरन्निति शङ्कां निराकर्तुं विभजते— पञ्चेति । एकैकस्मिन् शृङ्गे आबद्धा बभूवुरिति पूर्वेण सम्बन्धः । ॥ (१) ॥ ब्राह्मणा वेदाध्ययनसम्पन्नास्ते तदर्थनिष्ठा इति यावत् । उत्कालयत्(तु) उद्गमयतु यतो याज्ञवल्क्याद्यजुर्वेदविदस्सकाशाद्ब्रह्मचारी सामवेदविधिं शृणोति । ऋक्षु चाध्यारूढं ना(सा)म गीयते । ते(त्वि)ष्वेव च वेदेष्वन्तर्भूतोध्वे(थर्वे)वेदस्तस्मादर्थाद्यजुर्वेदिनो[ः] मुनेः शिष्यस्य सामवेदाध्ययनानुपपत्तेर्वेदचतुष्टयविशिष्टो मुनिरित्याह— (अत) इति । निमित्तनिवेदनपूर्वकं ब्राह्मणानां सभ्यानां क्रोधप्राप्तिं दर्शयति— याज्ञवल्क्येनेति ॥

End :

ब्राह्मणार्थमुपसंहरति— तस्मादिति । ब्रह्मण्यानन्दस्य वेद्यतया दुर्निरूपत्वं तच्छब्दार्थः । यथै[वदो]षोऽस्येत्यत्र भेदो न विवक्षितः सर्वात्मभावस्य प्रकृतत्वात् तथा विज्ञानादिवाक्येष्वानन्दस्य वेद्यता न विवक्षिता । उक्तरीत्या तद्वेद्यतायाः [दुष्प्रति]दुष्प्रतिपाद्य(द)त्वात्तस्मादनतिशयान-

न्दं च चिदेकतानं वस्तु सिद्धमित्यर्थः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्य+आनन्दज्ञानकृतायां
बृहदारण्यकभाष्यटीकायां पञ्चमोऽध्यायः ।
श्रीदक्षिणामूर्तिरूपाय गुरवे परमात्मने नमः ।
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥
इति श्रीमहाराजराजेश्वरश्रीसहाजिमहाराजस्य बृहदारण्यक-
भाष्यपञ्चमाध्यायपुस्तकम् ॥ कृष्णेन लिखितम् ।
श्रीगोपालकृष्णब्रह्मार्पणमस्तु । साम्बशिवाय नमः ॥

Subject : Bṛhadāraṇyakopaniṣad bhāṣyaṭīkā—a gloss on the bhāṣya according to the Advaita school of philosophy. Fifth Adhyāya (Third Adhyāya.)

Remarks :—The other work contained herein is

बृहदारण्यकोपनिषद्भाष्यम् ॥

The Ms. is in a fairly good condition. This Ms. belonged to King Sāhaji of Tanjore who reigned between 1684-1710 A. D. The scribe's name is given as Kṛṣṇa. This Ms. abruptly begins at the end of the commentary on the Ist Vākya of the 1st Brāhmaṇa.

---

## ॥ बृहदारण्यकोपनिषद्भाष्यटीका ॥

## 1532. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYAṬĪKĀ.

S. S. Collection No. 16. Substance—Paper. Size—14 × 5½ inches. Sheets—154 (26-49, 2-45, 57, 12, 17=154). Lines—10 to 12 to a Page. Script—Devanāgarī. No. of Granthas—5000. Author—Ānandajñāna. Incomplete.

Beginning :

...तश्च विदुषो(ऽ)पि कर्मविधि(ः)स्यादित्याशङ्क्याह—
न चेति । वासनावशादुद्भूतस्याभासत्वादात्मस्मृत्या पुनः
पुनर्बाधाच्च विदुषो न कर्मप्रवृत्तिरित्यर्थः ॥

End:

तस्य परमात्मरूपेण स्वयम्भु(भू)त्वमभिदधाति—अ-
नादीति । तस्य(ा)पौरुषेयत्वेनासम्भावितदोषतया प्रामा-
ण्यमभिप्रेत्य विशिनष्टि— नित्यमिति । आदिमध्यान्ते-
षु कृतमङ्गळा ग्रन्थाः प्रसारिणो भवन्तीति मन्वानः स-
न्नाह— तस्मै ब्रह्मणे नम इति ।

नमो जन्मादिसम्बन्धबन्धविध्वंसहेतवे ।
हरये परमानन्दपरिज्ञानवपुर्हृ(भृ)ते ॥
नमः श्रुत्यन्तसन्दोहसरसीरुहभानवे ।
गुरवे परपक्षौघध्वान्तध्वंसपटीयसे ॥

Colophon:

ॐ श्रीमत्परमहंसपरिव्राजकाचार्यशुद्धानन्दपूज्यपादशिष्य-
भगवदानन्दज्ञानकृतायां बृहदारण्यकभाष्यटीकायामष्टमो-
(ऽ)ध्यायः ॥ हरिः ॐ.

**Subject:** Bṛhadāraṇyakabhāṣyaṭīkā—3-8 (1-6) Adhyāyas omitting the fifth (third) Adhyāya—a fragment only.

Remarks :— The Ms. is in good condition.

## ॥ बृहदारण्यकोपनिषद्भाष्यवार्तिकम् ॥

## 1533. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYA VĀRTIKAM.

Burnell's Catalogue No. 9735. Page 34. Left column.
Substance—Palm leaf. Size—$12\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves—115. Lines—6 to a Page. Script—Telugu. No. of Granthas—2031. Author—Sureśvarācārya. Incomplete.

Beginning:

(एकैकस्वामिको लोके गवादिः पशुरिष्यते ।)
ततोऽप्यतिशयः पुंसां सर्वलोकोपकारिता ॥ (१५७१ ॥)

एकैकक्रियया लोक एकैकस्वामिकः पशुः ।
अनेकैः संहतश्चैवं कदाचिदुपकारकः ॥

भूरिक्रियावांस्तु नरः तथाऽनेकेश्वरोऽवशः ।
एकैको निखिलं विश्वं बिभर्त्यज्ञो दिवानिशम् ॥ (१५७४ ॥)

End :

यथोक्तशक्तिविक्षेपो मनोबुद्धिपुरःसरः ।
सङ्कल्पाध्यवसायाभ्यां तयोर्भेदोऽपि च द्विधा ॥ (३६९ ॥)

योग्येन्द्रियस्य या यस्य ततोऽन्यत्रापि लक्षिता ।
वृत्तिस्तस्यैव सा ज्ञेया न स्वभावविपर्ययः ॥ (३७० ॥)

.............................................................

Colophon : (Leaf No. 48).

इति श्री + बृहदारण्यकभाष्यवार्तिकप्रक्रमे तृतीयोऽध्यायः ॥

Subject: Bṛhadāraṇyakopaniṣad bhāṣya vārtika. Third and Fourth (First and Second) Adhyāyas.

Remarks:—On the title page the following is given in Telugu language

वेदांतं सुरेश्वराचार्यविरचितबृहदारण्यभाष्यवार्तिकप्रक्रमं कोन्त तृतीयाध्या-
यान्निनि कोन्त चतुर्थाध्यायान्नि अन्निद.

आद्यंतालु लेदु वेंकटसुब्बय्य व्राशिनदि तेलुगुलिपि [सि]आकुलु ११
इट्लु.

ग्रन्थसंख्या २५००. पङ्गालिअः(?) शकवर्ष रमुशानुमासं २१ तेति
प्रवेशं.

The Ms. is in a fairly good condition. This Ms. abruptly begins with the Vārtika on the fourth Brāhmaṇa of the First Adhyāya and breaks off in that on the fourth Brāhmaṇa of the Second Adhyāya.

## ॥ बृहदारण्यकोपनिषद्भाष्यवार्तिकम् ॥

## 1534. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYA VĀRTIKAM.

Burnell's Catalogue No. 9736. Page 34. Left column.

Substance—Palm leaf. Size—$17\frac{1}{8} \times 1$ inches. Leaves—117. Lines—6 to a Page. Script—Grantha. No. of Granthas—2031. Author—Sureśvarācārya. Incomplete.

Beginning, end, colophon and subject—Same as No. 1533.

Remarks:—The Ms. is in a fairly good condition.

## ॥ बृहदारण्यकोपनिषद्भाष्यवार्तिकम् ॥

## 1535. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYA VĀRTIKAM.

Burnell's Catalogue No. 6300. Page 34. Left column.

Substance—Paper. Size—$11\frac{1}{4} \times 4\frac{1}{2}$ inches. Sheets—194. Lines—14 to a Page. Script—Devanāgarī. No. of Granthas—5000. Author—Sureśvarācārya. Incomplete.

Beginning:

मनोऽध्यात्मं यदस्याभूद्ब्रह्मा...... ।
तस्याधिदेवता चन्द्र इति माध्यन्दिनी श्रुतिः ॥
कर्मतः क(का)लतो मृत्योर्मुक्तो न स्वर्गमेष्यति ।
तत्प्रयास्यति केनायमाक्रमेणेति पृच्छ्यते ॥
स्वर्गलोकगतावत्र साधनं पृच्छ्यते यतः ।
अन्तरिक्षमनाधारं गतौ हेतुनिषेधनम् ॥

End:

कुटिलं च तथा पापमस्मत्तस्त्वं विधे जय ।
वयं तु कृतकृत्यत्वादशक्ताश्च मुमु........ ॥

मम उक्तिमतो भक्त्या तुभ्यं बहुतमां धिया ।
आयुषा तदधीयेमांघ्रिक्षमदेव(?)....... ॥

Colophon:

इति श्रीमत्सुरेश्वरवार्तिकप्रक्रमे सप्तमाध्याय: ॥
मस्करीन्द्रप्रणीतस्य भवनामभृतो यतेः ।
भाष्यस्य वार्तिकोक्त्यैवमध्याय: स(प्तमो गत:)
अष्टमाध्याय इत: परं लेखनीय: ॥ शङ्करचरणाभ्यां नमः ॥
सुरेश्वरचरणाभ्यां नम: ॥

Subject: Bṛhadāraṇyakopaniṣad bhāṣya vārtika. 5-7 (3-5) Adhyāyas.

Remarks:— On the title page is given 'श्रीमन्महाराजतुलजाभूपतेरिदं पुस्तकं भवति ॥' The Ms. is in a fairly good condition.

## ॥ बृहदारण्यकोपनिषद्भाष्यवार्तिकम् ॥

## 1536. BṚHADĀRAṆYAKOPANIṢAD BHĀṢYA VĀRTIKAM.

Burnell's Catalogue No. 6326. Page 34. Left column.
Substance—Paper. Size—$11\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—157. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas —3840. Author—Sureśvarācārya. Sixth Adhyāya only.

Beginning:

श्री लक्ष्मीनृसिंहाय नमः ॥

आनन्दे ब्रह्मविज्ञाने साक्षादित्यादिलक्षणम् ।
पञ्चमान्ते विनिर्णीतं जल्पन्यायेन साम्प्रतम् ॥
वागादिदेवताद्वारा भूयः स्वस्यैव वित्तये ।
षष्ठ आरभ्यतेऽध्यायो वादन्यायेन यत्नतः ॥

योग्यकालावबोधार्थमासाञ्चक्र इतीरितम् ।
कल्यं बुध्वासनमृषिराजगाम महीपतिम् ॥

End:

एवं काण्डद्वयेनेयं सफलानवमं....
सर्वसन्यासनिष्ठा च ब्रह्मविद्या समीरिता ॥
एतावानुपदेशः स्याद्वेदे श्रेयोऽर्थिनां नृणाम् ।
कृतकृत्यो भवेत्क्षिप्रमेनं ज्ञात्वानुशासनम् ॥
त्रिसाहस्री तथा अष्टशतान्यत्र समासतः ।
चत्वारिंशत्तथा श्लोकाः षष्ठाध्यायस्य वार्तिकम् ॥

Colophon:

इति षष्ठाध्यायः समाप्तः ॥

शुभमस्तु ॥

Subject: Bṛhadāraṇyakopaniṣad bhāṣya Vārtika. Sixth Adhyāya.

Remarks:—On the title page the following is given in Mahrathi language:

" हे पुस्तक श्रीमन्त राजेश्री शरभोजी महाराज साहेब यांच्या कारकर्तीन्त काशीदेशाहून खरीदी करून आणिले असें "

This Ms. is purchased and brought down to Tanjore from Benares with the great help and patronage of King Serfoji of Tanjore 1800-32 A. D. The Ms. is very old and is too delicate to handle.

## ॥ बृहदारण्यकोपनिषद्दीपिका ॥

## 1537. BṚHADĀRAṆYAKOPANIṢAD DĪPIKĀ.

J. L. Collection No. 160. Substance—Paper. Size—10⅜×4¼ inches. Sheets—187. Lines—10 to 13 to a Page. Script—Devanāgarī. No. of Granthas—5000. Author—Śaṅkarānanda. Complete.

Beginning :

श्रीगणेशाय नमः । श्रीगुरुभ्यो नमः ।

श्रीयाज्ञवल्क्याय नमः ।

ब्रह्माधिकान्स्वावधिकानशेषा-

न्नत्वा गुरून् शङ्करवर्यमुख्यान् ।

नावं नदीनां रचयामि रम्या-

मारण्यकाब्धेस्तरणाय शीघ्रम् ॥

'प्रमाणमनधिगतार्थगन्तृ—' इति तावत्स्थितम् । ततो धर्माधर्मात्मानो भेदेन प्रमाणेन प्रतिपाद्यन्ते । तत्र भेदस्यावि-द्याजन्यत्वादविद्यायाश्चानुपमर्दनात्कर्मकाण्डमविद्याविषय-मस्याः समूलघातं घात(ता)योपनिषद्ब्रह्मविद्या तत्प्रतिपाद-को ग्रन्थ आरभ्यते । 'उषा वा' इत्यादिवाजसनेयिब्राह्म-णोपनिषत् । तत्रातिपुण्यैर्विद्योत्पत्तेः सर्वेषां पुण्यानाश्चा-श्वमेधस्य प्राधान्यादनाधिकारिभिस्तस्य कर्तुमशक्यत्वात्त-त्कथं तेषामपि तत्फलं स्यादिति मन्यमाना भगवती मातेव सानुकम्पा श्रुतिर्मानसत्वसाम्यादुपनिषदारम्भेऽश्वावयवेषु कालादिदृष्टिमाह । उषा ब्राह्मो मुहूर्तः । प्रातः वै प्रसिद्धः ॥

End :

तथागमप्रधानेन वादेन षष्ठे पुनार्निर्णीतो(ऽ)शेषविशेष-निर्मुक्तो(ऽ)वस्थात्रयातीतः स्वयंप्रकाशानन्दात्मेति मधुका-ण्डस्य याज्ञवल्क्यकाण्डस्य च समाप्तिः । इतःपरं खिलका-ण्डः प्रवर्तिष्यते ॥ खिलं नामोक्तेषु किञ्चित्परिशिष्टम् । तत्र ब्रह्मविद्यायां यद्यपि न किमपि परिशिष्टमस्ति तत्र क्रममुक्त्यर्थान्युपासनानि सर्वशेषाश्चोङ्कारे(?)दमादयः ।

प्राणादानि गुणाश्रमं कर्मादि(?)वावशिष्यते । तदर्थ-
खिलारम्भ अविरुद्धः

Colophon:

इति षष्ठाध्यायस्य षष्ठं ब्राह्मणम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दपूज्यपादशिष्यस्य
शङ्करानन्दभगवतः कृतौ बृहदारण्यकदीपिकायां
चतुर्थोऽध्यायः समाप्तः ॥

संवत् १६७३ समये ज्येष्ठवदिप्रतिपदा पुस्तकसमाप्तजातम् ॥

Subjcet: Bṛhadāraṇyakopaniṣaddīpikā—a commentary on this Upaniṣad according to the Advaita school of philosophy. 3-6 (1-4) Adhyāyas.

Remarks:—On the title page the following is given:

श्रीमुद्गलेश्वरदीक्षितानां इदं पुस्तकं रङ्गभट्टभट्टगोस्वामिनाम् ।

The Ms. is very old and is in a fairly good condition. It is damp in appearance. The Ms. is dated Saṃvat 1673 which might be Śaka 1673 or 1751 A. D.

## ॥ बृहदारण्यकोपनिषद्दीपिका ॥

## 1538. BṚHADĀRAṆYAKOPANIṢAD DĪPIKĀ.

Burnell's Catalogue No. 9737. Page 34. Left column.

Substance—Palm leaf. Size—20 × 1½ inches. Leaves—24. Lines—11 to a Page. Script—Telugu. No. of Granthas—1300. Author—Śaṅkarānanda. Fourth Adhyāya only—Incomplete.

Beginning:

नमः सवित्रे द्वाराय मुक्तेरमिततेजसे ।
............दाय त्रयीधाम्ने च ते नमः ॥
निर्जित्य वादसमये ऋषीन्सर्वानुपस्थितान् ।
गावो येनाहृतास्तस्मै नमोऽस्तु ब्रह्मरातये ॥

ॐ पञ्चमाध्याये मधुकाण्डार्थः जल्पकथयोक्तः। तस्यै-वेदानीं महता तर्केण निर्णयार्थं वादकथारूपः षष्ठोऽध्याय आरभ्यते। आख्यायिका त्वाचारविध्य(सिद्धा)र्था। जनको नामतः। ह किल। वैदेहः विदेहानामधिपतिः। कदाचित्स-वेजनावसरार्थं राजासने आसाञ्चक्रे उपविष्टवान् ॥

End :

अन्यद्वृत्तं अन्यदाश्रमादाश्रमान्तरं सन्यासाख्यमुपाक-रिष्यन् स्वीकरिष्यन्॥ (मैत्रेयीति) होवाच। याज्ञवल्क्यः प्रव्राजिष्यन् अरे अस्मात्स्थानादस्मि हन्त तेऽनया कात्या-यन्यान्तं करवाणीति । २ ॥ २ ॥

सा होवाच मैत्रेयी यन्नु म इयं भगोः सर्वा पृथिवी वि-त्तेन पूर्णा स्यात् स्यान्न्वहं तेनामृताहो किल नेति (नेति) होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति ॥ ३ ॥...॥

Colophon : Nil.

Subject : Bṛhadāraṇyakopaniṣad dīpikā. Sixth Adhyāya (Fourth Adhyāya).

Remarks :—The Ms. is very old and is in a fairly good condition, though some leaves are here and there broken off. Regarding this Ms. Dr. Burnell says that this 'Bṛhadāraṇyakabhāṣya' and 'the author's name does not appear.' Evidently it is Śaṅkarānanda's Bṛhadāraṇyakopaniṣaddīpikā as noted above. This Ms. breaks off in the beginning of the fifth brāhmaṇa.

## ॥ मैत्रेयिब्राह्मणभाष्यतात्पर्यदीपिका ॥

## 1539. MAITREYĪBRĀHMAṆA BHĀṢYA TĀTPARYA DĪPIKĀ.

Burnell's Catalogue No. 9757. Page 35. Left column.

Substance—Palm leaf. Size—16 × 1½ inches. Leaves—13 (144-156). Lines—6 to a Page. Script—Telugu. No. of Granthas—175. Author—Mahādevendrasarasvatī. Complete.

Beginning :

प्रणम्य श्रीगुरून्भक्त्या क्रियते पद्यरूपिणी ।
मैत्रेयीब्राह्मणालम्बिभाष्यतात्पर्यदीपिका ॥

प्रत्यग्वस्तुब्रह्मविद्यैकगम्यं
विद्या हृद्या सापि वेदान्तवेद्या ।
तस्मात्कर्म त्याज्यमेवात्मकामै-
रित्याचष्टे याज्ञवल्क्यः प्रियायै ॥
अत्राहुर्ये ब्राह्मणानामृणानि
त्रीणि प्रोक्तान्यागमेनादरेण ।
तस्मात्कर्म ब्रह्मविद्यासहायं
यावज्जीवं कार्यमेवेति केचित् ॥
यो यो लोकः पुत्रवित्तादिलभ्यो
लब्धव्योऽयं प्रत्यगेवानिशं नः ।
तत्किं पुत्रैः कर्मभिर्वा स्वधीते-
र्वेदैः किं(वा) कुर्म इत्यस्तु तर्कैः ॥
कार्यं कर्म त्याज्यमित्यस्त्युवाच
श्रौतं वाक्यं तद्विरुद्धं विभाति ।
किं किं साध्यं विद्यया कर्मणेती-
त्युक्तः पुत्रं सूतकृच्चैवमाह ॥
जन्तुर्नित्यं बध्यते कर्मणायं
मुक्तिर्भूयाद्विद्यया तु क्षणेन ।
तस्मान्नैके कर्म कुर्वन्त्यभिज्ञा
मन्दास्त्वन्ये कर्म कुर्युस्सदेति ॥

End:

एतावदेवामृतसाधनं ते
मैत्रेयि नान्यद्भुवनत्रयेऽपि ।
एवं प्रियां तामनुशास्य मौनी
स याज्ञवल्क्योऽथ जगाम शान्तिम् ॥
श्रीमत्कृष्णपराशरपाराशर्यार्यभगवदङ्घ्रिमुखान् ।
अस्मद्गुरुवररूपानाचार्याननन्तरनुकलं कलये ॥ १४८ ॥
क्व भाष्यमतिगम्भीरं क्व चाहमतिमन्दधीः ।
तथापि परया भक्त्या यथावगतमीरितम् ॥ १४९ ॥
ॐ श्रीगुरुभ्यो नमः । शुभमस्तु ॥ श्रीरामाय नमः

Colophon: Nil.

Subject: Maitreyībrāhmaṇa bhāṣyadīpikā—a metrical treatise based on the Fourth Brāhmaṇa of the Second Adhyāya of the Bṛhadāraṇyakopaniṣad. 1-149 verses.

Remarks:—On the label of this Ms. the following is given:— " मैत्रेयीब्राह्मणभाष्यं श्लोकरूपं रक्षनाथयोगिकृतम् " ॥ which is here rather misleading. The Ms. is in a fairly good condition.

## ॥ मैत्रेयिब्राह्मणभाष्यतात्पर्यदीपिका ॥

## 1540. MAITREYĪBRĀHMAṆA BHĀṢYA TĀTPARYA DĪPIKĀ.

P. A. Collection No. 5. Substance—Paper. Size—7½ × 3½ inches. Sheets—19. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—280. Author—Mahādevendrasarasvatī. Complete.

Beginning, end and subject—Same as No. 1539.

Colophon:

इति श्रीमैत्रेयीब्राह्मणभाष्यतात्पर्यदीपिका महादेवेन्द्रसरस्वती-
कृता समाप्ता ॥ श्रीकृष्णार्पणमस्तु ॥

Remarks :—The Ms. is in a fairly good condition.

## ॥ ब्रह्मविद्योपनिषद्दीपिका ॥

## 1541. BRAHMAVIDYOPANISAD DĪPIKĀ.

J. L. Collection No. 164 b. Substance—Paper. Size—11⅝ × 5⅛ inches. Sheets— 2 (23 & 24). Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—55. Author—Nārāyaṇāśramin. Complete.

Beginning:

ब्रह्मो(ह्मविद्यो)पनिषदारभ्यते— ब्रह्मविद्यामिति । ब्रह्म-
विद्यां प्रवक्ष्यामीति श्लोकः क्वचिदेवादौ पठ्यते । ब्रह्मप्र-
णवस्तस्य विज्ञानं तां किम्भूतां सर्वेषां ज्ञानं ज्ञानोपायभूतां
प्रणवेन ब्रह्मणि ज्ञाते सर्वस्य विज्ञानात्तथा यत्र विद्यायां
देवत्रयादुत्पत्तिलयं चकारात्पालनं च वक्ष्यामीति पूर्वेणा-
न्वयः । श्रुतेः प्रतिज्ञेयम् । प्रसादेति ॥ विष्णोर्ब्रह्मविद्या-
या रहस्यं ध्रुवाग्निः प्रणवतेज इति सम्प्रचक्षते । बुधा इत्य-
न्वयः । विष्णुनेयं विद्या प्रवर्तितेत्यर्थः ॥

End:

कीदृशं लयलक्षणम् ।
"अपुनर्वा समोत्थानाल्लयो विषयविस्मृति"रिति । यद्वा
(यतो वाचो निवर्तन्त)इत्यर्थः । उपसंहरति —ध्रुवमिति ॥
ध्रुवमोङ्कारं हि ब्रह्म चिन्तयेत् । ध्रुवमेकरूपं वा एकाग्रतया
वा ब्रह्म चिन्तयेत् । द्विरुक्तिः समाप्त्यर्था ॥

नारायणेन रचिता श्रुतिमात्रोपजीविना ।

अस्पष्टपदवाक्यानां दीपिका ब्रह्मवेदने ॥

Colophon:

ब्रह्मो(ह्मविद्यो)पनिषद्दीपिका समाप्ता ॥

श्रीकृष्णार्पणमस्तु ॥

Subject: Brahmavidyopaniṣad dīpikā—a gloss on this Upaniṣad, according to the Advaita school of Philosophy.

Remarks :— The Ms. is old and is in a fairly good condition. The sheets are here and there rat-eaten. For the other works contained in this Ms. see the list under Remarks on No. 1429.

॥ ब्रह्मोपनिषद्दीपिका ॥

## 1542. BRAHMOPANISAD DĪPIKĀ.

Burnell's Catalogue No. 9753 h. Page 34. Left column. Substance—Palm leaf. Size—$16\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—8 (155-162 out of 167). Lines—5 or 6 to a Page. Script—Telugu. No. of Granthas—200. Author—Śaṅkarānanda. Complete.

Beginning:

हरिः ॐ ॥

ब्रह्मोपनिषदं नाम ब्रह्मात्म्यैक्यावबोधिनीम् ।

व्याकरिष्यामि तेनेदं ब्रह्म तुष्यतु सर्वगम् ॥

त्वं ब्रह्मासीत्युक्ते अधिकारिणः कर्तृत्वादिविपरीतज्ञानवतः अयोग्यत्वेन न बोधो जायते । ततोऽन्यबोधोत्पादनार्थं नाभ्यादिस्थानान्युरीकृत्य विविधोपायानाह । अथ । उपनिषदारम्भे श्रुत्या मङ्गलप्रयोजनोऽथशब्दोऽधिकारिणमाह । अधिकारिसम्पत्त्यनन्तरं ब्रह्मविद्यासेवायां कथयिष्यामीति शेषः । अस्य बुद्धद्र(द्रे)ष्टुः स्वयम्प्रकाशस्य पुरु-

षस्य परिपूर्णस्य उपशब्दार्थानि चत्वारि स्थानानि भव-
न्ति । स्पष्टम् ॥

End :

उपनिषत्पदम् । सदेरुपनिपूर्वस्य संसारविनाशार्थस्य
ब्रह्मगत्यर्थस्य अविद्यादिबन्धशिथिलीकरणार्थस्य च ब्रह्म-
ज्ञानमन्तरेणासम्भवात् उपनिषत् ब्रह्मज्ञानं तस्य पदं विषयः
ब्रह्मज्ञानैकबोध्यमित्यर्थः । तत् ब्रह्मोपनिषत्पदं व्याख्या-
तम् । पदाभ्यास उपनिषत्समाप्त्यर्थः । इतिशब्दस्यो-
(ब्रो)पनिषत्समाप्त्यर्थः ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशि
ष्यस्य श्रीशङ्करानन्दभगवतः कृतिः ब्रह्मो-
पनिषद्दीपिका समाप्ता ॥

Subject: Brahmopaniṣad dīpikā—a commentary on Brahmopaniṣad, according to the Advaita school of philosophy.

Remarks :—For the other works contained herein see the list under Remarks on No. 1411. The Ms. is in good condition.

## ॥ ब्रह्मोपनिषद्दीपिका ॥

## 1543. BRAHMOPANIṢAD DĪPIKĀ.

Burnell's Catalogue No. 9754 l. Page 34. Left column.
Substance—Palm leaf. Size—$19\frac{1}{4} \times 1\frac{3}{8}$ inches. Leaves—4 (45-48 out of 69). Lines—11 to a Page. Script—Telugu. No. of Granthas—200. Author—Śaṅkarānanda. Complete.

Beginning, end, colophon and subject—Same as No. 1542.

Remarks :—The Ms. is in good condition. For the other works contained in this Ms. see the list under Remarks on No. 1428.

## ॥ ब्रह्मोपनिषद्दीपिका ॥

## 1544. BRAHMOPANIṢAD DĪPIKĀ.

Burnell's Catalogue No. 9755 c (b). Page 34. Left column. Substance—Palm leaf. Size—18×1½ inches. Leaves—8 (124-131). Lines—8 to a Page. Script—Telugu. No. of Granthas—200. Author—Śaṅkarānanda. Complete.

Beginning, end, colophon and subject—Same as No. 1542.

Remarks :—The Ms. is is in a fairly good condition. Besides this work, this Ms. contains two other works—

(1) अमृतबिन्दूपनिषद्दीपिका । and (2) कैवल्योपनिषद्दीपिका ॥

## ॥ ब्रह्मोपनिषद्दीपिका ॥

## 1545. BRAHMOPANISAD DĪPIKĀ.

J. L. Collection No. 164 i. Substance—Paper. Size—11⅝×5⅜ inches. Sheets—6 (52-57). Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—Nārāyaṇāśramin. Complete.

Beginning :

ब्रह्मोपानिषदारम्य ब्रह्मज्ञानप्रदायिनी ।
चतुःखण्डा च दर्शिनी शमिनां हृदयङ्गमा ॥

इदानीं चतुरवस्थस्य चतुः स्थानस्य चतुर्ध्यानास्पदस्यात्मनो निर्गुणध्यानसिद्धये स्वरूपं ससन्न्यासं वक्तव्यमिति ब्रह्मोपनिषदारभ्यते—'ॐ शौनक' इति। ॐ अथास्य पुरुषस्य चत्वारि स्थानानि भवन्ति— नाभिर्हृदयं कण्ठं मूर्धेति च । तत्र चतुःपादं ब्रह्म विभातीति ग्रन्थो द्वितीयखण्डादौ पठितः । प्रथमखण्डादावपि केचित्पठन्ति । स पाठो नातिप्रयोजनः । अर्थसम्बन्धाभावात् । महाशालो

महत्त्वः शाला ग्रहाग्रभागाः यस्य सः तथा अङ्गिरसं गो-
त्रतः, अपत्यापत्यवतोरभेदोपचारात्। पिप्पलादं नामतः।
अपृच्छन् पृष्टवान्। प्रश्नानाह। दिव्यदि(इ)ति।

End:

इदानीमेतद्ग्रन्थस्य नाम निर्वक्ति—आत्मेति। ब्रह्मात्मा
तस्योपनिषद्विद्या सैव तपः 'यस्य ज्ञानमयं तप' इति श्रुतेः।
तस्य मूलं परं कारणमयं ग्रन्थ इत्युपचाराद्ग्रन्थोऽपि ब्रह्मो-
पनिषदित्यर्थः। तत्तस्मान्निरुक्त्यनन्तरमाह—सर्वेति। सर्वे
ब्रह्मेत्युपनिषत् रहस्यज्ञानं यस्याः सा। ब्रह्मोपनिषदि-
त्यर्थः। द्विरुक्तिः समाप्त्यर्था। इति शब्दश्च तद्द्योतकः॥

नारायणेन रचिता श्रुतिमात्रोपजीविना॥
अस्पष्टपदवाक्यानां ब्रह्मोपनिषद्दीपिका॥

Colophon:

इति ब्रह्मोपनिषद्दीपिका समाप्ता॥

Subject: Brahmopaniṣad dīpikā—a commentary on this Upaniṣad, according to the Advaita school of Philosophy. 1—4 Sections.

Remarks:—For the other works contained herein see Remarks on No. 1429. The Ms. is old and is in a fairly good condition. The sheets are here and there rat-eaten. Nārāyaṇāśramin, while commenting this Upaniṣad, adopts a division into four sections of which the commentary on the first section is not found in Śaṅkarānanda's work. Compare Nos. 1542, 1543 & 1544.

## ॥ महोपनिषद्दीपिका ॥

## 1546. MAHOPANIṢAD DĪPIKĀ.

J. L. Collection. No. 164 h. Substance—Paper. Size—11⅝ × 5⅛ inches. Sheets—3 (50-52). Lines—11 or 12 to a Page.

Script—Devanāgarī. No. of Granthas—80. Author—Nārāyaṇāśramin. Complete.

Beginning :

श्रीगणेशाय नमः । निर्विघ्नमस्तु ।

नारायणः सर्वमहास्तद्विद्यापि तथोच्यते ।

चतुःखण्डा च नवमी (श्री)महोपनिषत्स्मृता ॥

एक एव नारायणो देवस्तत्कार्यं च सर्वं तद्रूपमेव स एव वा । द्वितीयः स च तत्परायणैर्योगिभिर्हृत्पुण्डरीके ध्येय इति वक्तुं महोपनिषदारभ्यते । तथेति । तदुक्तं याज्ञवल्क्येन ।

" अथवा परमात्मानं परमानन्दविग्रहम् ।

गुरूपदेशाद्विज्ञाय पुरुषं कृष्णपिङ्गलम् ॥

ब्रह्म ब्रह्मपुरे वासि(न्) दहराख्यखमध्यमे ।

अभ्यासात्सम्प्रपश्यन्ति सन्तः संसारभेषजम् " इति ।

अथातो महोपनिषदमेव व्याख्यास्याम इति शेषः । तदाहुः पुराविदः । ह ऐतिह्ये । वै प्रसिद्धौ । नारासु अयनं यस्य स नारायणः ॥

End :

पुरुषयुगादिति । मातृतः पितृतश्च सप्तमात्पुरुषादारभ्यार्वाग्यावन्तस्तान्नरकादुद्धरति । हिरण्यगर्भः प्रथमजः । आवृत्तिः फलविसंवादाय । इतिशब्दः समाप्त्यर्थः । यद्यपि

"शिवस्य हृदयं विष्णुः विष्णोश्च हृदयं शिवः ।

अन्तरं नैव पश्यामि केशवस्य शिवस्य च ॥ "

इत्यादि स्मृतेः प्रत्येकमेकत्वप्रतिपादकश्रुतेश्च हरिहरयोरुपासने फलतोऽर्थतश्च न भेदस्तथापि शिवसरण्या प्रवृ-

स्तानामथर्वशिर आद्युक्तं । ध्यानकेशवसरण्या प्रवृत्तानां
महोपनिषदाद्युक्तमिति विवेकः ॥
नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्टपदवाक्यानां महोपनिषद्दीपिका ॥

Colophon:

इति महोपनिषद्दीपिका समाप्ता ॥ ९ ॥
श्रीरामार्पणमस्तु ॥

Subject: Mahopaniṣaddīpikā—a commentary on this Upaniṣad, according to the Advaita school of philosophy. 1—4 Sections.

Remarks:—For the other works contained herein see the list under Remarks on No. 1429. The Ms. is old and is in a fairly good condition though the sheets are here and there rat-eaten.

## ॥ माण्डूक्योपनिषद्भाष्यम् ॥

## 1547. MĀṆḌŪKYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 6541. Page 34. Right column. Substance—Paper. Size—13⅞ × 5⅞ inches. Sheets—22. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Śaṅkarācārya. Complete.

Beginning:

श्रीगणेशाय नमः ॥
प्रज्ञानांशुप्रतानैः स्थिरचरनिकरव्यापिभिर्व्याप्य लोकान्
भुक्त्वा भोगान् स्थविष्ठान् पुनरपि धिषणोद्भासितान् कामजन्यान् ।
पीत्वा सर्वान् विशेषान् स्वपिति मधुरभुङ्मायया मोहयन्नो
मायासङ्ख्यातुरीयं परममृतमजं ब्रह्म यत्तन्नतोऽस्मि ॥ १ ॥
यो विश्वात्मा विधिजविषयान् प्राश्य भोगान्स्थविष्ठान्
पश्चाच्चान्यान् स्वमतिविभवान् ज्योतिषा स्वेन सूक्ष्मान् ।

सर्वान्तेतान् पुनरपि शनैः स्वात्मनि स्थापयित्वा
हित्वा सर्वान् [विशेषान् वि]गतगुणगणः पात्वसौ नस्तुरीयः ॥१॥

हरिः ॐ ॥

ॐ मित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं । वेदान्तार्थसारसङ्ग्रहभूतमिदं प्रकरणचतुष्टयं ॐमित्येदक्षरमित्याद्यारभ्यते। अत एव पृथक्सम्बन्धाभिधेयप्रयोजनानि न वक्तव्यानि । यान्येव तु वेदान्ते सम्बन्धाभिधेयप्रयोजनानि तान्येवेहापि भवितुमर्हन्ति; तथापि प्रकरणव्याचिख्यासुना सम्क्षेपतो वक्तव्यानीति मन्यन्ते व्याख्यातारः। * * * *

द्वैतप्रपञ्चस्याविद्याकृतत्वाद्विद्यया तदुपशमः स्यादिति ब्रह्मविद्याप्रकाशनायास्यारम्भः क्रियते ।
'यत्र हि द्वैतमिव भवति' 'यत्र वा अन्यदिव स्यात्तत्रान्योऽन्यत्पश्येद् (अन्योऽन्यद्वि)जानीयात्'। 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येद्विजानीया' दित्यादिश्रुतिभ्योऽस्यार्थस्य सिद्धिः। तत्र तावदोङ्कारनिर्णयाय प्रथमं प्रकरणमागमप्रधानमात्मतत्त्वप्रतिपत्त्युपायभूतम्। यस्य द्वैतप्रपञ्चोपशमे अद्वैतप्रतिपत्तिः रज्वामिव सर्पादिविकल्पोपशमे रज्जुतत्त्वप्रतिपत्तिः । तस्य द्वैतस्य हेतुतो वैयर्थ्य(तथ्य) प्रतिपादनाय द्वितीयं प्रकरणम् । तथा अद्वैतस्यापि वैतथ्यप्रसङ्गप्राप्तौ युक्तितः तथात्वप्रतिपादनाय तृतीयं प्रकरणम् । अद्वैतस्य तथात्वप्रतिपत्तिविपयभूतानि यानि वादान्तराण्यवैदिकानि सन्ति तेषामन्योन्यविरोधित्वादतथार्थत्वेन तदुपपत्तिभिरेव निरा-

करणाय चतुर्थं प्रकरणम् । कथं पुनरोङ्कारनिर्णय आत्मतत्त्वप्रतिपत्त्युपायत्वं प्रतिपद्यत इत्युच्यते— 'ॐ मित्येतत् । एतदालम्बनं श्रेष्ठम् । एतद्वै सत्यकाम ०ॐ मित्यात्मानं युञ्जीत । ॐ मिति ब्रह्म । ॐकार एवेदं सर्व' मित्यादिश्रुतिभ्यः ॥

End :

अमात्रो(ऽ)नन्तमात्रश्च द्वैतस्योपशमः शिवः ।
ॐकारो विदितो येन स मुनिर्नेतरो जनः ॥ ६ ॥

इति माण्डूक्योपनिषत्समाप्ता ॥

सर्वद्वैतोपशमत्वादेव शिवः ॐकारो यथाव्याख्यातरूपो विदितो येन स एव परमार्थतत्त्वस्य मननान्मुनिः नेतरो जनः शास्त्रविदपीत्यर्थः ॥ ६ ॥

Colophon :

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंस-
परिव्राजकाचार्यशङ्करभगवतः कृतौ आगमशास्त्र-
विवरणे माण्डूक्यं प्रथमं प्रकरणं उपनिषत्समाप्ता ॥

श्रीशिवाय नमः श्रीरस्तु ॥

Subject: Māṇḍūkyopaniṣad kārikā bhāṣya—First Prakaraṇa known as Āgamaśāstra Vivaraṇa.

Remarks :—The Ms. contains also the Māṇḍukya Upaniṣad text and the Gauḍapādakārikas. The Ms. is in Excellent condition. The Paper is of English manufacture. Floral designs decorate the front and back pages.

## ॥ माण्डूक्योपनिषत्कारिकाभाष्यम् ॥

## 1548. MĀṆḌŪKYOPANIṢAD KĀRIKĀBHĀṢYAM.

Burnell's Catalogue No. 6315. Page 34. Right column.

Substance—Paper. Size—10¾×4½—inches. Sheets—13. Lines—10 to 12 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Śaṅkarācārya. Complete.

Beginning, end, colophon and subject—Same as No. 1547.

Remarks:—The beginning of the second section known as 'वैतथ्यप्रकरणम्' is given after the colophon. The last page contains 'पुस्तकं तुळजामहाराजस्य ॥' i.e. this Ms. belonged to Tulaja Mahārajā of Tanjore who reigned between 1765-87 A. D. The Ms. is old and is in a worn-out condition, since the sheets are almost worm-eaten.

## ॥ माण्डूक्योपनिषद्भाष्यम् ॥

## 1549. MĀṆḌŪKYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 9752 f. Page 34. Right column. Substance—Palm leaf. Size—18¼×1½ inches. Leaves—19 (140-158 out of 255). Lines—6 to a Page. Script—Grantha. No. of Granthas—400. Author—Śaṅkarācārya. Complete.

Beginning end, colophon and subject—Same as No. 1547.

Remarks:—The Ms. is in a fairly good condition. For the other works contained in this Ms. see the list under Remarks on No. 1438.

## ॥ माण्डूक्योपनिषद्भाष्यम् ॥

## 1550. MĀṆḌŪKYOPANIṢAD BHĀṢYAM.

S. S. Collection No. 13 f. Substance—Paper. Size—12¾×7¾ inches. Sheets—6. Lines—15 or 16 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Śaṅkarācārya. Complete.

Beginning, end, colophon and subject—Same as No. 1547.

Remarks:—The Ms. is old and is in a fairly good condition. For the other works contained in this Ms. see the list under Remarks on No. 1439.

## ॥ माण्डूक्यकारिकाभाष्यम् ॥

## 1551. MĀṆḌŪKYA KĀRIKĀ BHĀṢYAM.

S. S. Collection No. 13 g. Substance—Paper. Size—12¾ × 7¾ inches. Sheets—18. Lines—15 or 16 to a Page. Script—Devanāgarī. No. of Granthas—2250. Author—Śaṅkarācārya. Complete.

Beginning:

" वैतथ्यं सर्वभावानां स्वप्न आहुर्मनीषिणः ।
अन्तः स्थानात्तु भावानां संवृतत्वेन हेतुना ॥ १ ॥"

'ज्ञाते द्वैतं न विद्यते' इत्युक्तम् । 'एकमेवाद्वितीयं' इत्यादि श्रुतिभ्यः । आगममात्रं तत् 'तत्रोपपत्त्यापि द्वैतस्य वैतथ्यं शक्यतेऽवधारयितुमिति द्वितीयं प्रकरणमारभ्यते । वितथस्य भावो वैतथ्यं असत्वमित्यर्थः । कस्य ? सर्वेषां बाह्याध्यात्मिकानां भावानां पदार्थानां स्वप्न उपलभ्यमानानां । आहुः कथयन्ति मनीषिणः प्रमाणकुशलाः ॥

End:

"दुर्दर्शमतिगम्भीरमजं साम्यं विशारदम् ।
बुद्ध्वा पदमनानात्वं नमस्कुर्मो यथाबलम् ॥ ९९ ॥
अजमपि निजयोगं प्रापदैश्वर्ययोगा-
दगति च गतिमत्तां प्रापदेकं ह्यनेकं ।
विविधविषयधर्मग्राहि मुग्धेक्षणानां
प्रणतभयविहन्तृ ब्रह्म यत्तन्नमस्ये(न्नमस्ते) ॥ १०० ॥"

ईक्षपदं अनानात्वं नानात्ववर्जितं बुद्ध्वा अवगम्य
तद्भूताः सन्तो नमस्कुर्मः तस्मै पदायाव्यवहार्यमपि
व्यवहारगोचर(ता)मापाद्य यथाबलं यथाशक्यमि(शक्ती)त्यर्थः ॥

प्रज्ञावैशाखवेधक्षुभितजलनिधेर्वेदनाम्नोऽन्तरस्थं
भूतान्यालोक्य मग्नान्यविरतजननग्राहघोरे समग्रे(मुद्रे) ।
कारुण्या(दु)द्धारामृतमिदममरैर्दुर्लभं भूतहेतो-
र्यस्तं पूज्याभिपूज्यं परमगुरुममुं पादपा(तै)र्नतोस्मि ॥

यत्प्रज्ञालोकभासा प्रतिप(ह)तिमगमत्स्वान्तमोहान्धकारं(रो)
मज्जोन्मज्जच्च घोरे ह्यसकृदुपजनोदन्वति त्रासने मे ।
यत्पादावाश्रितानां श्रुतिशमविनयप्राप्तिरग्र्या ह्यमोघा
तत्पादौ पावनीयौ भवभयविनुदौ सर्वभावैर्नमस्ये ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपाद-
शिष्यस्य श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीमच्छङ्करभगवत्कृ-
(तः कृ)तौ गौडपादीयभाष्ये आगमशास्त्रविवरणे
अलातशान्त्याख्यश्च(ख्यं च)तुर्थं प्रकरणं
समाप्तम् ॥
श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥

Subject: Māṇḍūkyakārikā bhāṣya. Vaitathya, Advaita and Alātaśānti Prakaraṇas.

Remarks :—The Ms. is old and is in a fairly good condition. Two sheets are completely damaged. In this Ms. the Kārikās are written in the middle of the sheets. For the other works contained herein see the list under Remarks on No. 1439.

## ॥ माण्डूक्योपनिषद्दीपिका ॥

## 1552. MĀNDŪKYOPANISAD DĪPIKĀ.

Burnell's Catalogue No. 9753 e. Page 34. Right column.
Substance—Palm leaf. Size—$16\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—5 (80-84 out of 167). Lines—6 to a Page. Script—Telugu. No. of Granthas—110. Author—Saṅkarānanda.. Complete.

Beginning:

हरिः ॐ ॥

माण्डूक्योपनिषद्व्याख्यां करिष्ये पदचारिणीम् ।
ओमात्माभेदसम्बोधादानन्दात्मप्रकाशिनीम् ॥

नामनामिनोर्लोके भेदस्याप्रसिद्धत्वात् वस्तुतश्चोङ्कारस्य ब्रह्मविवर्तत्वात्, विवर्तानाश्च विवर्ताधिष्ठानेन भेदशून्यत्वात्, अत ॐङ्कारं ब्रह्मनामधेयं ब्रह्म दृष्ट्या(ऽ)ह—ॐ। अवति। ब्रह्मबुद्ध्या दृष्टो द्रष्टा(ष्टृ)नित्योमिति ॐङ्कारानुकरणार्थमेतत्। उक्तमोङ्काररूपं जगत्पर्णस्य शङ्कुस्थानीयं ब्रह्मणा तादात्म्यं प्राप्तं ब्रह्मणो विकारो नामधेयश्च ॥

End:

एवमुक्तेन मात्रातादात्म्येन ॐङ्कार आत्मे(त्मै)व स्पष्टम्। संविशति सम्यक् प्रवेशं करोति आत्मना ॐङ्कारेण आत्मानं आनन्दात्मस्वरूपं यः ॐङ्कार आत्मज्ञः। एवमुक्तेन प्रकारेण ॐङ्कारात्मनोस्तादात्म्यं वेद जानाति तदो(स्यो)ङ्काररूपानन्दात्मकप्राप्तिफलमर्थसिद्धिं(द्धं) ततः श्रुत्या नोक्तं। अथवा संविशत्यात्मनात्मानमितीदं फलवाक्यमस्तु॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यस्य

शङ्करानन्दभगवतः कृतौ माण्डूक्योपनिषद्दीपिका

समाप्ता । ॐ तत्सत् ॥

ॐ श्री साम्बशिवाय नमः । श्रीमद्गुरुभ्यो नमः ॥ श्रीरामाय नमः ॥

Subject: Māṇḍūkyopaniṣad dīpikā—a commentary on Māṇḍūkyopaniṣad excluding Gauḍapādakārikās, belonging to the Advaita system of Philosophy.

Remarks :—For the other works contained in this Ms. see the list under Remarks on No. 1441. The Ms. is in good condition.

॥ माण्डूक्योपनिषद्दीपिका ॥

## 1553. MĀNDŪKYOPANISAD DĪPIKĀ.

Burnell's Catalogue No. 9754 c. Page 34. Right column. Substance—Palm leaf. Size—19¼ × 1¾ inches. Leaves—2 (14 & 15 out of 69). Lines—12 to a Page. Script—Telugu. No. of Granthas—110. Author—Śaṅkarānanda. Complete.

Beginning, end, colophon and subject—Same as No. 1552.

Remarks :—The Ms. is in good condition. For the other works contained in this Ms. see the list under Remarks on No. 1428.

॥ माण्डूक्योपनिषद्दीपिका ॥

## 1554. MĀṆḌŪKYOPANIṢAD DĪPIKĀ.

T. S. Collection No. 112. Substance—Paper. Size—9¾ × 4¾ inches. Sheets—7. Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—110. Author—Śaṅkarānanda. Complete.

Beginning, end, colophon and subject—Same as No. 1552.

Remarks :—The Ms. is old and is in good condition.

## ॥ माण्डूक्योपनिषद्दीपिका ॥

## 1555. MĀṆḌŪKYOPANIṢAD DĪPIKĀ.

J. L. Collection No. 162. Substance—Paper. Size—$10\frac{1}{2} \times 3\frac{3}{4}$ inches. Sheets—3. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—110. Author—Śaṅkarānanda. Complete.

Beginning, end, colophon and subject—Same as No. 1552.

Remarks:—The Ms. is old and is in good condition.

## ॥ माण्डूक्योपनिषद्दीपिका ॥

## 1556. MĀṆḌŪKYOPANIṢAD DĪPIKĀ.

J. L. Collection No. 164 k. Substance—Paper. Size—$11\frac{5}{8} \times 5\frac{1}{8}$ inches. Sheets—82 (59-140). Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—3300. Author—Nārāyaṇāśramin. Incomplete (wants end).

Beginning :

श्रीकृष्णाय नमः ॥ हरिः ॐ ॥

नारायणपदद्वन्द्वपारायणपरायणः ।
नरं नारायणं नत्वा नरो नारायणाभिधः ॥ १ ॥
गौडपाद(दो)त्तराचार्यान् नत्वा श्रीशङ्करप्रभून् ।
आनन्दज्ञानयत्यादीन् कुरुते सारसङ्ग्रहम् ॥ २ ॥
माण्डूक्योपनिषदो गौडपादीयभाष्ययोः ।
तद्व्याख्याया असंक्षेपाद्बालव्युत्पत्तिसिद्धये ॥ ३ ॥

ॐमित्येतदक्षरमिदं सर्वमित्याद्या माण्डूक्योपनिषच्चतुः खण्डा[ः] । तां खण्डशः पठित्वा(ऽ)त्रैते श्लोका भवन्तीति चतुःपर्यायैः गौडपादाचार्या नारायणो(णा)नुग्रहेण श्लोकरचनया व्याचक्षिरे । तेन श्रुतितद्व्याख्याघटितं प्रथमं

प्रकरणं श्रुतिप्रायमेवेति। तत्र छान्दसानामुपनिषद्व्यवहारः प्रवृत्तः। एवं तद्विचारात्मकोत्तरप्रकरणत्रयेऽपि वेदान्तार्थसारसङ्ग्रहभूतमिदं प्रकरणचतुष्टयं। अत एव न पृथक् सम्बन्धाभिधेयप्रयोजनानि वक्तव्यानि ॥

"शास्त्रैकदेशसम्बन्धं शास्त्रकार्यान्तरे स्थितम्।
आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः" इति
लक्षणयोगादेषां चतुर्णां प्रकरणता ॥

* * * * * *

आकाशादेरविशेषात्तस्य च सर्वात्मत्वेनात्मवत् तत्कार्यत्वव्याघातात्तेन प्रथमप्रकरणार्थः प्रागुक्तो न युक्त इत्यत [आह]आह—ॐमित्येतक्षरमिदं सर्वमिति। ॐमित्येदक्षरमुद्दिश्य सर्वात्मत्वं न विधीयते। किं तु सर्वमुद्दिश्योङ्कारत्वम्, प्रसिद्धस्योद्देश्यत्वात् ॥

End:

'यदा न जायते चित्त'मिति कालपरिच्छेदस्य प्रतीतेरागन्तुकत्वमाशङ्क्य परिहरति— अनिमित्तस्येति ॥ चित्तस्य हि निमित्त एवेति व्यवहारस्य कल्पितत्वेऽपि तदुपलक्षितस्वरूपस्याकल्पितत्वात्।

* * * * * *

तदिदानीं प्रपञ्चयति—बुद्ध्वेति। द्वैताभावोपलक्षितां सचामनाद्यन्तां परमार्थभूतां प्रतिपद्य देवादियोन(नि)प्राप्तौ धर्मादिहेतुमसाङ्कर्येण अननुतिष्ठन् यदा विद्वानवतिष्ठते, तदा...................................... ॥

Colophon: (Sheet No. 122).

इति श्रीनाथात्मजभट्टरत्नाकरसूनुनारायणविरचि-

ताद्वैताख्यप्रकरणेऽस्पर्शयोगे दीपिका समाप्ता ॥

Subject: Māṇḍūkyopaniṣad dīpikā. 1-4 Prakaraṇas.

Remarks:—The Ms. is old and is in a fairly good condition. The sheets are here and there rat-eaten. This Ms. breaks off in the commentary on the 77th Kārikā of the last Prakaraṇa—Alātaśāntiprakaraṇa. For the other works contained in this Ms. see the list under Remarks on No. 1429.

## ॥ मुण्डकोपनिषद्भाष्यम् ॥

## 1557. MUṆḌAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 6540. Page 35. Left column.

Substance—Paper. Size—13⅞ × 5⅞ inches. Sheets—40. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—780. Author—Śaṅkarācārya. Complete.

Beginning:

श्रीगणेशाय नमः ॥

हृदयं कौस्तुभोद्भासि विष्णोः फुल्लाननश्रियः ।
राधाप्रवेशरोधाय दत्तमुद्रमिव श्रिया ॥ १ ॥

'ॐ ब्रह्मा देवाना' मित्याद्याथर्वणोपनिषद(त्) व्याचिख्यासिता । अस्या विद्यासम्प्रदायकर्तृपारम्पर्यलक्षणं सम्बन्धमादावेवाह स्वयमेव स्तुत्यर्थं—एवं हि महद्भिः परमपुरुषार्थसाधनत्वेन गुरुणा(ऽ)यासे न लब्धा विद्येति। श्रोतृबुद्धिप्ररोचनाय विद्यां महीकरोति । स्तुत्या प्ररोचितायां हि विद्यायां सादराः प्रवर्तेयुरि(रन् इ)ति । प्रयोजनेन तु विद्यायाः साध्यसाधनलक्षणसम्बन्धमुत्तरत्र वक्ष्यति—'भिद्यते हृदयग्रन्थि'रित्यादिना ॥

End:

तदेतदक्षरं पुरुषं सत्यमृषिरङ्गिरा नाम पुरा पूर्वं शौनकाय विधिवदुपसन्नाय पृष्टवते उवाच। तद्वदन्योऽपि तथैव श्रेयोऽर्थिने मुमुक्षवे मोक्षार्थं विधिवदुपसन्नाय ब्रूयादित्यर्थः॥ नैतद्ग्रन्थरूपमचीर्णव्रतोऽचरितव्रतः नाप्यधीते न पठति चीर्णव्रतस्य हि विद्या फलाय संस्कृता भवतीति समाप्ता॥ ब्रह्मविद्या सा येभ्यो ब्रह्मादिभ्यः पारम्पर्यक्रमेण सम्प्राप्ता तेभ्यो नमः परमऋषिभ्यः परमऋषिभ्यः परब्रह्म साक्षाद्दृष्टवन्तो ये ब्रह्मादयोऽवगतवन्तश्च ते परमर्षयस्तेभ्यो भूयोऽपि नमः। द्विर्वचनमत्यादरार्थं मुण्डकसमाप्त्यर्थं च॥

Colophon:

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकस्य श्रीशङ्करभगवतः कृतावथर्वणोपनिषन्मुण्डकविवरणं समाप्तम्॥

श्रीशिवाय नमः॥ मुण्डकोपनिषद्भाष्यं समाप्तम्॥

Subject: Muṇḍakopaniṣad bhāṣya—belonging to Advaita school of Philosophy. 1–3 Muṇḍakas.

Remarks:—The Ms. is in excellent condition. Floral designs decorate the front and back pages. The Paper is of English Manufacture, nearly 100 years old.

## ॥ मुण्डकोपनिषद्भाष्यम्॥

## 1558. MUṆḌAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 9752 e. Page 35. Left column. Substance—Palm leaf. Size—18¼ × 1½ inches. Leaves—32. (108-139 out of 255). Lines—6 to a Page. Script—Grantha. No. of Granthas—780. Author—Śaṅkarācārya. Complete.

Beginning, end and subject—Same as No. 1557.

Colophon :

इति श्रीमत् + अथर्वणोपनिषद्विवरणं समाप्तम् ॥

Remarks:—The Ms. is in good condition. For the other works contained in this Ms. see the list under Remarks on No. 1438.

## ॥ मुण्डकोपनिषद्भाष्यम् ॥

## 1559. MUṆḌAKOPANIṢAD BHĀṢYAM.

J. L. Collection No. 163. Substance—Paper. Size—$10\frac{1}{2} \times 5\frac{1}{2}$ inches. Sheets—41. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—780. Author—Śaṅkarācārya. Complete.

Beginning, end, colophon and subject—Same as No. 1557.

Remarks:—The Ms. is old and is worm-eaten.

## ॥ मुण्डकोपनिषद्भाष्यम् ॥

## 1560. MUṆḌAKOPANIṢAD BHĀṢYAM.

S. S. Collection No. 13 e. Substance—Paper. Size—$12\frac{3}{4} \times 7\frac{3}{4}$ inches. Sheets—12. Lines—15 or 16 to a Page. Script—Devanāgarī. No. of Granthas—786. Author—Śaṅkarācārya. Complete.

Beginning, end, colophon and subject—Same as No. 1557.

Remarks:—The Ms. is old and is in a fairly good condition. For the other works contained in this Ms. see the list under Remarks on No. 1439.

## ॥ मुण्डकोपनिषद्दीपिका ॥

## 1561. MUṆḌAKOPANIṢAD DĪPIKĀ.

Burnell's Catalogue No. 9753 d. Page 35. Left column.

Substance—Palm leaf. Size—$16\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—29 (51-79 out of 167). Lines—6 to a Page. Script—Telugu. No. of Granthas—675. Author—Śaṅkarānanda. **Complete.**

Beginning:

ॐ मुण्डकं मुण्डमार्गस्थब्रह्मात्मैक्यावबोधकम् ।
वक्ष्येऽहं शङ्कराचार्यमार्गेणैव पदे पदे ॥

ब्रह्मविद्याया अतिदुर्लभत्वं दर्शयितुमितिहासरूपेण श्रुतिः प्रथमतो गुरुपरम्परामाह । ब्रह्मा ब्रह्माण्डजो विधाता चतुराननः । देवानामग्न्यादीनां मध्ये प्रथमः पूर्व(ः) । संबभूव । सम्यगभूत् । ममाभिमानपुरस्सरं देहग्रहण-मकरोत् । ब्रह्मणो विशेषणमाह—विश्वस्य कर्ता—विश्वो-त्पादकः । किं कर्तेत्याशङ्क्य नेत्याह—भुवनस्य गोप्ता । निखिलस्य लोकस्य रक्षकः सृष्टिस्थितिसंहारेषु समर्थ इत्यर्थः । स उक्तो ब्रह्मा ब्रह्मविद्यां ब्रह्मणो देश-कालवस्तुपरिच्छेदशून्यस्य विद्या साक्षात्कारस्य अव्यव-हितं कारणं साक्षात्काररवता(?) सर्वविद्याप्रतिष्ठां नि-खिलविद्याधारभूतां अथर्वाय अथर्वणे ज्येष्ठपुत्राय ब्रह्मणः प्रथमपुत्राय । प्राह प्रकर्षेण साधनादिभिः सहोक्तवान् ॥

End:

नन्वाङ्गिरा अथर्वणशिरोव्रते पक्षपातमकरोत् । ततः सर्व-मन्यदन्यवचनमादेयन्ती (?) शिरोव्रतचरणमन्तरेणेत्यत आह । नैतन्मुण्डकग्रन्थरूपं अचीर्णव्रतं अकृतशिरोव्रतो-ऽध्यापि कश्चिदधीते नाध्ययनं कुरुते । तस्मान्नाङ्गिरसः पक्षपात इत्यर्थः । इदानीं ब्रह्मविद्यासम्प्रदायकर्तॄणां नम-स्कारमस्मद्धितार्थमाह—नमः । नमस्कारः । परमऋषि-

भ्यः उत्कृष्टऋषिभ्यो ब्रह्मादिभ्यो नमः । परमऋषिभ्यो

व्याख्यातं । वाक्याभ्यास उपनिषत्समाप्त्यर्थः ॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यस्य
श्रीशङ्करानन्दभगवतः कृतिः तृतीयमुण्डकोपनिषद्दीपिका
समाप्ता ॥

श्रीगुरुभ्यो नमः । श्रीसाम्बसदाशिवाय नमः ॥ अस्मद्गुरुभ्यो नमः ।

Subject: Muṇḍakopaniṣad dīpikā—a commentary on Muṇḍakopaniṣad, according to Advaita Philosophy.

Remarks:—The Ms. is in good condition. For the other works contained in this Ms. see the list under Remarks on No. 1441.

## ॥ मुण्डकोपनिषद्दीपिका ॥

## 1562. MUṆḌAKOPANIṢAD DĪPIKĀ.

J. L. Collection No. 164 a. Substance—Paper. Size—11⅝ × 5⅛ inches. Sheets—11 (1-11). Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—375. Author—Nārāyaṇāśramin. Incomplete.

Beginning:

श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः ।
श्रीगुरुभ्यो नमः । हरिः ॐ ॥

नारायणपदद्वन्द्वपारायणपरायणः ।
नरं नारायणं नत्वा नरो नारायणाह्वयः ॥ १ ॥
आथर्वणरहस्येषु नानाशाखान्वितेषु च ।
तनुते तनुवाक्येन निगूढार्थप्रदीपिकाम् ॥ २ ॥
चीर्णे शिरोव्रते ध्येयं तेन मुण्डकमुच्यते ।
खण्डषट्कं त्रिमुण्डञ्च शौनकीयं श्रुतेः शिरः ॥ ३ ॥

तत्रोपनिषदां तावदनुबन्धचतुष्टयम् ।

प्रेक्षावतां प्रवृत्त्यर्थमभिदध्मो गुरूक्तितः ॥ ४ ॥

अत्र क्षुद्रोपनिषत्स्वष्टाविंशतिरथर्वशाखीयानि । तदुक्तमथर्वपरिशिष्टे—"अष्टाविंशत्युपनिषदानि ब्रह्मवेदस्य ।" [प]मुण्डाः १. प्रश्नाः २. ब्रह्मविद्या ३. क्षुरिका ४. चुलिका ५. अथर्वशिरो ६. अथर्वशिखा ७. गर्भोपनिषद्. ८. महोपनिषद् ९. ब्रह्मोपनिषद् १०. प्राणाग्निहोत्रं ११. नादबिन्दुः १२. ब्रह्मबिन्दुः १३. अमृतबिन्दुः १४. ध्यानबिन्दुः १५. तेजोबिन्दुः १६. योगशिखा १७ योगतत्त्वं १८. नीलरुद्रः १९. कालाग्निरुद्रः २० [द्वै]तापनीयोप० २१. एकदण्डी २२. सन्यासाविधिः २३. आरुणिः २४. हंसः २५. परमहंसः २६. नारायणोपनिषद् २७. वैतथ्यं २८, चेति । उपनिषद् ज्ञानं ; तादर्थ्यात् ग्रन्थोऽप्युपनिषदुच्यते । तस्य विषयो ब्रह्म । प्रयोजनं मुक्तिः । प्रयोजनेन विद्यायाः प्रकाश्यप्रकाशकलक्षणः सम्बन्धः । साधनचतुष्टयसम्पन्नोऽधिकारी । साधनानि यथा—इहामुत्रार्थ(फल)भोगविरागः । नित्यानित्यवस्तुविवेकः । शमदमादिसम्पत् । मुमुक्षुत्वं चेति ॥ विद्यायाः साम्प्रदायिकतावेदनाख्यायिकारूपमितिहासमाह— ब्रह्मा देवानामिति । ब्रह्मा विरिञ्चिः ॥

End:

कर्माण्यप्रवृत्तफलानि । विज्ञानमयश्चात्मा अविद्याकृतबुद्ध्याद्युपाधिमात्मत्वेन मन्ता जलादिषु सूर्यादिप्रतिबिम्बवदिह प्रविष्टो देहभेदेषु कर्मणां तत्फलार्थत्वात् । अथो

(तो) विज्ञानमयो विज्ञानप्राय आत्मा तिष्ठते उपाध्यपनये सति सर्वे परेऽव्यये ब्रह्मणि एकीभवन्ति । अविशेषत्वमापद्यन्ते । जलाद्याधारादपनय इव सूर्यादिप्रतिबिम्बाः सूर्यादौ घटापनय इवाकाशः महाकाशे । दृष्टान्तान्तरमाह—यथेति । आत्मदर्शनमविशेषात्मभावं गच्छन्ति प्राप्नुवन्ति । परादक्षरात्पूर्वोक्तात् परं दिव्यं पुरुषं यथोक्तलक्षणं उपैति उपगच्छति । ननु श्रय(स्यनेके विघ्नाः प्रसिद्धाः ॥)

Subject: Muṇḍakopaniṣad dīpikā.—an independent comentary on this Upaniṣad according to the Advaita school of philosophy. 1-3 Muṇḍakas. 1—6 Sections.

Remarks:—This Ms. abruptly ends with the commentary on the 8th Verse of the Second Khaṇḍa of the 3rd Muṇḍaka. For the other works contained herein see the list under Remarks on No. 1429. The Ms. is old and is in a fairly good condition though the sheets are here and there rat-eaten.

## ॥ मुण्डकोपनिषद्भाष्यटिप्पणम् ॥

## 1563. MUṆḌAKOPANIṢAD BHĀṢYA ṬIPPAṆAM.

T. S. Collection No. 109. Substance—Paper. Size—9¾ × 4¾ inches. Sheets—22. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—325. Author—Śivānandayatīśa(?). Complete.

Beginning:

श्रीगणेशाय नमः ॥

यदक्षरं परं ब्रह्म विद्यागम्यमितीरितम् ।
यस्मिन् ज्ञाते भवेज्ज्ञातं सर्वं तत्स्या(?)मसंशयम् ॥

ब्रह्मोपनिषद्भ्योपनिषदान्या (द्या) अथर्वणवेदस्य ब्रह्म (बह्व्य) उपनिषदः सन्ति । तासां शारीरके अनुपयोगि-

त्वेनाव्याचिख्यासितत्वात् 'अदृश्यत्वादिगुणको धर्मोक्ते' रित्याद्यधिकरणोपयोगितया मुण्डकस्य व्याचिख्यासितस्य प्रतीकमादत्ते— 'ब्रह्मा देवाना'मित्याद्याथर्वणोपनिषद्व्याचिख्यासितेति ॥

End:

यच्च प्रातिस्विकं स्वाविद्याकार्यं तस्य सर्वं ब्रह्मैव सम्पद्यत इत्याह—यानि चेत्यादिना । एतद्ग्रन्थद्वारकविद्याप्रदाने(ऽ)यं विधिराथर्वणिकानामिति प्रकृतपरामर्शा(र्शका)देतच्छब्दादवगम्यते । ग्रन्थद्वारेणैव विद्यायाः प्रकृतत्वसम्भवात् न सर्वत्र ब्रह्मविद्याप्रदान(नं) इति सूचयन्नाह— एतां ब्रह्म विद्यां वदेतेति ॥

Colophon :

इति मुण्डकस्य टिप्पणं भाष्यस्य ॥
श्रीसाम्बसदाशिवार्पणमस्तु ॥

Subject: Muṇḍakopaniṣad bhāṣya Ṭippaṇa—a brief commentary on Muṇḍakopaniṣad bhāṣya of Śaṅkarācārya.

Remarks :—The Ms. is old and is in good condition.

## ॥ रामपूर्वतापिन्युपनिषद्व्याख्या ॥

## 1564. RĀMAPŪRVATĀPINYUPANIṢAD VYĀKHYĀ.

T. S. Collection No. 171. Substance—Paper. Size—10 × 4¼ inches. Sheets—17 (2-18 first sheet wanting). Lines—9 to a page. Script—Devanāgarī. No. of Granthas—350. Author—? Incomplete.

Beginning :

......वेव सत्वाच्च देशतः परिच्छेदः । सर्वदैव सत्वाच्च कालतः परिच्छेदः । तद्व्यतिरेकेण वस्त्वन्तरा

भावाश्च वस्तुतः परिच्छेदः । हरौ अविद्यातत्कार्यंहारिणि जाते भक्तानामनुग्रहार्थं स्वीकृतलीलावतार इत्यर्थः ।

रामनामनिरुक्तिमाह— अखिलं रातीत्यादि । अत्र रामनाम्नो द्वे निरुक्ती अभिहिते । एका रातीत्यर्थक राशब्दात् । महीस्थितइत्यर्थके मकारे योजिते सति रामो भवति । अपरा राजत इत्यर्थकराशब्दान्मही-स्थित इत्यर्थकमकारे योजिते सति रामो भवतीति । तत्रै-षाक्षरयोजना—यो हरिः राति ददाति अखिलं भक्ताना-मिष्टं महीस्थितः सन्, तथा यो हरिः राजते महीस्थितः सन् स विद्वद्भिर्लोकेषु राम इति प्रकटीकृत इति सम्बधः । अक्षरसाम्यादिदं निरुक्तिद्वयम् । प्रकारान्तरेण रामनाम-निरुक्तिमाह—

राक्षसा येन मरणं यान्ति स्वोद्रेकतो(ऽ)थवा ।
रामनाम भुवि ख्यातमभिरामेण वा पुनः ॥

End:

ततः सिंहासनस्थस्सन्द्विभुजो रघुनन्दनः ।
धनुर्धरः प्रसन्नात्मा सर्वाभरणभूषितः ॥

ततो राज्याभिषेकानन्तरं सिंहासनस्थः सन् द्विभुजो रघुनन्दनः धनुर्धरो धनुरुपलक्षितो न तु हस्तस्थितचापः। द्वयोर्भुजयोर्वस्त्वन्तरधारणस्य वक्ष्यमाणत्वात् । प्रसन्नात्मा सर्वाभरणभूषितः आसीदिति शेषः ॥

मुद्रां ज्ञानमयीं याम्ये वामे तेजःप्रकाशनम् ।
धृत्वा व्याख्याननिरतश्चिन्मयः परमेश्वरः ॥

कीदृशो रामः याम्ये दक्षिणभुजे ज्ञानमुद्रां धृ......

Colophon: (Sheet No. 11).

इति तृतीयोपनिषत् ॥

Subject: Rāmapūrvatāpinyupaniṣadvyākhyā—an independent commentary on Rāmapūrvatāpinyupaniṣad, glorifying the Rāmāvatāra. 1—4 Upaniṣads.

Remarks:—This work abruptly ends in the middle of the commentary on the thirty-first stanza of the fourth Upaniṣad. Only a few lines are wanting in the beginning of this Ms. The Ms. is old and is in a fairly good condition though the letters are getting faded away.

## ॥ श्वेताश्वतरोपनिषद्भाष्यम् ॥

## 1565. ŚVETĀŚVATAROPANIṢAD BHĀṢYAM.

J. L. Collection No. 165. Substance—Paper. Size—11×4⅜ inches. Sheets—48. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—1125. Author—Śaṅkarācārya. Complete.

Beginning:

श्रीगुरुचरणारविन्दाभ्यां नमः ॥

नमस्यामि (गणेशानं) त्रयीविश्रुतवैभवम् ।
यं सिद्ध्यै शम्भुरानर्च पुरत्रयजयोद्यमे ॥

ॐ ब्रह्मवादिनो वदन्तीत्यादि श्वेताश्वतराणां मन्त्रोपनिषत् । तस्या अल्पग्रन्था वृत्तिरारभ्यते— ॐ ब्रह्मवादिनो वदन्ति ॥

"किं कारणं ब्रह्म कुतः स्म जाता
जीवाम केन क्व च सम्प्रतिष्ठा ।
अधिष्ठिताः केन सुखेतरेषु
वर्तामहे ब्रह्मविदो व्यवस्थाम् ॥"

ब्रह्मवादिनो ब्रह्मवदनशीलाः सर्वे सम्भूय वदन्ति। किं कारणं ब्रह्म, किमिति स्वरूपविषयोऽयं प्रश्नः। (अथवा कारणं ब्रह्म आहोस्वित्कालादि कालस्वभाव इति वक्ष्यमाणं।) अथवा किं कारणं ब्रह्म सिद्धरूपमुपादानरूपं किमित्यर्थः। अथ वा बृंहति बृंहयति तस्मादुच्यते परं ब्रह्मेति। श्रुत्यैव निर्वचनान्निमित्तोपादानयोरुभयोर्वा प्रश्नः। किं कारणं ब्रह्मेति। किं ब्रह्म कारणम्, आहोस्वित्कालादि। अथवा अ[यं]कारणमेव। कारणत्वेऽपि किं निमित्तम्, उतोपादानमथवा उभयम्॥

End :

यदा पुनः अपूर्वमनपरं नेति ने(ती)त्यादिलक्षणमशनायाद्यसंस्पृष्टमनुदितानस्तमितज्ञानात्मना(ऽ)वस्थितं पूर्णानन्दपरमात्मानं आत्मत्वेन साक्षाज्जानाति तदा निरस्ताज्ञानतत्कार्यः पूर्णानन्दो भवतीत्यर्थः। उक्तञ्च।

अज्ञानेनावृतं ज्ञानं + ज्ञाननिर्धूतकल्मषा इति ॥ २० ॥

तपः प्रभावाद्देवप्रसादाच्च + प्रकाशन्ते महात्मनः।

प्रकाशन्ते महात्मन इति॥

Colophon :

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यपरमहंसपरिव्राजकाचार्यश्रीमच्छङ्करभगवत्पादप्रणीते श्वेताश्वतरोपनिषद्भाष्ये षष्ठोऽध्यायः॥

Subject: Śvetāśvataropaniṣad bhāṣya, according to the Advaita system of Philosophy. 1—6 Adhyāyas.

Remarks :—The Ms. is old and is in good condition. The introductory portion of this bhāṣya available in print (No. 17 of the Ānandāśrama series, Poona,) is not given in this **Ms.** Also the bhāṣya on the last three verses of this Upaniṣad are

omitted in this Ms. The first verse given in the beginning might be the scribe's own.

## ॥ श्वेताश्वतरोपनिषद्दीपिका ॥

## 1566. ŚVETĀŚVATAROPANIṢAD DĪPIKĀ.

S. S. Collection No. 17. Substance—Paper. Size—9¾ × 5⅜ inches. Sheets—51. Lines—13 to a page. Script—Devanāgarī. No. of Granthas—1300. Author—Śaṅkarānanda. Complete.

Beginning :

श्रीगणेशाय नमः ॥

श्वेताश्वतरमन्त्राणां ब्रह्मार्थोपनिषद्गिराम् ।
पुण्यकृत्पुण्यतीर्थानामर्थमाविष्करोम्यहम् ॥

ब्रह्मात्मैक्यार्थस्यातिगहनतां दर्शयितुं प्रथमतो ब्रह्मविदां [विदां] (वि)चारमवतारयति— ब्रह्मवादिनः वेदार्थज्ञानवन्तः वदन्ति वक्ष्यमाणं विचारं वाचानिकं कुर्वन्ति । तद्विचारमाह—किं विचारे कारणं जगदुपादान(नं), यद्यपि यतो वेत्यादिवेदवाक्येन जगदुपादानं ब्रह्मोक्तम् ; तथापि असङ्गोदासीनस्य ब्रह्मणो विना मायां तदनुपपन्नमेवेत्युपपन्नो विचारः ॥

End :

प्रकाशन्ते । इदमनेनेत्थमिति प्रतीयन्ते । महात्मनः महान्गर्वादिरहितः आत्मा(ऽ)न्तःकरणं यस्य स महात्मा तस्य । इति(ः) उपनिषत्समाप्तौ ॥

योऽ(ऽ)स्ति स्फुर[न्नविरतं ?] हृदयाब्जमध्ये
हंसो नृकान्तारमदो विगाह्य ।

पित्रममुं भेदमनीशमीशः
प्रीतः स भूयादमुना कृतेन ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्य-
शङ्करानन्दभगवतः कृतौ श्वेताश्वतरोपनिष-
द्दीपिकायां षष्ठो(ऽ)ध्यायः ॥

Subject: Śvetāśvataropaniṣad dīpikā—an independent commentary on Śvetāśvataropaniṣad, according to the Advaita school of Philosophy. 1-6 Adhyāyas.

Remarks :—The Ms. is old and is in good condition.

## ॥ श्वेताश्वतरोपनिषद्दीपिका ॥

## 1567. ŚVETĀŚVATAROPANIṢAD DĪPIKĀ.

S. S. Collection No. 18. Substance—Paper. Size—11¼ × 5 inches. Sheets—6 (3-6). Lines—13 or 14 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—? A Fragment only.

Beginning :

...माश्च मांश्चापि वर्णानां परमार्थतः ।
आश्रमैर्न च वेदैश्च यज्ञै(:) सांख्यैर्व्रतैस्तथा ॥
उग्रैस्तपोभिर्विविधैर्दानैर्नानाविधैरपि ।
न लभन्ते तमात्मानं लभन्ते ज्ञानिनः स्वयम् ॥
त्रयीधर्ममधर्मार्थं किम्पाकफलसन्निभम् ।
नास्ति तात सुखं किञ्चित् अत्र दुःखशताकुले ॥

❀ ❀ ❀ ❀

एवं श्रुतिस्मृतिविरोधान्न कर्मसाधनम् ; अमृतत्वन्यायविरो-
धात् । कर्मसाधनत्वे मोक्षस्य चतुर्विधक्रियान्तर्भावादनित्य-

त्वं स्यात् । यत्कृतकं तदनित्यं इति कर्मसाध्यस्य नित्य-
त्वादर्शनात् । नित्यश्च मोक्षः सर्ववादिभिरभ्युपगम्यते ॥

End:

मोक्षशास्त्रेषु—

आकाशमेकं हि यथा घटादिषु पृथक् पृथक् ।
तथा(ऽ)त्मैको ह्यनेकश्च जलाधारेष्विवांशुमान् ॥
एक एव तु भूतात्मा भूते भूते व्यवस्थितः ।
एक.... ............ ........ ......... ........ .... ....

Colophon: Nil.

Remarks:—The Ms. is old and is in a fairly good condition. Whether this work is 'a commentary on Śvetāśvataropaniṣad' is yet to be identified.

## ॥ षट्चक्रोपनिषद्दीपिका ॥

## 1568. ṢAṬCAKROPANIṢAD DĪPIKĀ.

J. L. Collection No. 159 b. Substance—Paper. Size—10 × 4½ inches. Sheets—3 (31-33). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—50. Author—Nārāyaṇāśramin. Complete.

Beginning:

श्रीरस्तु ॥

षडङ्गन्यासासिद्ध्यर्थं षट् चक्राणि क्रमादिह ।
स्वरूपतो मन्त्रतश्च रूप्यन्ते प्रश्नपूर्वकम् ॥

प्रश्नोद्देशेनेन्द्रादयो ब्रह्मलोकमागच्छन्नित्याह—
ॐ देवा ह वा इति सामान्यप्रश्न इति । विशेषप्रश्नो
नारसिंहमिति । तानिति । श्रुतेर्वचः चक्रपवोचादित्युप-
क्रम एकवचनादुपसंहारे च यो वा एतन्नारसिंहचक्रमधी-

त इत्येकवचनात्षडप्यैकैकोपरि लेख्यानि तेन महाचक्रं भवतीति गम्यते । नारसिंहानि चक्राणि भवन्तीत्यतः प्राक् षड्वा इति ज्ञेयम् ॥

End:

अनधिकारिणे न वाच्यमित्याह— तदेतदिति । द्विरुक्तिरादरार्था । षट्चक्रलेखनप्रकारस्तु मन्त्रार्णैरेव वलयत्रयं कृत्वा तृतीयवलयोपरि दिक्षु रेखारूपानराना-लिख्य तदुपरि त्रिकोणाकाराणि तावन्ति पत्राणि लिखेत् । पत्रोपरि च द्वितीयचक्रस्याद्यं वलयम् । एवमग्रेऽपि । ताप-नीयोक्तस्तु पञ्चाङ्गन्यासपक्षो नानेन बाध्यते, नापि विकल्प्यते; अधिकफलार्थत्वादस्य ॥

नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्टपदवाक्यानां षट्चक्रस्य प्रदीपिका ॥

Colophon:

इति षट्चक्रोपनिषद्दीपिका समाप्ता ॥

Subject: Saṭcakropaniṣad dīpikā—according to the Advaita school of Philosophy.

Remarks:—The Ms. is old and is in a good condition. The other works contained in this Ms. are (1) Nṛsihma Pūrvatāpinyupaniṣad dīpikā, and (2) Nṛsihmottaratāpinyupaniṣad dīpikā.

---

## ॥ हंसोपनिषद्दीपिका ॥

## 1569. HAMSOPANIṢAD DĪPIKĀ.

Burnell's Catalogue No. 9754 m. Page 36. Right column.

Substance—Palm leaf. Size—$19\frac{1}{4} \times 1\frac{3}{4}$ inches. Leaves—3 (48-50 out of 69). Lines—11 to a Page. Script—Telugu. No. of Granthas—130. Author—Śaṅkarānanda. Complete.

Beginning :

हंसोपनिषद(दो) व्याख्यां करिष्येऽहं स च च सन् (?)।
सम्बन्धा(?)द्युपनिषदां विज्ञेयं तुल्यमत्र तत् ॥

अथ अधिकारिसम्पत्त्यनन्तरं हंसपरमहंसनिर्णयं हन्ति गच्छति संसारकासारामिति हंसः परम… ज्ञानं सकार्यं ससंस्कारं हंसस्य स्वात्मतानात्म्यवेदनाद्धन्ति विनाशयतीति परमहंसः । हंसश्च परमहंसश्च हंसपरमहंसौ । त्वंतत्पदार्थयोर्निर्णयो याथात्म्यनिश्चयः तं वाक्यार्थज्ञानमित्यर्थः । व्याख्यास्यामः । विस्पष्टं आसमन्तात् प्रकटयिष्यामः । अथशब्दसूचितमधिकारिणमाह । ब्रह्मचारिणे ब्रह्मचर्ययुक्ताय पारमहंस्याश्रमवर्तिन इत्यर्थः । ब्रह्मचर्ये निमित्तमाह । दान्ताय उपरतबाह्येन्द्रियव्यापाराय । उपलक्षणमिदं । शान्तत्वादीनां । तत्रापि हेतुमाह— गुरुभक्ताय । गुरुः जीवब्रह्मणोस्तादात्म्यलक्षणोऽर्थः ॥

End :

प्रकाशयति स्वात्मन्यध्यस्तमविद्यातत्कार्यजातं प्रत्याययति प्रकाशते स्वात्मरूपेण । इति अनेन प्रकारेण देववचनं देवस्य भगवतः सर्वज्ञस्य वचनमाज्ञारूपं सत्यरूपं वा वाक्यं भवति भवति स्पष्टम् । अभ्यास उपनिषत्समाप्त्यर्थः ।

वेदान्तसिद्धान्तसमाश्रयेण
व्याख्या कृता भ्रान्तिनिवारणार्थं ।
मन्त्राणि योगाश्च भवन्ति नृणां
मुक्त्यै यथा ब्रह्माणि बुद्धिरेवम् ॥
ब्रह्मात्मबोधास्त्रमृते न किञ्चि-
न्मायापिशाचीं(ची)प्रतिहन्तृ मन्त्रम् ।

सर्वस्य जन्तोस्तत एव लोकाः
तदेकविश्वासपरा भवन्तु ॥

Colophon:

इति श्रीपरमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपाद-
शिष्यस्य श्रीशङ्करानन्दभगवतः कृति-
हंसोपनिषद्दीपिका समाप्ता ॥

Subject: Haṃsopaniṣaddīpikā—a commentary on Haṃsopaniṣad according to Advaita philosophy.

Remarks:—The Ms. is in a good condition. For the other works contained in this Ms. see the list under Remarks on No. 1428. In this Ms. the letters are too small to make out.

॥ उपनिषद्भाष्यम् ॥

२. द्वैतम् ॥

# UPANIṢAD-BHĀṢYA.

## 2. DVAITA.

## ॥ ईशावास्योपनिषद्भाष्यम् ॥

## 1570. ĪŚĀVĀSYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5868. Page 100. Left column. Substance—Paper. Size—$9\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—4. Lines—7 to 10 to a Page. Script—Devanāgarī. No. of Granthas—60. Author—Ānandatīrtha. Complete.

Beginning :

नित्यानित्यजगद्धात्रे नित्याय ज्ञानमूर्तये ।
पूर्णानन्दाय हरये सर्वयज्ञभुजे नमः ॥

यस्माद्ब्रह्मेन्द्ररुद्रादिदेवतानां श्रियोऽपि च ।
ज्ञानस्फूर्तिस्सदा तस्मै हरये गुरवे नमः ॥

स्वायंभुवो मनुरेतैर्मन्त्रैर्भगवन्तमाकूतिसूनुं यज्ञनामानं विष्णुं तुष्टाव ।

स्वायम्भुव(ः) स्वदौहित्रं विष्णुं यज्ञाभिदं(धं) मनुः ।
ईशावास्यादिभिर्मन्त्रैस्तुष्टावावहितात्मना ॥

*  *  *  *  *

भागवते चायमर्थ उक्तः । ईशस्यावासयोग्यं ईशावास्यं । जगत्यां प्रकृतौ । तेनेशेन त्यक्तेन दत्तेन भुञ्जीथाः ।

स्वतः प्रवृत्त्यशक्तत्वादीशावास्यमिदं जगत् ।
प्रवर्तये प्रकृतिगं यस्मात्स प्रकृतीश्वरः ॥

End :

वयुनं ज्ञानं । 'त्वद्दत्तया वयुनयेदमचष्टविश्व' मिति वचनात् । जुहुराणमस्मानल्पीकुर्वन् । युयोधि वियोजय । यदस्मान्कुरुतेत्यल्पान् तदेनोऽस्मद्वियोजय । 'नयनो मो-

क्षवित्तायेत्यस्तौषशं मनुस्स्वराद्' इति स्कान्दे । युयु वि-
योग इति धातुः । भक्तिज्ञानाभ्यां भूयिष्ठां ते नम उक्तिं
विधेम ।

पूर्णशक्तिचिदानन्दश्रीतेजःस्पष्टमूर्तये ।
ममाभ्यधिकमित्राय नमो नारायणाय ते ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितमीशा-
वास्योपनिषद्भाष्यं समाप्तम् ॥

श्री कृष्णार्पणमस्तु ॥ श्रीलक्ष्मीनृसिंहार्पणमस्तु ॥ श्रीरस्तु ॥

Subject : Īśāvāsyopaniṣad bhāṣya — otherwise known as Yājñīyamantra bhāṣya, belonging to the Dvaita school of Philosophy. See colophon on Nos. 1572 & 1576.

Remarks :—The Ms. is old and is in good condition.

## ॥ ईशावास्योपनिषद्भाष्यम् ॥

## 1571. ĪŚĀVĀSYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5869. Page 100. Left column.
Substance—Paper. Size—$8\frac{1}{8}\times4\frac{1}{8}$ inches. Sheet—1. Lines —16 or 22 to a Page. Script—Devanāgarī. No. of Granthas—60. Author—Ānandatīrtha. Complete.

Beginning, end and subject—Same as No. 1570.

Colophon :

इति श्रीमध्वाचार्यकृतमीशावास्यभाष्यं समाप्तम् ॥

ईशावास्योपनिषदः भाष्यं शेषो ह्यलेलिखत् ।
अशेषदुःखशमनं पूर्णानन्दप्रदायकम् ॥

Remarks :—The Ms. is old and is in good condition. The letters are fading away. The scribe's name is Śeṣa.

## ॥ ईशावास्योपनिषद्भाष्यम् ॥

## 1572. ĪŚĀVĀSYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5887 a. Page 100. Left column. Substance—Paper. Size—13×5 inches. Sheets—3 (1-3 out of 179) Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—60. Author—Ānandatīrtha. Complete.

Beginning, end and subject—Same as No. 1570.

**Colophon:**

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते याज्ञीयमन्त्र-
व्याख्यानं समाप्तम् ॥

Remarks :—The Ms. contains the following bhāṣyas :

(1) ईशावास्योपनिषद्भाष्यम् ॥ (4) छान्दोग्योपनिषद्भाष्यम् ॥

(2) अथर्वणो(मुण्डको)पनिषद्भाष्यम् ॥ (5) बृहदारण्यकोपनिषद्भाष्यम् ॥

(3) तैत्तिरीयोपनिषद्भाष्यम् ॥ (6) ऐतरेयोपनिषद्भाष्यम् ॥

The Ms. is very, very old and is in a decaying condition.

## ॥ ईशावास्योपनिषद्भाष्यम् ॥

## 1573. ĪŚĀVĀSYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5888 (a). Page 100. Left column. Substance—Paper. Size—9½×4 inches. Sheets—4 (1-4 out of 26). Lines—9 or to a Page. Script—Devanāgarī. No. of Granthas—60. Author—Ānandatīrtha. Complete.

Beginning, end, colophon and subject—Same as No. 1570.

Remarks :—The Ms. contains the following works :

(1) ईशावास्योपनिषद्भाष्यम् ॥ (4) माण्डूक्योपनिषद्भाष्यम् ॥

(2) प्रश्नोपनिषद्भाष्यम् ॥ (5) तलवकारो(केनो)पनिषद्भाष्यम् ॥

(3) काठकोपनिषद्भाष्यम् ॥ (6) अथर्वणो(मुण्डको)पनिषद्भाष्यम् ॥

The Ms. is old and is in a fairly good condition. This work is not, however, noticed by Dr. Burnell under this Ms.

## ॥ ईशावास्योपनिषद्भाष्यम् ॥

## 1574. ISĀVĀSYOPANISAD BHĀSYAM.

Burnell's Catalogue No. 6216. Page 100. Left column. Substance—Paper. Size—7⅛×2 inches. Sheets—6. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—60. Author—Ānandatīrtha. Complete.

Beginning, end, colophon and subject—Same as No. 1570.

Remarks:— The Ms. is in good condition.

## ॥ ईशावास्योपनिषद्भाष्यम् ॥

## 1575. ĪŚĀVĀSYOPANISAD BHĀSYAM.

Not noticed by Burnell. Ms. No. 14763 a. Substance—Paper. Size—7$\frac{7}{10}$×3½ inches. Sheets—4 (1-4 out of 5). Lines—8 to 10 to a Page. Script—Devanāgarī. No. of Granthas—60. Author—Ānandatīrtha. Complete.

Beginning, end, colophon and subject—Same as No. 1570.

Remarks:—The Ms. is in good condition. The other work contained in this Ms. is 'ईशावास्योपनिषद्' ॥

## ॥ ईशावास्योपनिषद्भाष्यविवरणम् ॥

## 1576. ĪŚĀVĀSYOPANISAD BHĀSYA VIVARANAM.

Burnell's Catalogue No. 5870. Page 100. Left column. Substance—Paper. Size—10½×4½ inches. Sheets—16. Lines—8 to 12 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Jayatīrthabhikṣu. Complete.

Beginning:

श्रीवेदव्यासाय नमः ॥ ॐ ॥

श्रीमच्छ्रीवदनाम्भोजगतसौन्दर्यसौरभम् ।
लिहद्भ्यां लोचनालिभ्यां भगवान् पातु नो हरिः ॥ १ ॥

काण्वीं मन्त्रोपनिषदं यथावद्व्याकरिष्यन् भगवानाचार्यः चिकीर्षिताविघ्नपरिसमाप्त्यादिप्रयोजनो प्रतिपाद्यदेवता-स्तुतिनती प्रथमं निबध्नाति— नित्येति । सर्वयज्ञभुजे नम इति सर्वयज्ञभोक्तृत्वाद्यज्ञनाम्न इत्यर्थः । यथोक्तं —सुखरूपस्य भोक्तृत्वादिति । अपूर्णसुखा हि सुखार्थं भोगान् भुञ्जते, किं तथा हरिरपि नेत्याह— पूर्णान-न्दायेति । भोगस्तु लीलयेति भावः । पूर्णानन्दत्वं हरेः कुत इत्यत आह ॥ जगद्धात्र इति ॥

End:

अथ समापितभाष्योपि भगवानाचार्यो 'यत्ते रूपं कल्याणतमं योऽसावसौ पुरुष' इत्यादिना प्रतिपादितं नारायणं स्तुतिनतिभ्यां प्रीणयति—पूर्णेति । पूर्णशक्तिचिदानन्दश्रीतेजांस्येव मूर्तिर्यस्येत्युक्त्यैक(क्ते कर)चरणादिमान् विग्रहो नास्तीति स्यात्, अत उक्तं— स्पष्टेति ।

स्पष्टेति । स्पष्टा प्रसिद्धा करचरणादिमतीत्यर्थः । अभ्यधिकं मित्रं निरतिशयोपकारको(ऽ)तिपरमप्रीति-विषयश्चेति ।

कमलावदनाम्भोजराजहंसाय विष्णवे ।
नमो जगज्जनिस्थेमहेतवे परमात्मने ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितयाज्ञीयमन्त्रव्याख्या-

नविवरणं जयतीर्थभिक्षुविरचितं समाप्तम् ॥

Subject: Īśāvāsyopaniṣad bhāṣyavivaraṇa—a gloss on this Upaniṣad bhāṣya according to the Dvaita school of philosophy.

Remarks :—The Ms. is in good condition.

॥ ईशावास्योपनिषद्भाष्यविवरणम् ॥

## 1577. ĪŚĀVĀSYOPANIṢAD BHĀṢYA VIVARAṆAM.

Burnell's Catalogue No. 5871. Page 100 Left column. Substance—Paper. Size—$11\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—11 to a page. Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Jayatīrthabhikṣu. Complete.

Beginning, end and subject—Same as No. 1576.

Colophon :

इति श्रीमदानन्दतीर्थ + ईशावास्योपनिषद्भाष्यविव-
रणं जयतीर्थभिक्षुविरचितं समाप्तम् ॥

Remarks :—The Ms. is old and is in good condition.

॥ ईशावास्योपनिषद्भाष्यविवरणम् ॥

## 1578. ĪŚĀVĀSYOPANIṢAD BHĀṢYA VIVARAṆAM.

Burnell's Catalogue No. 5891 a. Substance—Paper. Size —$13 \times 5\frac{1}{3}$ inches. Sheets—9 (1-9 out of 26). Lines—12. to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Jayatīrthabhikṣu. Complete.

Beginning, end, colophon and subject—Same as No. 1576.

Remarks :—The Ms. is old and is in an injured condition. Dr. Burnell had by mistake grouped this Ms. under Īśāvāsyopaniṣad bhāṣya. Evidently it is Jayatīrtha's commentary on Ānandatīrtha's bhāṣya on this Upaniṣad as noted above.

This Ms. contains the following works:—

(1) ईशावास्योपनिषद्भाष्यविवरणम् ॥
(2) अथर्वणो(मुण्डको)पनिषद्भाष्यविवरणम् ॥
(3) प्रश्नोपनिषद्भाष्यविवरणम् ॥

## ॥ ऐतरेयोपनिषद्भाष्यम् ॥

## 1579. AITAREYOPANISAD BHĀSYAM.

Burnell's Catalogue No. 5757 a. Page 99. Left column. Substance—Paper. Size—16¾ × 8¾ inches. Sheets—22 (1-22 out of 36). Lines—19 or 20 to a Page. Script—Devanāgarī. No. of Granthas—1500. Author—Ānandatīrtha. Complete.

Beginning :

श्री गणेशाय नमः ।

नारायणं निखिलपूर्णगुणैकदेहं
सर्वज्ञमच्युतमपेतसमस्तदोषम् ।
प्राणस्य सर्वचिदचित्परमेश्वरस्य
साक्षादधीश्वरमियां शरणं रमेशम् ॥ १ ॥

प्रादुर्बभूव भगवान् तपसेतराया
नारायणो(ऽ)ब्जजसुतस्य विशालनाम्नः ।
तस्मिन् गतेऽध्वरमभूत्सुरविप्रसङ्घो
निश्चेतनस्तदनु पद्मभवोऽमुमस्तौत् ॥ २ ॥

तेन स्तुतः स भगवान् गिरिशेन्द्रमुख्यान्
सर्वानबोधयदजेन सहैव ते(ऽ)थ ।
दासत्वमापुरत एव महत्सुराणां
दासत्वतः स महिदास इति प्रसिद्धः ॥ ३ ॥

शृण्वत्सु तेषु भगवाननवदद्रमायै
दिव्यां श्रुतिं स परमोऽतिमुदैतरेयीम् ।
सा बह्वृचैः प्रपठिता चतुराननास्या-
यस्यां रहस्यमुदितं परमं हि विष्णोः ॥
महाभूतिः श्रुतिस्त्वैषा महाभूतिर्यतो हरिः ।
विशेषेणात्र कथितः सर्वज्ञः शाश्वतः प्रभुः

इति ऋक्संहितायां ।

एष एव सदा पन्थाः भगवान् पुरुषोत्तमः ।
नित्यं स्वप्राप्तिहेतुत्वात्कर्तृत्वात्कर्ममात्रतः ॥
ब्रह्मैष गुणपूर्णत्वात्सत्यं साधुस्वरूपतः ।
क्वापि तं विस्मरेन्नैव त्यक्त्वा तं नेतरं व्रजेत् ॥
पूर्वे नैनं तत्यजुर्हि ब्रह्माद्यास्ते न संसृतेः ।
मुक्ता श्रीश्च तदत्यागान्नित्यमुक्ता गुणाधिका ॥
विहायस्ययनात्प्रोक्ता वयांसीति पिशाचकाः ।
वर्तितज्ञानतो वक्रा नरास्तैरवनं सदा ॥
अभ्ररूपैर्गृध्नवो हि वक्रा वगधनामकाः ।
राक्षसा असुरा ईरपादा इति समीरिताः ॥

End:

येन विष्णोर्हि वर्णाख्यान् गुणानज्ञासिषुः परान् ॥
ईशानासस्त्वरयश्च निगूढाभिर्गुणोक्तिभिः ।
त्रेतायां द्वापरे चैव कलौ चैते क्रमात्त्रयः ॥
एतेषां परमो विष्णुः नेता सर्वेश्वरेश्वरः ।
स्वयंभूर्ब्रह्मसंज्ञोऽसौ परस्मै ब्रह्मणे नमः ॥ इति च
पूर्णागण्यगुणोदारधाम्ने नित्याय वेधसे ।
अमनन्दानन्दसान्द्राय प्रेयसे विष्णवे नमः ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीमन्महै-
तरेयोपनिषद्भाष्ये द्वितीयाध्यायः ॥

Subject : Aitareyopaniṣad bhāṣya in verses, belonging to the Dvaita school of philosophy. This Ms. contains commentary on portions of Aitareyāraṇyaka—II. 1-1 to III. 2-6.

Remarks :—The Ms. is old and is in a good condition. The paper is of Indian Manufacture. The other work contained in this Ms. is Ānandatīrtha's Ṛg-bhāṣyam.

॥ ऐतरेयोपनिषद्भाष्यम् ॥

## 1580. AITAREYOPANISAD BHĀSYAM.

Burnell's Catalogue No. 5828. Page 99. Left column. Substance—Paper. Size—8×4 inches. Sheets—43. Lines—13 to 18 to a Page. Script—Devanāgarī. No. of Granthas—1500. Author—Ānandatīrtha. Complete.

Beginning and subject—Same as No. 1579.

**Colophon** :

इति श्रीमदानन्दतीर्थविरचिते श्रीमन्महैतरेयोपनिषद्भाष्ये तृतीयः
प्रपाठकः समाप्तः ॥

श्रीसर्वज्ञब्रह्मोदितानन्दगुणरूपश्रीशः प्रीयताम् ॥

बह्वृचोपनिषदः किल भाष्यं मध्वसंयमिकृतं निखिलार्थम् ।
शेषनामकबुधो हरितुष्ट्यै तोषणाय च गुरोरलिखाद्धि ॥
विभवाब्देऽश्विने मासि चतुर्थ्यां गुरुवासरे ।
बह्वृचोपनिषद्भाष्यं शेषनामा व्यलेखिली(लिख)त् ॥

Remarks :—The Ms. is in good condition. The scribe's name is given as Śeṣa. The Ms. is dated Thursday—the fourth day (after the new moon)—in the Āśvina month in Vibhava year which corresponds to Śaka 1670 or 29th September 1748 A. D.

The Ms. adopts a division of this Upaniṣad into three Praghaṭṭakas which, along with the Āraṇyaka division, is noted, as follows:

| | | | |
|---|---|---|---|
| 1st Praghaṭṭaka | = 2nd Āraṇyaka. | | 1st Adhyāya. |
| 2nd ,, | = | ,, | 2-7 Adhyāyas. |
| 3rd ,, | = 3rd | ,, | 1-2 ,, |

---

## ॥ ऐतरेयोपनिषद्भाष्यम् ॥

## 1581. AITAREYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5832. Page 99. Left column. Substance—Paper. Size—11¾ × 4¼ inches. Sheets—51. Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—1500. Author—Ānandatīrtha. Complete.

Beginning, end and subject—Same as No. 1579.

**Colophon:**

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीमन्महैतरेयोपनिषद्भाष्ये द्वितीयप्रघट्टके नवमो(ऽ)ध्यायः ॥

श्रीकृष्णार्पणमस्तु ॥

Remarks:—The Ms. is in good condition. In this Ms. this Upaniṣad is divided into two Praghaṭṭakas of which the second Praghaṭṭaka contains nine Adhyāyas.

---

## ॥ ऐतरेयोपनिषद्भाष्यम् ॥

## 1582. AITAREYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5833. Page 99. Left column. Substance—Paper. Size—8⅛ × 1½ inches. Sheets—77. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1500. Author—Ānandatīrtha. Complete.

Beginning, end and subject—Same as No. 1579.

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीमन्महैतरीयोपनिषद्भाष्ये त्रि(तृ)तीयः प्रघट्टकः समाप्ता(:) ॥

श्री रामचन्द्रार्पणमस्तु

Remarks:—The Ms. is very old and is in a fairly good condition, though the sheets are here and there damp in appearance. For the division of this Upaniṣad adopted in this Ms. see Remarks on No. 1580.

## ॥ ऐतरेयोपनिषद्भाष्यम् ॥

## 1583. AITAREYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5887 f. Page 99. Left column. Substance—Paper. Size—13×5 inches. Sheets—54 (126-179). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1600. Author—Ānandatīrtha. Complete.

Beginning, end and subject—Same as No. 1579.

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महैतरेयोपनिषद्भाष्ये द्वितीय प्रघट्टकः समाप्तः ॥

Remarks:—The Ms. is very old and is in a dacaying condition. For the other works contained in this Ms. see the list under Remarks on No. 1572. In this Ms. the Praghaṭṭa and Adhyāya divsions of this Upaniṣad are adopted as follows:—

1st Praghaṭṭaka=2nd Āraṇyaka. 1st Adhyāya.
2nd ,, =2nd Āraṇyaka. 1-9 Adhyāyas,
and 3rd Āraṇyaka. 1-2 Adhyāyas.

## ॥ ऐतरेयोपनिषद्भाष्यम् ॥

## 1584. AITAREYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 6213. Page 99. Left column,

Substance—Paper. Size—7⅛ × 2 inches. Sheets—134. Lines—6 or 7 to a Page. Script—Devanāgarī. No. of Granthas—1500. Author—Ānandatīrtha. Complete.

Beginning, end and subject—Same as No. 1579.

Colophon:

इति श्रीमदानन्दतीर्थ + ऐतरेयोपनिषद्भाष्ये तृतीयप्रघट्टके द्वितीयोऽध्यायः ।

कालयुक्तनामसंवत्सरे आश्विक(अश्वयुज)मासशुक्लपक्षचतुर्थ्यां बुधवासरे ऐतरेयभाष्यं समाप्तम् ।

Remarks:—The Ms. is in good condition. For the Praghaṭṭaka division adopted in this Ms. see the table given under Remarks on No. 1580. The Ms. is dated Wednesday—fourth day after the new moon—in month in Kālayukta year which corresponds to Śaka 1660 or 6th September 1738 A. D.

## ॥ ऐतरेयोपनिषद्भाष्यविवरणम् ॥

## 1585. AITAREYOPANIṢAD BHĀṢYA VIVARAṆAM.

Burnell's Catalogue No. 5830. Page 99. Left column. Substance—Paper. Size—9¼ × 4¼ inches. Sheets—87. Lines—9 to 15 to a Page. Script—Devanāgarī. No. of Granthas—2800. Author—Viśveśvaratīrtha. Complete.

Beginning:

श्री वेदव्यासाय नमः ॥

हरिः ॐ

यस्सर्ववेदपदगवाक्यवर्णस्वरादिभिः ।
तत्तद्वाच्यगुणे तस्वादुच्यते सो(ऽ)स्तु नोऽर्थदः ॥ १ ॥

यस्यमात्रिविधा प्रजा निरयभाग्यस्याभयान्मुक्तिभाक्
यः क्षेत्रे प्रपदं प्रपद्य रमते यत्सृष्टमेतज्जगत् ।

यो(ऽ)न्वाप्यामरवल्लभो जयति यः ख्यातः शतर्चादिना
नाम्ना पञ्चविधोपि योनिजभिदाराहित्यवान्विस्तृतः ॥
यो यावद्बृहतीसहस्रगणितावर्णादिवर्णात्मना
ख्यातो योग्यजनाय योग्यविशदानन्दं ददात्यञ्जसा ।
यो विष्णवक्षरसंहितां श्रुतिशताम्नातां विजानाति यः
तस्मै शम्भजते चराति...शरणं यामो रमावल्लभम् ॥३॥
ऐतरेयोपनिषदो व्याकुर्वो भाष्यमुत्तमम् ।
श्रीमदानन्दतीर्थार्यान्नत्वा तत्प्रीतिकामुकाः ॥ ४ ॥
नाम्नायार्थविचारणे कुशलिनो नो शब्दवारान्निधौ
स्नाता न्यायविचारदूरमतयः शिक्षानिरुक्तातिगाः ।
अप्येवं सुरवर्यदेशिकमहाचार्यप्रसादान्महा-
भूत्यर्थग्रहणाय भाष्यविवृतौ यत्नं वयं कुर्महे ॥ ५ ॥

अथेष्टानिष्टप्राप्तिपरिहारेच्छूनां तदुपायमजानतां तत्पद-वीदीपकपुरुषाभावात् परिखिन्नमनसां पुरुषाणामनुग्रहाय पुण्डरीकाक्षकटाक्षप्रेक्षामृतपात्रीमन्यैरन्यथा व्याख्याता-मैतरेयोपनिषदं यथावद्व्याख्यातुकामः श्रीमत्पूर्णप्रज्ञाचार्य-वर्यः शिष्टजनशिक्षणाय प्रचयगमनायाविघ्नेन ग्रन्थसमाप्तये च नारायणाख्यामिष्टदेवतां स्वाभीष्टफलदानसमर्थां इत-रपुरुषेष्वसम्भवल्लक्षणविशिष्टां प्रणमति—नारायणमिति ॥

End :

समापितभाष्यो भगवानाचार्यवर्यः पुनरपि भक्त्याति-शयेन भगवन्तं प्रण(म)ति— पूर्णेति ॥ वेधसे सृष्टि-कर्त्रे विष्णवे नमः ॥

सृष्ट्याद्यष्टकमश्नुतेऽखिलजगद्ग्रसाद्विना यं तृणं
नेष्टे [ना]चं(चा)लयितुं च यो निविशते रूपैरनेकैरिदम् ।

पूर्वोर्णोत्तरवर्णाभ्या(?)रथ च तत्सन्धावनुस्मर्यते
यौ बाध्वा(?)दिभिरञ्जसा परतमं विष्णुं भजामो वयम् ॥

आचार्यवाचामभिसन्धिमत्था(द्धा)
नामर्त्यसङ्घा अपि वक्तुमीशाः ।
यथावबोधाभिहितार्थभाष्ये-
ष्वस्मासु सन्तः करुणां क्रियासुः ॥

Colophon: (Sheet No. 57.)

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महैतरेयो-
पनिषद्द्वितीयषट्कभाष्यविरचिते (विवरणे) विश्वेश्वर-
तीर्थीये चतुर्थोऽध्याय: ॥

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य श्रीमन्महैतरेयोपनिषद्भा-
ष्यस्य टीकायां श्रीमद्विदेश(?)(विश्वेश्वर)तीर्थविरचितायां तृतीयषट्के
द्वितीयोऽध्याय: ॥ समाप्तोयं ग्रन्थ: ॥ श्रीकृष्णार्पणमस्तु ॥
करकृतमपराधं क्षन्तुमर्हन्तु सन्त: ॥ श्रीमन्महैतरेय: प्रीयतां ॥
अनेन लेखनेन बृहतीसहस्रप्रतिपाद्याहोरात्रनियामकषट्त्रिंशत्सहस्ररूपी
श्रीमन्महैतरेयो भगवान्प्रीतो भवतु ॥

Subject: Aitareyopaniṣad bhāṣyavivaraṇa—a commentary on Ānandatīrtha's Bhāṣya on this Upaniṣad, according to the Dvaita school of Philosophy. Aitareyāraṇyaka II. 1-8 to III. 2-6.

Remarks:—The Ms. is old and is in a fairly good condition.

## ॥ ऐतरेयोपनिषद्भाष्यविवरणम् ॥

## 1586. AITAREYOPANIṢAD BHĀṢYA VIVARAṆAM.

Burnell's Catalogue No. 5831. Page 99. Left column.

**Substance**—Paper. Size—11¾ × 4¾ inches. Sheets—12. **Lines**—13 or 14 to a Page. Script—Devanāgarī. No. of

Granthas—400. Author—Viśveśvaratīrtha. First Adhyāya of the Second Āraṇyaka only.

Beginning—Same as No. 1585.

End :

स अमुष्मिँल्लोके विष्णुलोके अमृतो मुक्तो भवति ।
अमृतः सन्सर्वेभ्यो भूतेभ्यः मुक्तः सर्वभूतैर्ददृशे ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितश्रीमन्महैतरयोपनि-
षद्भाष्यविवरणे प्रथमः प्रपट्टकः ॥

Subject: Aitareyopaniṣad bhāṣya vivaraṇa—a gloss on the bhāṣya according to the Dvaita system of Philosophy. This Ms. contains commentary on the bhāṣya on Aitareyāraṇyaka II. 1. 8.

Remarks :—The Ms. is old and is in good condition.

## ॥ ऐतरेयोपनिषद्भाष्यविवरणम् ॥

## 1587. AITAREYOPANIṢAD BHĀṢYA VIVARAṆAM.

Burnell's Catalogue No. 5289. Page 99. Left column. Substance—Paper. Size—$11\frac{3}{4}\times4\frac{1}{2}$ inches. Sheets—36. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—2100. Author—Viśveśvaratīrtha. Incomplete.

Beginning:

श्री वेदव्यासाय नमः ॥

ॐ 'एष इमं लोकं अभ्यार्चत्' इति खण्डं विवृणोति—एष नारायण इत्यादिना । य एषस्तपति तद्यो जयति एष सूर्यमण्डल इति । भगवतः सूर्यमण्डलास्थितत्वे प्रमाणमाह— य आदित्य इति ॥ अन्तरो विलक्षणः । अस्यां श्रुतौ कस्यचित् सूर्यस्थितत्वमुच्यते न तु तस्य

विष्णुत्वं । असौ शिवादिः किं न स्यादित्यतः तस्य विष्णुत्वे प्रमाणमाह— य एषो(ऽ)न्तारिति ॥

End:

आनन्दाः भगवद्भक्तिरूपस्वरूपानन्दाः भोगनिमित्तानन्दाश्च मोदाः मुदः अत्यल्पभोगनिमित्तानन्दाः प्रमुदः भोगे विशेषोत्थानन्दाः आसते तिष्ठन्ति कामस्य कामाः इच्छाविषयाः आप्तास्तत्र माममृतं कृधीति । अत्र ऋक्षट्के वायुरेव प्रतिपाद्यो भवति...... ॥

Colophon: (Sheet No. 73)

इति श्रीमन्महैतरेयोपनिषद्भाष्यविवरणे विश्वेश्वरपूज्यतीर्थीये तृतीये प्रघट्टके प्रथमो(ऽ)ध्यायः ॥

Subject: Aitareyopaniṣad bhāṣya vivaraṇa—a commentary on Ānandatīrtha's Aitareyopaniṣad bhāṣya according to the Dvaita school of philosophy. This Ms. contains commentary on the bhāṣya on the portions of Aitāreyāraṇyaka II. 2. 1 to III. 2. 4.

Remarks:—This Ms. abruptly ends in the middle of the commentary on the bhāṣya on the fourth Khaṇḍa of the Second Adhyāya of the third Āraṇyaka. The Ms. is in good condition.

## ॥ ऐतरेयोपनिषद्भाष्यविवरणम् ॥

## 1588. AITAREYOPANIṢAD BHĀṢYA VIVARAṆAM.

Not noticed by Dr. Burnell. Substance—Paper. Size—$13\frac{1}{2}\times 5\frac{1}{6}$ inches. Sheets—63 (5-67). Lines—11 to 13 to a Page. Script—Devanāgarī. No. of Granthas—2200. Author—Viśveśvaratīrtha. Incomplete.

Beginning:

.... जीर्ण्यो यथा न भवेत् । अमुना च सर्वलोका यथा न भुज्यन्ते । न भुज्येरन् । तथा कर्तुं कश्चनापि नै-

वेष्ट इत्यन्वयः । विद्यान्तरत्वाच्च पूर्वखण्डेनास्य सङ्गतिः । उत्तरत्राप्येतदनुसन्धेयम् ॥

End :

अथातः सुतरां भवेत्यस्य विष्णुरित्यादि । कृष्णं व्यक्तमथस्थिनेत्यस्य कृष्णमित्यादि । पेपिशदित्यस्य अङ्गानां पेशलं भद्रमिति । ऋणवेत्यस्य ऋणमिवेति । उष इत्यस्य...... ॥

Colophon : (Sheet No. 50).

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीमन्महैतरेयोपनिषद्वितीयप्रघट्टकभाष्यविवरणे विश्वेश(श्वर)तीर्थविरचिते सप्तमो(ऽ)ध्यायः ॥

Subject: Aitareyopaniṣad bhāṣya vivaraṇa—a commentary on Ānandatīrtha's Bhāṣya according to the Dvaita school of Philosophy. This Ms. contains commentary on the bhāṣya on Aitareyāraṇyaka. II. 1. 4. to III. 2. 4.

Remarks :—The Ms. is very, very old and is in a decaying condition. This Ms. abruptly begins in the middle of the commentary on the bhāṣya on the fourth khaṇḍa of the Second Adhyāya of the second Āraṇyaka and breaks off in the middle of that of the fourth Khaṇḍa of the second Adhyāya of the third Āraṇyaka.

## ॥ ऐतरेयोपनिषद्भाष्यटिप्पणी ॥

## 1589. AITAREYOPANIṢAD BHĀṢYA ṬIPPAṆĪ.

Burnell's Catalogue No. 5834. Page 99. Right column. Substance—Paper. Size—$10\frac{1}{2} \times 4\frac{1}{4}$ inches. Sheets—24. Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—380. Author—?. Incomplete.

Beginning :

श्रीवेदव्यासाय नमः ॥

ॐ श्रीमदानन्दतीर्थार्यहृदयामलमन्दिरम् ।
जानकीजानिमानन्दसान्द्रं वन्दे निरञ्जनम् ॥ १ ॥
श्रीपद्मनाभतीर्थादीन्वन्दे विज्ञानवारिधीन् ।
टीकाकृतश्च विश्वेशतीर्थान्वेदान्तकोविदान् ॥ २ ॥
श्रीमदानन्दतीर्थार्यशास्त्राम्भोधिं विमथ्य यः ।
ददौ ज्ञानामृतं मह्यं तं तीर्थार्यं गुरुं भजे ॥ ३ ॥
महैतरेयभाष्यस्य गुरूक्तो(ऽ)र्थो(ऽ)नुवर्ण्यते ।
टिकारष्टः(?) (टीकारूपः) सङ्क्षेपेण कृपां कुर्वन्तु सज्जनाः ॥

अथ भगवान्सर्वज्ञमुनि'रेष पन्था' इत्यादावाषिकृतं विशिष्टमिष्टं नारायणं ग्रन्थादावुपश्लोकयन्शरणं प्रार्थयते—नारायणमिति ॥

End :

'अस्माच्छरीरा'दित्यस्याप्यन्वयमाह—देहादन्जभवस्यास्मादिति । सर्वत्राश्नन्पिबन्नास्ते वेत्यशनापिपासाभिमानिमुख्यप्राणव्यापारसद्भावेनाशनापिपासयोरेवानुवृत्तिं सूचयति । मीळित इवेत्यस्य सर्वेन्द्रियनिमीलनवानिव सर्वव्यापारोपरमवानित्यर्थः । अशारीताँ ३ त(च्)छरीरमभवदित्यत्र अशारि इती तादिति पदच्छेदः । इमिति स्तुतं.... ॥

**Colophon:** Nil.

Subject: Aitareyopaniṣad bhāṣya ṭippaṇī—a gloss on the Bhāṣya according to the Dvaita school of philosophy. This Ms. contains commentary on the bhāṣya on Aitareyāraṇyaka. II. 1. 4.

**Remarks :**—The Ms. is in good condition. This Ms. breaks off towards the end of the commentary on the bhāṣya of the fourth Khaṇḍa of the first Adhyāya of the Second Āraṇyaka. From the introductory verses of this Ms. the author of this com-

mentary is known as the disciple of one Tīrthārya (?) and he is later than even Viśveśvara tīrtha, the commentator of Ānandatīrtha's Aitareya bhāṣya, given above. His exact name is not known.

## ॥ ऐतरेयोपनिषत्खण्डार्थप्रकाशिका ॥

## 1590. AITAREYOPANIṢAD KHAṆḌĀRTHA PRAKĀŚIKĀ.

Burnell's Catalogue No. 5835. Page 110. Left column. Substance—Paper. Size—9⅞ × 4 inches. Sheets —60. Lines —9 to a Page. Script—Devanāgarī. No. of Granthas—1160. Author—Narasihmayati. Second and third Aryaṇyakas only.

Beginning:

श्री वेदव्यासाय नमः । हरिः ॐ ।

महिदासं रमानाथं नत्वा गुरुकृपाबलात् ।
ऐतरेयमहाविद्याखण्डार्थः सम्प्रकाश्यते ॥

इहामुत्रफलभोगविरक्तस्य शमदमादिमतो मुमुक्षोरधिकारिणः परमपुरुषार्थमोक्षसाधनविष्णुप्रसादजनकविष्णुज्ञानाय विष्णुतत्वप्रतिपादनार्थं महदैतरेयोपनिषत्प्रवृत्ता । अस्या उपनिषदो ऋषिः महिदासः । भगवान्नारायणो देवता । केषाञ्चिद्वाक्यानां गाथात्वं, केषाञ्चिदक्षरपरिगणनया छन्दो ज्ञातव्यं । एषः— भगवान्नारायणः । स्वप्राप्तिहेतुत्वात्पन्थाः । सङ्कर्षणः कर्तृत्वान्मातृत्वाच्च । कर्म अनिरुद्धः । गुणपूर्णत्वाद्ब्रह्म वासुदेवः ॥

End:

वाचं प्राणो(णे) वा जुहुमः । विष्ण्वधीनाः कुर्मः मौनेन विष्णुशब्दार्थं ध्यायाम इति भावः । तयोरन्योन्यस्मिन् होममुपपादयति । यो यत्प्रभवः, यो यस्मादुत्पन्नः स

एवाभ्यय: स तस्मिँल्लीयत इत्यर्थः । प्राणाद्वाच उत्पत्ते: प्राणे वाचो लयः । प्राणाभ्यक्तेर्वाग्जन्यत्वात्प्राणस्य वाचि लय इत्युक्तं भवति । ता एताः संहिताः अनन्तेवासिने अ- न्यविद्यासु शिष्यत्वरहिताय न ब्रूयात् । अन्तेवासिन्यप्य- संवत्सरवासिने न ब्रूयात् । अप्रवक्त्रे व्याख्यानशक्तिशू- न्याय च न ब्रूयात् इत्याचार्या आचार्याः ॥ एवं एत- दुपनिषदाचार्यमहिदासादयः आचक्षते । एष पन्था इत्याद्युक्तार्थावधारणाय द्विरुक्तिः ॥ १२ ॥

Colophon :

विद्याधीशार्यशिष्येण नरसिंहेन भिक्षुणा ।
ऐतरेयमहाविद्यासत्खण्डार्थः प्रकाशितः ॥

इति श्रीमत्परमहंसपरिव्राजकत्वाद्यनेकगुणसम्पन्नश्रीमद्विद्या- धीशतीर्थशिष्येण नरसिंहयतिना कृता श्रीमन्महैत- रेयोपनिषत्खण्डार्थप्रकाशिका समाप्ता ॥

Subject: Aitareyopaniṣad khaṇḍārtha or Khaṇḍārtha prakāśikā, an independent Dvaita commentary on Aitareyāraṇyaka II. 1. 1 to III. 2. 6.

Remarks :—The Ms. is in good condition though the letters are slowly fading away. The author of this work is Narasihma bhikṣu, a pupil to Vidyādhīśatīrtha.

---

## ॥ ऐतरेयोपनिषत्खण्डार्थप्रकाशिका ॥

## 1591. AITAREYOPANISAD KHANDĀRTHA PRAKĀŚIKĀ.

Burnell's Catalogue No. 5836. Page 110. Left column. Substance—Paper. Size—9¾ × 4 inches. Sheets—59 (56-114). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas — 1160. Author — Narasihmayati. Second and Third Āraṇyakas only.

Beginning, end, colophon and subject—Same as No. 1590.

Remarks:—The Ms. is in good condition. The front sheet of this Ms. contains the last portion of the commentary on Taittirīyopaniṣad by the same author.

---

## ॥ ऐतरेयोपनिषत्खण्डार्थसङ्ग्रहः ॥

## 1592. AITAREYOPANIṢAD KHAṆḌĀRTHA SAṄGRAHAḤ.

Burnell's Catalogue No. 5837. Page 109. Right column. Substance—Paper. Size—$13\frac{1}{4} \times 5\frac{1}{4}$ inches. Sheets—14. Lines—12 or 13 to a Page. Script—Devanāgarī. No. of Granthas—520. Author—Kṛṣṇācārya. First Praghaṭṭaka only.

Beginning:

श्रीवेदव्यासाय नमः । हरिः ॐ ।

एष नारायणो देवो वासुदेवादिरूपवान् ।
महिदासो महाभूतिः प्राणेशो भूतिदो भवेत् ॥ १ ॥
श्रीमदानन्दतीर्थार्याञ्जयतीर्थादिसद्गुरून् ।
प्रणमामि महाभाग्याद्राघवेन्द्रगुरून्सदा ॥ २ ॥
महैतरेयखण्डार्थो व्यासतीर्थादिभिर्लघुः ।
सङ्गृहीतः, स एवार्थो विस्तराल्लिख्यते मया ॥ ३ ॥
भाष्यार्थकथनात्खण्डवाक्यसङ्गतिदर्शनात् ।
क्वचित्क्वचित्तु सद्बुद्ध्यै सफलो(ऽ)यं श्रमो मम ॥ ४ ॥
न जानामि पदार्थं वा वाक्यार्थं वापि कुत्रचित् ।
अर्थसङ्ग्रहमात्रेण दयां कुर्वन्तु सज्जनाः ॥ ५ ॥

अथेष्टानिष्टप्राप्तिपरिहारेच्छूनां तदुपायमविजानतामधिकारिणामनुग्रहाय प्रवृत्तायाः पुण्डरीकाक्षकटाक्षप्रेक्षापूत-

गात्र्याः ऐतरेयाख्यभगवता दृष्टायाः महाभूतिरूपहरि-प्रतिपादकत्वेन महाभूत्याख्यायाः अत एवाचार्यैः सम्यग्व्याख्यातायाः अस्याः उपनिषदः ऐतरेय एव ऋषिः । विष्णोः रहस्यमुदितमित्युक्त्या मुख्यप्राणस्थो विष्णुरेव देवता । रमाब्रह्माद्याः अधिकारिणः । भगवद्दूज्ञानमेव प्रयोजनमित्युक्तमिति ज्ञातव्यं । अत्र ब्रह्मपन्थाः सत्यं कर्मेति नारायणस्य पञ्चरात्रादौ प्रसिद्धवासुदेवसङ्कर्षण-प्रद्युम्नानिरुद्धाख्याश्चतस्रो भूतयः प्रतिपाद्याः । खण्डार्थस्तु स्वयं नारायणः प्रभुः साहाय्यमकरोत्तत्रेत्युक्तरीत्या महेन्द्रस्याभिपत्यर्थमिन्द्रानुष्ठितमहाव्रतयज्ञे साहाय्यकर्तृत्वेन यज्ञभोक्तृत्वेन प्रकृतः एषः नारायणः ॥

End :

एवं ज्ञानिनः फलमाह—अमृतो ह वा अमुष्मिन् लोके सम्भवतीत्यादि तममृतं सर्वनायकं पूर्ण(र्णा)नन्दहरिणा गृहीतं तद्ब्रह्म वायुं यो(ऽ)धिकारी वेद जानाति, सो(ऽ)मुष्मिन् लोके विष्णुलोके अमृतो भवति । अमृतः सन् सर्वेभ्यो भूतेभ्यो युक्तैः सर्वभूतैश्च ददृशे(ऽ)दृश्यत इति । अत्र य एवं वेद य एवं वे(दे)ति द्विरुक्तिरुक्तार्थस्यावधारणायेति ज्ञातव्यम् । तदुक्तं—

'अवधारणार्थं सर्वस्याप्युक्तस्याध्यायमूलतः ।
द्विरुक्तिं कुर्वते प्राज्ञाः अध्यायान्ते विनिर्णय' इति ॥

Colophon :

इति श्रीमन्महैतरेयोपनिषत्खण्डार्थसङ्ग्रहे कृष्णाचार्यकृते
प्रथम प्रघट्टार्थः ॥

Subject : Aitareyopaniṣad khaṇḍārtha saṅgraha—an elaborate treatise on Aitareyavidyā based on

Mahaitareya khaṇḍārtha of Vyāsatīrtha and other Madhva authors. This Ms. contains commentary on Aitareyāraṇyaka II. 1.8.—First Praghaṭṭaka.

Remarks :— The Ms. is in good condition.

---

## ॥ ऐतरेयोपनिषत्खण्डार्थसङ्ग्रहः ॥

## 1593. AITAREYOPANIṢAD KHAṆḌĀRTHA SAṄGRAHAH.

Burnell's Catalogue No. 5838. Page 109. Right column. Substance—Paper. Size—13⅛ × 5¼ inches. Sheets—6. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—213. Author—Kṛṣṇācārya. Incomplete—Third praghaṭṭaka only.

Beginning :

"यत्र ब्रवीति षड्भिस्तु प्रार्थनीयः स मारुतः ।
मोचइ(यि)त्वैव संसाराद्विष्णुलोके कृषीति हि" इत्यादिवचनात् ।

उद्वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरं ।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमं ॥

वयं तमसः उद्धृता उत्तरं ज्योति(ः) सर्वोत्तमं विष्ण्वाख्यं ज्योतिः परिपश्यन्तः अपरोक्षीकुर्वन्तः तमेव देवत्रा देवं देवविषये(ऽ)पि देवं सूर्यं सूरिप्राप्यं उत्तमं अगन्म प्राप्ता(ः) स्मः ॥ इति ऋगर्थः ॥ अरिष्टसूचकनिमित्तान्तरमाह— अथापि यत्र छिद्र इति ॥

End :

षष्ठी

"सर्वप्रमाणसिद्धत्वं वक्तुमध्यायमूलतः ।
अध्यायान्ते द्विरुक्तिः स्यात्पूर्वोक्तस्यावधारणे" ॥

इत्युक्तरीत्या 'एष पन्थे' त्यादिनोक्तस्य सर्ववेदादिश- ब्दवाच्यत्वसर्वगुणपूर्णत्वसर्वोत्तमत्वसर्वस्रष्टृत्वपूर्णसुखत्वस- र्वनियामकत्वादिसर्वस्यार्थस्य प्रमाणसिद्धत्वावधारणार्थ- त्वादिज्ञापनायान्ते द्विरुक्तिराचार्या आचार्या इति ज्ञेयमिति भावः। तस्माद्भगवान्विष्णुः सर्ववेदप्रतिपाद्यत्वेन सर्वगु- णपूर्णत्वेन सर्वदोषवर्जितत्वेन सर्वैरधिकारिभिः सर्वदा ज्ञेयो ध्येयश्चेति सिद्धम् ॥

रुद्रादिसर्वदेवेज्यमुख्यप्राणस्थिताय च।
महैतरेयरूपश्रीकृष्णाय स्वामिने नमः ॥

महाविभूतिर्यो विष्णुः महिदासो महाप्रभुः।
वासुदेवो मम स्वामी श्रीप्राणसहितो(ऽ)वतु ॥

महैतरेयखण्डार्थसङ्ग्रहात्प्राणनायकः।
महाविभूतिर्मध्वार्यः हृदन्तस्थः प्रसीदताम् ॥

ज्ञानतो(ऽ)ज्ञानतो वापि खण्डार्थस्य च सङ्ग्रहात्।
दोषदृष्टिर्न कार्याऽत्र पण्डितैर्दोषवर्जितैः ॥

आचार्योक्तार्थकथनटीकाकर्तृ(श्रु)क्तसङ्ग्रहात्।
विशेषतो बुधास्सर्वे दयां कुर्वन्तु सज्जनाः ॥

Colophon :

इति श्रीमहैतरेयखण्डार्थसङ्ग्रहे कृष्णाचार्यकृते तृतीयप्रपाठे
द्वितीयो(ऽ)ध्यायः ॥ २ ॥

भारतीरमणमुख्यप्राणान्तर्गतरुग्मि(क्मि)णीसत्यभामासहित-
श्रीगरुडध्वजश्रीगोपालकृष्णार्पणमस्तु । मध्वेशायनमः ॥

Subject: Aitareyopaniṣad khaṇḍārtha saṅgraha, a commentary on Aitareyāraṇyaka. III. 2-4 to III. 2-6.

Remarks:—The Ms. is in good condition. This Ms. abruptly begins

with the commentary on the section 'अथापि यत्र छिद्रः०' in the fourth Khaṇḍa of the second Adhyāya of the third Āraṇyaka.

## ॥ काठकोपनिषद्भाष्यम् ॥

## 1594. KĀṬHAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5853. Page 99. Right column. Substance—Paper. Size—12¾ × 5¼ inches. Sheets—6. Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—Ānandatīrtha. Complete.

Beginning :

श्रीवेदव्यासाय नमः । हरिः ॐ ।

नमो भगवते तस्मै सर्वतः परमाय ते ।
सर्वप्राणिहृदिस्थाय वामनाय नमो नमः ॥ १ ॥

" अग्नौ विष्णुं सदा ध्यायंस्त्रिशोऽग्निं नाचिकेतकम् ।
यश्चिन्वीत स तु प्राप्य स्वर्गं तत्र भयातिगः ॥ २ ॥
उष्य मन्वन्तरं कालममृतत्वं भजेत्क्रमात् । "

इति ब्रह्मसारे ।

इच्छन्वाजश्रवो नाम्ना ददौ सर्वस्वदक्षिणाम् ।
उद्दालकः स्वर्गलोकं ददौ गाश्च निरिन्द्रियाः ॥
मां दत्वापि न ते गावः दातव्या ईदृशा इति ।
उवाच पुत्रस्त्वं बालस्तं शशाप पिता स्वयम् ॥

End :

यस्यात्मा शरीरं य आत्मानमन्तरोयमयतीति च जनानां हृदय इत्युक्तत्वाच्च जीवात्पृथग्घरिरिति सिद्धं ।

देहाङ्गुष्ठमितो देहे जीवाङ्गुष्ठमितो हृदि ।
जीवस्य तु स विज्ञेयो जीवाद्भावेन(द्भेदेन)मुक्तय इति च ॥

संसारिशरीरेणाभेदो वादिनो(ना) केनापि नाङ्गी-(कृ)तः । न च लोकसिद्धः । जनानामिति भेदात् । न जीवोऽङ्गुष्ठमात्रः । अतः विष्णोर्जीवाद्भेद उक्तः । अतः सर्वोत्तम(मो विष्णुः) इति सिद्धं ॥

नमो भगवते तस्मै विष्णवे प्रभविष्णवे ।
यस्याहमाप्त आप्तेभ्यो यो मे आप्ततमः सदा ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं काठकोप-निषद्भाष्यं समाप्तम् ॥

Subject : Kāṭhakopaniṣad bhāṣya—belonging to the Dvaita school of philosophy.

Remarks :—The Ms. is old and is in a fairly good condition. The letters are getting faded away. The Adhyāya and vallī divisions are not given in this Ms.

## ॥ काठकोपनिषद्भाष्यम् ॥

## 1595. KĀṬHAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5854. Page 99. Right column. Substance—Paper. Size—11½ × 4½ inches. Sheets—6. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—Ānandatīrtha. Complete.

Beginning, end, colophon and subject—Same as No. 1594.

Remarks :—The Ms. is in good condition.

## ॥ काठकोपनिषद्भाष्यम् ॥

## 1596. KĀṬHAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5888 c. Page 99. Right column. Substance—Paper. Size—9 × 4 inches. Sheets—8 (6-13).

Lines—10 to a Page. Script—Devanagarī. No. of Granthas —150. Author—Ānandatīrtha. Complete.

Beginning, end, colophon and subject—Same as No. 1594.

Remarks :—The Ms. is in good condition. For the other works contained in this Ms. see the list under Remarks on No. 1573.

## ॥ काठकोपनिषद्भाष्यम् ॥

## 1597. KĀṬHAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5889 a. Page 99. Right column. Substance—Paper. Size—8×4 inches. Sheets—6 (1-6). Lines—15 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—Ānandatīrtha. Complete.

Beginning, end, colophon and subject—Same as No. 1594.

Remarks:—The Ms. is in good condition. The other work contained in this Ms. is Ānandatīrtha's Māṇḍūkyopaniṣad bhāṣya.

---

## ॥ काठकोपनिषद्भाष्यम् ॥

## 1598. KĀṬHAKOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5892 c. Page 99. Right column. Substance—Paper. Size—$10\frac{1}{8}\times4$ inches. Sheets—9 (12-20). Lines—8 to a Page. Script—Devanāgarī. No. of Granthas —150. Author—Ānandatīrtha. Complete.

Beginning, end, colophon and subject—Same as No. 1594.

Remarks:—The Ms. is old and is in good condition. This Ms. contains the following works :

(1) माण्डूक्योपनिषद्भाष्यम् ॥ (last two lines only).

(2) तलवाकारो(केनो)पनिषद्भाष्यम् ॥

(3) काठकोपनिषद्भाष्यम् ॥

(4) तैत्तिरीयोपनिषद्भाष्यम् ॥

## ॥ काठकोपनिषद्भाष्यम् ॥

## 1599. KĀTHAKOPANISAD BHĀSYAM.

Burnell's Catalogue No. 6217. Page 99. Right column. Substance—Paper. Size —7⅛×2 inches. Sheets—15. Lines —5 or 6 to a Page. Script—Devanāgarī. No. of Granthas —150. Author—Ānandatīrtha. Complete.

Beginning, end, colophon and subject—Same as No. 1594.

**Remarks**:—The Ms. is old and is in good condition.

## ॥ काठकोपनिषद्भाष्यटीका ॥

## 1600. KAṬHAKOPANIṢAD BHĀṢYA ṬĪKĀ.

Burnell's Catalogue No. 5884. Page 99. Right column. Substance—Paper. Size—11½×4½ inches. Sheets—15. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—550. Author—Vyāsatīrtha. Complete.

Beginning:

श्रीवेदव्यासाय नमः ॥

यत्पदं मुनिभिर्ध्यातं वेदान्तश्रान्तमानसैः ।
वन्दे तं परमात्मानं विष्णुं श्रीमध्ववल्लभम् ॥ १ ॥
यो देवः परमत्वेन सर्वदेवैरुपास्यते ।
हृदये वामनाख्यं तं वन्दे श्रीमध्ववल्लभम् ॥ २ ॥

इहामुत्रभोगविरक्तस्य शमादिमतो मुमुक्षोरधिकारिणोऽनिष्टनिवृत्तीष्टप्राप्तिसाधनप्रतिपादिकं(कां) काठकोपनिषदं यथावद्व्याचिख्यासुर्भगवानानन्दतीर्थमुनिरादौ मङ्गलाचरणं चिकीर्षितपरिसमाप्त्यादिकारणमित्याशयवांस्तदुक्तगुणवत्तया भगवन्तं स्तुवन्प्रणमति— नम इति ॥ सर्वतः

परमत्वं 'इन्द्रियेभ्यः परा' इत्यारभ्य अव्यक्तात्पुरुषः

पर' इत्यन्तेनोक्तम् ॥

End:

मङ्गलावसानस्य प्रचयादिहेतुत्वादवसानेपि तदाचर-

णीयमिति द्योतयन् यत्प्रसादाद्यत्प्रीत्यै भाष्यमुपक्रम्य

समापितत्वात्, तमेवान्तेप्युपश्लोकयन्प्रणमाति— नम

इति। प्रभविष्णवे प्रभवनशीलायेत्यशेषमातिमङ्गलम् ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितकाठको-

पनिषद्भाष्यटीका जयतीर्थपूज्यचरण-

शिष्यव्यासतीर्थविरचिता

समाप्ता ॥

Subject: Kāṭhakopaniṣad bhāṣya Ṭīka—a commentary on Ānandatīrtha's Kāṭhakopaniṣad bhāṣya, belonging to the Dvaita school of Philosophy.

Remarks:—The Ms. is in good condition. The author of this commentary is Vyāsatīrtha, a pupil to Jayātīrtha.

## ॥ काठकोपनिषद्भाष्यटीका ॥

## 1601. KĀṬHAKOPANIṢAD BHĀṢYA ṬĪKĀ.

Burnell's Catalogue No. 5856. Page 99. Right column.
Substance—Paper. Size—$10\frac{1}{8}\times4\frac{1}{2}$ inches. Sheets—24 (1-27; sheets 13, 14 & 15 are missing). Lines—9 to 11 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—Vyāsatīrtha. Incomplete.

Beginning, end, colophon and subject—Same as No. 1600.

Remarks:—The Ms. is in good condition.

## ॥ काठकोपनिषद्भाष्यटीका ॥

## 1602. KĀṬHAKOPANIṢAD BHĀṢYA ṬĪKĀ

Burnell's Catalogue No. 5855. Page 99. Right column.
Substance—Paper. Size—$9\frac{1}{2} \times 4$ inches. Sheets—121.
Lines—7 or 8 to a Page. Script—Devanāgarī. No. of Granthas—2000. Author — Vedeśabhikṣu. Complete.

Beginning:

वेदव्यासाय नमः ॥ हरिः ॐ ।

प्रणम्य वामनं देवं श्रियं मध्वं गुरूंस्तथा ।
काठकोपनिषद्भाष्यव्याख्यानं क्रियते मया ॥ १ ॥

इह हि विषयविरक्तस्य शमदमादिमतो मुमुक्षोराधिकारिण आत्यन्तिकानिवृत्तीष्टप्राप्तिहेतुभूतभगवत्स्वरूपज्ञापनाय प्रवृत्तापि काठकोपनिषदन्यथाव्याख्यानावरुद्धत्वेन ने(नै)तज्ज्ञापनसमर्थेति मन्यमानो भगवानाचार्य आनन्दतीर्थमुनिः तां यथावद्व्याचिख्यासुः प्रारीप्सितपरिसमाप्त्यादिप्रयोजनतयाऽवगतामेतदुपनिषत्प्रतिपाद्यदेवताप्रणतिं शिष्यशिक्षार्थमादौ निबध्नाति— नम इति ॥ भगवते ऐश्वर्यादिषड्गुणसम्पन्नाय तस्मै वेदादिप्रसिद्धाय वामनाय नम इति ॥

End:

एवं यत्प्रसा(दा)द्यत्प्रीत्यैवेदं भाष्यमुपक्रम्य समापितवान् तमेव भगवन्तं अन्ते स्तुतिनतिभ्यां प्रीणयति भगवानाचार्यः— नम इति ॥ प्रभविष्णवे प्रभवनशीलायेत्यशेषमतिमङ्गलम् ॥

गुरुस्थानन्दतीर्थाय हृत्पङ्कजगतो हरिः ।
निर्दोषगुणसम्पूर्णः प्रीयतामिन्दिरापतिः ॥ १ ॥

प्रीतः स भगवान्विष्णुर्येद्यात्फलमुत्तमम् ।
तत्सर्वं गुरु(र)वे द[वे]यान्न मह्यं किञ्चिदप्यृतम् ॥ २ ॥

Colophon: (Sheet No. 70)

1. इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य काठको-
पनिषद्भाष्यस्य टीकायां श्रीमद्वेदव्यासतीर्थ-
पूज्यपादशिष्यवेदेशभिक्षुविरचितायां
पदार्थकौमुद्यां प्रथमोऽ-
ध्यायः ॥
श्रीविठ्ठलाय नमः ॥

(Last sheet)

2. इति श्रीमदानन्दतीर्थ + टीका श्रीमद्व्यासतीर्थ-
पूज्यचरणविरचिता पदार्थकौमुदी
समाप्ता ॥
करकृतमपराधं क्षन्तुमर्हन्तु सन्तः ॥
श्रीकृष्णार्पणमस्तु ॥
डुंबलानंदतीर्थाग्रपुत्रेण लिखितमिदम् ॥
मध्वेशार्पणमस्तु ॥

Subject: Padārtha Kaumudī—a commentary on Ānandatīrtha's Kāṭhakopaniṣad bhāṣya according to the Dvaita school of Philosophy.

Remarks:— The Ms. is old and is in good condition. The first colophon given above, attributes this Commentary to Vedeśa bhikṣu who is also known as the author of Chāndogyopaniṣad bhāṣya ṭīkā and other works. The second colophon, however, ascribes it to Vyāsatīrtha.

But on the evidence that Vyāsatīrtha has already written another commentary on Kāṭhakopaniṣad (see Nos. 1600 & 1601) it is to be concluded that Vedeśa-bhikṣu is the author of this work. Perhaps the scribe might have, due to carelessness, given in the second colophon the name of Vyāsatīrtha

instead of Vedeśa bhikṣu. Dr. Burnell's observation on this Ms.— 'by Vyāsatīrtha' is based on the second colophon cited above and hence it is wrong.

## ॥ केनोपनिषद्भाष्यम् ॥

## 1603. KENOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5879. Page 100. Right column. Substance—Paper. Size—11½ × 4¾ inches. Sheets—3. Lines—10 to a Page. Script— Devanāgarī. No. of Granthas—50. Author—Ānandatīrtha. Complete.

Beginning :

श्रीवेदव्यासाय नमः ॥

अनन्तगुणपूर्णत्वादगम्याय सुरैरपि ।
सर्वेष्टदात्रे देवानां नमो नारायणाय ते ॥ १ ॥
वैजयन्ते समासीनमेकान्ते चतुराननम् ।
विष्णोर्विविदिषुस्तत्वं पर्यपृच्छत्सदाशिवः ॥ २ ॥
यदिदं पुरुषावश्यं तत्र(च)तत्र पतेन्मनः ।
केन तत्प्रेरितं याति प्राणः सर्वोत्तमस्तथा ॥ ३ ॥
चक्षुः श्रोत्रं तथा वाचं को देवो विनियोजयेत् ।
इति पृष्टस्तदा ब्रह्मा प्राह देवमुमापतिम् ॥ ४ ॥
ध्यात्वा नारायणं देवं सर्वाधारमनुत्तमम् ।
सर्वज्ञं सर्वशक्तिश्च सर्वदोषविवर्जितम् ॥ ५ ॥
यः प्राणस्य प्रणेता च चक्षुरादेश्च सर्वशः ।
अगम्यः सर्ववेदैश्च परिपूर्णत्वहेतुतः ॥ ६ ॥
प्राणादीनां प्रणेता च सर्ववेत्ता च सर्वशः ।
सर्वोत्तमश्च सर्वत्र स विष्णुरिति धार्यताम् ॥ ७ ॥

End :

सत्य(मिति) मीमांसा ।

निर्णीयते यतः सम्यगिदं सत्यमिति स्फुटं ।
श्रुतिस्मृत्युदितं सर्वं व्यक्तं मीमांसयैतया ।
सत्यमित्युच्यते तस्मान्मीमांसा ब्रह्मनिश्चयः ॥

इति शब्दनिर्णये ।

ऋग्यजुःसामाथर्वाख्याः पञ्चरात्रं च भारतम् ।
मूलरामायणश्चैव पुराणं भगवत्परम् ॥
वेदा इत्युच्यते सद्भिः शिक्षाद्यं स्मृतयस्तथा ।
अङ्गानि सत्यं मीमांसा तद्विद्यायतनं त्रयम् ॥

इति विद्यानिर्णये ॥

यश्चिदानन्दसच्छक्तिसम्पूर्णो भगवान्परः ।
नमोऽस्तु विष्णवे तस्मै पेष्ठाय प्रेयसां च मे ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं तलव-
कारोपनिषद्भाष्यं समाप्तम् ॥

Subject : Kenopaniṣadbhāṣya—a commentary on Kenopaniṣad otherwise known as Talavakāropaniṣad, according to the Dvaita school of Philosophy.

Remarks :—The Ms. is in good condition.

## ॥ केनोपनिषद्भाष्यम् ॥

## 1604. KENOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5888 e. Page 100. Right column.
Substance—Paper. Size—9¼ × 4 inches. Sheets—3 (19-21). Lines —10 to a Page. Script—Devanāgarī. No. of Granthas—50. Author—Ānandatīrtha. Complete.

Beginning, end, colophon and subject—Same as No. 1603.

Remarks :—The Ms. is old and is in a fairly good condition. For the other works contained in this Ms. see the list under Remarks on No. 1573.

## ॥ केनोपनिषद्भाष्यम् ॥

## 1605. KENOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5890 a. Page 100. Right column. Substance—Paper. Size—$12\frac{1}{2} \times 5$ inches Sheets.—2 (1-2). Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—50. Author—Ānandatīrtha. Complete.

Beginning, end, colophon and subject—Same as No. 1603.

Remarks : – The Ms. is old and is in a bit worn-out condition. The other work contained in this Ms. is the Māṇḍūkyopaniṣadbhāṣya by Ānandatīrtha.

## ॥ केनोपनिषद्भाष्यम् ॥

## 1606. KENOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5892 b. Page 100. Right column. Substance—Paper. Size—$10\frac{1}{4} \times 4$ inches. Sheets—3 (9-11). Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—50. Author—Ānandatīrtha. Complete.

Beginning, end, colophon and subject—Same as No. 1603.

Remarks :—The Ms. is old and is in a fairly good condition. For the other works contained in this Ms. see the list under Remarks on No. 1598.

## ॥ केनोपनिषद्भाष्यम् ॥

## 1607. KENOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 6221. Page 100. Right column.

Substance—Paper. Size—7×2 inches. Sheets—5. Lines—7 to a Page. Script—Dèvanāgarī. No. of Granthas—50. Author—Ānandatīrtha. Complete.

Beginning, end and subject—Same as No. 1603.

Colophon : Nil.

Remarks:—The Ms. is in good condition.

---

## ॥ केनोपनिषद्भाष्यविवरणम् ॥

## 1608. KENOPANIṢAD BHĀṢYA VIVARAṆAM.

Burnell's Catalogue No. 5880. Page 100. Right column. Substance—Paper. Size—10⅛×4¼ inches. Sheets—17. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Vedeśabhikṣu. Complete.

Beginning:

श्री वेदव्यासाय नमः ।

प्राणादेरीशितारं निखिलगुणनिधिं सर्ववेदाद्यगम्यं
व्यक्ताव्यक्तात्परं तं परमसुखनिधिं सर्वदोषातिदूरम् ।
सर्वज्ञं सर्वदेवेष्टदमपि निखिलं भासयन्तं स्वभासा
वन्दे विष्णुं सदाहं निखिलगुणसमूहापरं मुक्तगम्यम् ॥

निखिलाद्वैतसिद्धान्तप्राप्ताज्ञानविनाशकः ।
श्रीमदाचार्यसूर्ये(र्यो)यं दद्यात्तत्वप्रकाशनम् ॥ २ ॥

श्रीमदाचार्यसान्निध्यबलाद्यस्तस्य भाववित् ।
प्रकटीकृत्य तं सम्यक् जयतीर्थोऽभिभासते ॥ ३ ॥

येन वेदान्तभाष्याणि विवृतानि महात्मना ।
तं वन्दे व्यासतीर्थाख्यं वेदान्तार्थप्रसिद्धये ॥ ४ ॥

रघूत्तमगुरुर्भूयान्मम ज्ञानाय सर्वदा ।
श्रीमध्वशास्त्रं संशोध्य यः सम्यग्ज्ञानमाप्तवान् ॥ ५ ॥

श्रीमदानन्दतीर्थार्यमुखपङ्क(ज)निःसृतम् ।
भाष्यं तलवकारस्य व्याख्यास्येऽहं यथामति ॥ ६ ॥

नत्वा रमापतिं सर्वदेवानामिष्टदं हरिम् ।
भाष्यं तलवकारस्य व्याख्यास्येहं यथामति ॥ ७ ॥

इह हि विविधसांसारिकदुःखदर्शनेन विरक्तस्य शमदमादिमतोऽधिकारिणो मोक्षार्थं भगवत्स्वरूपप्रतिपादनाय प्रवृत्तां तलवकारोपनिषदं यथावद्व्याचिख्यासुः मार(री)प्सितनिर्विघ्नपरिसमाप्त्यादिप्रयोजने उपनिषत्प्रतिपाद्यगुणवन्नारायणस्तुतिनती शिष्यशिक्षार्थं ग्रन्थादौ निबध्नाति— अनन्तेति ॥

End:

इदानीं विद्यायाः साधनमुपदिशति— वेदा इति ॥ वेदा ऋगादयः । अङ्गानि शिक्षादीनि । सत्यं मीमांसा । तस्या विद्यायाः आयतनमुत्पत्तिकारणमित्यर्थः । प्रतिष्ठायतनसहितोपनिषत्स्वरूपवेत्तुः फलमाह— य इति ॥ योऽधिकारी एतां सप्रतिष्ठां सायतनां उपनिषदं वेद स पाप्मानमपहत्य अनन्ते देशतः कालतश्च परिच्छेदशून्ये स्वर्गे स्वरूपभूतरमणज्ञानरूपे लोके प्रकाशरूपे ज्येये सर्वोत्तमे विष्णौ प्रतितिष्ठति । द्विरुक्तिरादरार्था ॥ एवं समापितभाष्यो भगवानाचार्यो अन्तेऽपि भगवत्स्तुतिनतिरूपं मङ्गलमाचरति— य इति ॥

श्रीमदानन्दतीर्थार्यहृत्सरोजे व्यवस्थितः ।
आनन्दादिगुणोद्रिक्तः प्रीयतां कमलापतिः ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य तलवकारोपनिषद्भाष्यस्य विवरणं वेदेशभिक्षुविरचितं सम्पूर्णम् ॥

भाष्यं तलवकारस्य यत्कृतं प्रीतये हरेः ।
मध्वेन तस्य या टीका तां लिलेख नृकेसरी ॥

Subject: Kenopaniṣad bhāṣya vivaraṇa—a gloss on Talavakāropaniṣad or Kenopaniṣad bhāṣya according to the Dvaita system of Philosophy.

Remarks :—The Ms. is old and is in good condition. The scribe's name is Nṛkesarin.

## ॥ केनोपनिषद्भाष्यविवरणम् ॥

## 1609. KENOPANIṢAD BHĀṢYA VIVARAṆAM.

Burnell's Catalogue No. 5881. Page 100. Right column. Substance—Paper. Size—$9\frac{1}{8} \times 4\frac{1}{2}$ inches. Sheets—13. Lines—13 or 14 to a Page. Script—Devanāgarī. No. of Granthas—395. Author—Vedeśabhikṣu. Complete.

Beginning :

श्री गुरुभ्यो नमः ॥ हरिः ॐ

नत्वा रमापतिं सर्वदेवानामिष्टदं हरिम् ।
भाष्यं तलवकारस्य व्याख्यास्येऽहं यथामति ॥

इह हि॰ Same as No. 1608.

End and subject—Same as No. 1608.

Colophon :

श्रीमदानन्दतीर्थभगवत्पाद + भाष्यस्य विवरणं वेदेशतीर्थ-भिक्षुविरचितं समाप्तम् ॥

श्रीरामवेदव्यासार्पणमस्तु ॥

Remarks :—The Ms. is very old and is in a fairly good condition, though the sheets are damp in appearance. The introductory

verses given in the beginning of No. 1608 are not found in this Ms.

॥ केनोपनिषद्भाष्यविवरणम् ॥

## 1610. KENOPANIṢAD BHĀṢYA VIVARAṆAṂ.

Burnell's Catalogue No. 5882. Page 100. Right column. Substance—Paper. Size—12 × 4½ inches. Sheets—11. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—395. Author—Vedeśabhikṣu. Complete.

Beginning, end, colophon and subject—Same as No. 1609.

Remarks :—The Ms. is very, very old and is in a crumbled state. The introductory verses given in No. 1608 are not found in this Ms.

॥ केनोपनिषद्भाष्यविवरणम् ॥

## 1611. KENOPANIṢAD BHĀṢYA VIVARAṆAṂ.

Burnell's Catalogue No. 5883. Page 100. Right column. Substance—Paper. Size—11½ × 4½ inches. Sheets—4. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—95. Author—Vyāsatīrtha. Complete.

Beginning:

श्रीवेदव्यासाय नमः ॥

सच्चिदानन्दसच्छक्तिसम्पूर्णो भगवान्परः ।
नमोऽस्तु विष्णवे तस्मै प्रेष्ठाय प्रेयसां च मे ॥ १ ॥
जडाजडात्मकं विश्वं कृत्वाधिष्ठाय संहरन् ।
स्वभावात्क्रीडते यस्तं वेदश्रीशब्धवल्लभम् ॥ २ ॥
योऽसुरानजयद्देवः हृदयस्थस्तदर्थतः ।
ददौ चाभीष्टमिष्टेभ्यो तं वन्दे मध्ववल्लभम् ॥ ३ ॥

तलवकारोपनिषदं व्याचिख्यासुः भगवानानन्दतीर्थमुनिः तदुक्तगुणैरुपश्लोकयन् नारायणं प्रणमति— अनन्तेति ॥

End :

ननु विद्यास्थानानां चतुर्दशत्वात्कथं वेदाः सर्वाङ्गानि सत्यमायतनमिति स्थानत्रित्वोक्तिरित्यतो विद्यास्थानानां चतुर्दशत्वेपि विवक्षाभेदात्रित्वोक्तिरित्याह— ऋग्यजुरित्यादिना । शिक्षाद्यं स्मृतयश्चाङ्गानीत्युच्यन्ते मीमांसा तर्कशास्त्रं तस्माद्विद्यायतनं त्रयमुक्तमित्यर्थः । मङ्गलाचरणस्य शास्त्रस्य प्रचयादिहेतुत्वाद्भाष्यं समाप्यान्तेपि स्वेष्टदेवतास्तुतिनमनरूपं मङ्गलमाचरति— य इति ॥

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिततलवकारोपनिषद्भाष्यविवरणं जयतीर्थपूज्यचरणशिष्यव्यासतीर्थमुनिकृतं

समाप्तम् ॥

॥ श्रीरस्तु ॥

Subject : Talavakāropaniṣad or Kenopaniṣad bhāṣya Vivaraṇa—a gloss on Kenopaniṣad bhāṣya according to the Dvaita (Dualistic) school of Philosophy.

Remarks :—The Ms. is old and is in good condition. The author of this work is Vyāsatīrtha, pupil of Jayātīrtha.

## ॥ छान्दोग्योपनिषद्भाष्यम् ॥

## 1612. CHĀNDOGYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5774. Page 98. Right column.
Substance—Paper. Size—$10\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—50.

Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1200. Author—Ānandatīrtha. Complete.

Beginning:

श्रीवेदव्यासाय नमः ॥ हरिः ॐ ॥

अत्युद्रिक्ताविदोषसत्सुखमहाज्ञानैकतानप्रभा-
सर्वप्राभवशक्तिभोगबलसत्सारात्मदिव्याकृतिम् ।
सृष्टिस्थाननिरोधनित्यनियतिज्ञानप्रकाशावृति-
ध्वान्तामोक्षविमोक्षदं हरिमजं नित्यं सदोपास्महे ॥ १ ॥
हयग्रीवमुखोत्कीर्णगीर्भिर्देवी रमापतिः(तिं) ।
अस्तुवद्विस्तृतगुणं भोगिप्रस्तरशायिनम् ॥ २ ॥

ओमिति नामकमक्षरं सर्वसाभिहितत्वादेतत् उचत्वा-द्गीतत्वात्सर्वस्थानत्वाच्चोद्गीथं भगवन्तमुपासीत । उक्तं च महासंहितायां—

"हयग्रीवोद्गीतवाक्यै रमा देवी रमापतिं ।
ॐमित्येतन्मुखैर्देवमस्तुवत्सामवेदगैः ॥" इति ॥

End:

पूर्णानन्दमहोदधिः परतमो नित्यः परस्मात्सदा
सर्वज्ञः सकलेश(शि)तागुणनिधिर्नित्योत्सवस्तद्विदां ।
सर्वस्मादधिकं मम प्रियतमस्त्विष्टादपीष्टोत्तमः
सर्वस्माच्च हितात्सदा हिततमः प्रीतो भवेन्मे हरिः ॥
यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
वट् तद्दर्शितमित्यमेव निहितं देवस्य भर्गो महत् ।
वायोरात्तवचोनयं प्रथमकं पृक्ष(क्षो) द्वितीयं वपु-
र्मध्वो यत्तु तृतीयकं कृतमिदं भाष्यं हरौ तेन हि ॥
हनुशब्दो ज्ञानवाची हनुमान्मतिशब्दितः ।
रामस्य स्तुतरूपस्य वाचो नेता गुणोदधिः ॥

भूतमो भीम इत्युक्तो वेदो(वाचो)मा मातरः स्मृताः ।
ऋगाथा इतिहासश्च पुराणं पञ्चरात्रकम् ॥

प्रोक्ताः सप्तशिवास्तत्त्रशयो भीमस्ततः स्मृतः ।
मध्वित्यानन्द उद्दिष्टो वेति तीर्थमुदाहृतम् ॥

मध्व आनन्दतीर्थः स्यात् तृतीया मारुती तनुः ।
इति सूक्तगतं रूपत्रयमेतन्महात्मनः ॥

यो वेद वेदसात्तत्वं चित्तप्रसादतः
(वेदवित्स स्यात् तत्वविच्चित्प्रसादतः) } इति च सद्भावे ॥

आनन्दतीर्थ इति तु यस्य नाम तृतीयकम् ।
पूर्णप्रज्ञेन तेनेदं कृतं भाष्यं हरेः प्रियम् ॥

नित्यानन्दो हरिः पूर्णो नित्यदा प्रीयतां मम ।
नमस्तस्मै नमस्तस्मै नमस्तस्मै च विष्णवे ॥

Colophon : (Sheet No. 39).

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीमच्छान्दोग्यो-
पनिषद्भाष्ये षष्ठोऽध्यायः ॥

Subject : Chāndogyopaniṣad bhāṣya belonging to the Dvaita system of Philosophy. 1—8 Adhyāyas.

Remarks : —The Ms. is in good condition.

## ॥ छान्दोग्योपनिषद्भाष्यम् ॥

## 1613. CHĀNDOGYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5775 . Page 98. Right column. Substance—Paper. Size—10×4½ inches. Sheets—47. Lines—12 or 13 to a Page. Script—Devanāgarī. No. of Granthas—1200. Author—Ānandatīrtha. Complete.

Beginning, end and subject—Same as No. 1612.

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमच्छन्दोगोप-
निषद्भाष्ये अष्टमो(ऽ)ध्यायः ॥

गुर्वन्तर्गतमध्वान्तर्गतश्रीवेदव्यासात्मकश्रीनिवासार्पणमस्तु ॥

Remarks:—The Ms. is old and is in a fairly good condition.

---

## ॥ छान्दोग्योपनिषद्भाष्यम् ॥

## 1614. CHĀNDOGYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5776. Page 98 Right column. Substance—Paper. Size—8×4 inches. Sheets—35. Lines—14 to 17 to a Page. Script—Devanāgarī. No. of Granthas—1200. Author—Ānandatīrtha. Complete.

Beginning, end and subject—Same as No. 1612.

Colophon:

इति श्रीमदानन्दतीर्थ + अष्टमोऽध्यायः ॥

श्रीगुर्वन्तर्गतवेङ्कटेशः प्रीयतामनेन लेखनेन ।

छन्दोगोपनिषद्भाष्यं सर्वछन्दोर्थबृंहितम् ।

स्वच्छन्दहरितुष्ट्यर्थं अच्छं शेषं(षो) व्यलेखिखीत् ॥

Remarks:— The Ms. is in good condition. The scribe's name is given as Śeṣa.

## ॥ छान्दोग्योपनिषद्भाष्यम् ॥

## 1615. CHĀNDOGYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5887 d. Page 98. Right column. Substance—Paper. Size—13×5 inches. Sheets—40 (27-66). Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1200. Author—Ānandatīrtha. Complete.

Beginning, end and subject—Same as No. 1612.

Colophon:—Same as No. 1613.

Remarks :—The Ms. is very old and is in a decaying condition. For the other works contained in this Ms. see the list under Remarks on No. 1572.

## ॥ छान्दोग्योपनिषद्भाष्यम् ॥

## 1616. CHĀNDOGYOPANISAD BHĀSYAM.

Burnell's Catalogue No. 6218. Page 98. Right column. Substance—Paper. Size—7⅛×3 inches. Sheets—112. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—1200. Author—Anandatīrtha. Complete.

Beginning, end and subject—Same as No. 1612.

Colophon :

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीमच्छान्दोग्योपनिषद्भाष्ये अष्टमोऽध्यायः ॥

श्रीमत्पिङ्गलसंवत्सरआश्विनबहुलषष्ठ्यां इन्दुवासरे अलङ्कारवेदव्यासेन लिखितमिदं पुस्तकं समाप्तम् ॥

Remarks :—The Ms. is old and is in good condition. The Ms. is dated Monday—sixth day after the full moon—in Āśvina (Bahula) month in the year Pingala which corresponds to Śaka 1659 or 3rd October 1737 A. D. The scribe's name is given as Alankāravedavyāsa.

## ॥ छान्दोग्योपनिषद्भाष्यम् ॥

## 1617. CHĀNDOGYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 6233. Page 98. Right column. Substance—Paper. Size—8½×3½ inches. Sheets—17. Lines—20 to 22 to a Page. Script—Devanāgarī. No. of Granthas—1200. Author—Ānandatīrtha. Complete.

Beginning, end and subject—Same as No. 1612.

Colophon—Same as No. 1613.

Remarks:—The Ms. is old and is in good condition. Some sheets are gilted and some are blue in colour. The script is too small but is good and legible.

## ॥ छान्दोग्योपनिषद्भाष्यटीका ॥

## 1618. CHĀNDOGYOPANIṢAD BHĀṢYA ṬĪKĀ.

Burnell's Catalogue No. 5777. Page 98. Right column. Substance—Paper. Size—13¾ × 5¼ inches. Sheets—42. Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—2100. Author—Vyāsatīrtha (bhikṣu). Complete.

Beginning:

श्रीवेदव्यासाय नमः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्येभ्यो नमः ॥

हरिः ॐ ॥

प्रणम्य रमणं लक्ष्म्याः पूर्णबोधान्गुरूनपि ।
छन्दोगोपनिषद्भाष्यसम्बन्धः क्रियते मया ॥ १ ॥

इहामुत्रभोगविरक्तस्य शमादिमतो मुमुक्षोरनिष्टनिवृत्तीष्टावाप्तिसाधनसौकर्यप्रतिपादिकां छन्दोगोपनिषदं यथावद्व्याचिख्यासुर्भगवानानन्दतीर्थमुनिरभिलषितेष्टप्रदं तदुक्तगुणं भगवन्तमुपास्ते— अतीति ॥ सुखस्य विशेषत्वमुत्पत्त्यादिरहितत्वं । सत्वं च तस्य तत्स्वरूपत्वम् । एकतानप्रभा अनन्यवृत्तिप्रभा ॥

End:

ध्यानरूपां स्मृतिं पठति—हन्विति ॥ हनुशब्दो ज्ञानवाची । तथा च हनुमान्मतिरित्येकोऽर्थः । याश्च वाचः ता एव मातृत्वान्मातरः तथा तत्र मातृषु त्रयो भीमश्चेत्येकोऽर्थः । मध्वशब्दो आनन्दतीर्थ इत्यनेनैकार्थ इत्याह—

मध्विति। केन रूपेणेदं भाष्यं कृतमिति जिज्ञासायामाह—
आनन्देति। भाष्यकृत्प्रयोजनं विस्पष्टमाह—नित्येति।
भक्त्याधिक्यात्पुनरपि नमति ॥

स्वरूपानन्दसन्दोहविषयानुभवात्मने।
नमो नारायणायाथ मध्वाय च नमो नमः॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितश्रीमच्छान्दोगोपनिष-
द्भाष्यटीकायां श्रीमज्जयतीर्थपूज्यचरणशिष्यव्यास-
तीर्थभिक्षुविरचितायां अष्टमोऽध्यायः॥

श्रीमध्वेशार्पणमस्तु॥

Subject: Chāndogyopaniṣad ṭikā—a gloss on Ānandatīrtha's Chāndogyopaniṣad bhāṣya belonging to the Dvaita school of philosophy. 1-8 Adhyāyas.

Remarks:—The Ms. is old and is in good condition, though the first sheet is a bit worn out. The last sheet is blank.

## ॥ छान्दोग्योपनिषद्भाष्यटीका ॥

## 1619. CHĀNDOGYOPANIṢAD BHĀṢYA ṬĪKĀ.

Burnell's Catalogue No. 5778. Page 99. Left column. Substance—Paper. Size—10⅞×4 inches. Sheets—172. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—4000. Author—Vedeśabhikṣu. Incomplete (wants end).

Beginning:

श्रीवेदव्यासाय नमः॥

श्रीमदानन्दतीर्थभगवत्पादाचार्येभ्यो नमः॥

पूर्णानन्दमहाविबोधमखिलं सम्भासयन्तं हृचा
सर्वत्र प्रभुमीश्वरं गुणनिधिं दिव्याकृतिं केशवम्।

जन्माद्यस्य यतो हि सर्वजगतो जन्मादिदोषोज्झितं
नित्यं पूर्णविबोधश(स)र्वगुरुणोपास्यं भजे नित्यदा ॥
वेदभेदसुशाखेतं बोधादिफलसंयुतम् ।
भजतामिष्टदं व्याससुरद्रुममहं भजे ॥
हृत्तमोनाशकं प्रशास्त्रभया तत्त्वभासकम् ।
फलदं पूर्णबोधाख्यचिन्तामणिमहं भजे ॥
प्रणम्य चरणौ वाणि याचयामि तवान्वहम् ।
सन्निधिर्मम वाच्यस्तु मानसे च निरन्तरम् ॥
यत्प्रसादं विना तत्वमार्गेण गमनं भुवि ।
तं वन्दे पद्मनाभाख्यगुरुं सज्जनसेवितम् ॥
वेददुग्धाब्धिमामथ्य सूत्रमन्दरभूभृता ।
प्राप्ता न्यायसुधा येन तं जयेन्द्रमहं भजे ॥
श्रीमध्वकृतवेदान्तभाष्यं येन प्रकाशितम् ।
वन्दे तं व्यासतीर्थार्यं जयराजनिषेवकम् ॥

विद्याधिराजादिमहामुनीन्द्रा
हृद्येव सञ्चिन्तितविष्णुतत्त्वाः ।
उद्योगयुक्ता भगवत्कथामृते
सद्यो ममानुग्रहमेव कुर्युः ॥

ब्रह्मण्यतीर्थवार्ध्युत्थव्यासतीर्थसुधाकरम् ।
तात्पर्यचन्द्रिकायुक्तं वन्दे तापत्रयापहम् ॥
रघूत्तममुनीन्विद्यागुरून्परगुरूंस्तथा ।
वन्दे श्रीमध्वशास्त्रोत्थविनिर्मलयतीनहम् ॥
निरस्तं हृत्तमो येन प्रशस्तं सन्मनोऽम्बुजम् ।
समस्तं भासितं वन्दे वेदव्यासदिवाकरम् ॥

अथ तत्कृपया श्रीमदाचार्यमुखनिःसृतम् ।
छन्दोगोपनिषद्भाष्यं व्याकरिष्ये यथामति ॥
न मात्सर्यादिदोषेण न वा विद्यातिगर्वतः ।
किन्तु वाचां विशुद्ध्यर्थं यत्नोऽयं न हि दोषभाक् ॥

इह हि नानाविधसांसारिकक्लेशसन्दर्शनेन कुपितफणिफणच्छायासमीकृतापरसुखानां शमदमादिमतामधिकारिणामात्यन्तिकानिष्टनिवृत्तीष्टप्राप्तिसाधनं भगवत्स्वरूपं यथावत् ज्ञापयितुं प्रवृत्तापि छान्दोग्योपनिषदविद्यापटलपिहितनयनैरन्यैरन्यथा व्याख्यातत्वेन न तद्ज्ञापने समर्थेति मन्यमानो भगवानानन्दतीर्थमुनिः तां यथावद्व्याचिख्यासुः स्वयमन्तरायविधुरोऽप्यविगीतशिष्टाचारपरम्पराप्राप्तं प्रारीप्सितपरिसमाप्त्यादिप्रयोजनमेतदुपनिषदुक्तगुणवद्भगवदुपास्तिलक्षणं मङ्गळं शिष्यशिक्षणार्थं ग्रन्थादौ निबध्नाति—अत्युद्रिक्तेति ॥

End:

एवं वेत्तुः फलमाह— स इत्यादिना । स यः प्रसिद्धोऽधिकारी एतत् आदित्यान्तर्गतं । एवमुक्तरीत्या विद्वानादित्यं तत्स्थं तन्ना(म)कं ब्रह्मेत्युपास्ते । एनमधिकारिणं साधवोऽपौरुषेया घोषा वेदा आगच्छेयुरिति यत्तदभ्याशं समीप एव शीघ्रमेव सर्ववेदप्राप्तिर्भवतीत्यर्थः । प्राप्ता सर्वे वेदा न विस्मृता भवन्तीत्याह— उपनिम्रेडेरंश्चेति सर्वदा उ ...... ॥

Colophon : (Sheet No. 113).

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचित श्रीमच्छन्दोगोपनिषद्भाष्यटीकायां श्रीमद्वेदव्यासतीर्थपूज्यपाद-

शिष्यवेदेशभिक्षुविरचितायां पदार्थकौ-
मुद्यां द्वितीयो(ऽ)ध्यायः ॥

Subject: Padārtha Kaumudī— a gloss on Ānandatīrtha's Chāndogyopaniṣad bhāṣya, belonging to the Dvaita system of Philosophy. 1 to 3 Adhyāyas.

Remarks:—The Ms. is old and is in good condition. It breaks off towards the commentary on the bhāṣya of the last Khaṇḍa of the third Adhyāya.

## ॥ छान्दोग्योपनिषदर्थसङ्ग्रहः ॥

## 1620. CHĀNDOGYOPANIṢAD ARTHA SAṄGRAHAḤ.

Burnell's Catalogue No. 5779. Page 110. Left Column. Substance—Paper. Size—$13\frac{1}{4}\times5\frac{1}{4}$ inches. Sheets—62. Lines—13 or 14 to a Page. Script—Devanāgarī No. of Granthas—2800. Author—Rāghavendrayati. Complete.

Beginning:

श्रीवेदव्यासाय नमः ॥ हरिः ॐ ॥

अशेषगुणपूर्णाय दोषदूराय विष्णवे ।
नमः श्रीप्राणनाथाय भक्ताभीष्टप्रदायिने ॥
श्रीमच्छान्दोग्याभिमता भाष्यकाराद्युदीरिताः ।
अर्था ये, सङ्ग्रहस्तेषां क्रियते साधुतुष्टये ॥ २ ॥

ॐ इहामुत्रफलभोगे विरक्तस्य शमदमादिमतो मुमु-
क्षोरधिकारिणोऽनिष्टनिवृत्तीष्टप्राप्तिसाधनप्रतिपादनाय प्र-
वृत्ताया अस्याः छन्दोगोपनिषदो हयग्रीवः प्रथमः ऋ-
षिः रमादेवी तदनन्तर ऋषिः शेषशायी हरिर्देवता । वा-
क्यरूपत्वाच्च छन्दाश्रिता साम्नः प्रस्तावप्रतिहारोद्गीथोप-
द्रवनिधनभेदेन पञ्च भक्तयः आ आ इति यावत् ॥ तत्रा-

दावुद्गीथलक्षणसामैकदेशसर्ववेदार्थप्रतिपादनप्रकरणार्थभू-
तभगवन्निष्ठोपासनमाह— ॐमित्यादिना ॥

End :

आदरजननायैव उपनिषत्प्रवर्तकानाह श्रुतिः— तद्धै-
तदित्यादिना । तदेतद्ब्रह्मा भगवान् प्रजापतये चतुर्मु-
खाय स च स्वायम्भुवमनवे स च प्रजाभ्यः उवा-
चेत्यर्थः ॥

* * * * *

यत्र यज्ञादौ हिंसा शास्त्रोक्ता ततोऽन्यत्र सर्वभूतान्य-
हिंसन् स खलु कुटुम्बी यावदायुषं एवं वर्तयन् वर्तमानः
ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्तते । तत्रैव नि-
जानन्दमनारतमनुभवन्नास्त इति । पुनरुक्तिरादरार्था ।
एतच्च कृत्स्नगृहस्थाश्रमधर्मोपेतदेवविषयं । तदाह सूत्रे
—‘ कृत्स्नभावात्तु गृहिणोपसंहार ’ इति ॥

Colophon :

इति श्रीमच्छन्दोगोपनिषदर्थसङ्ग्रहे सुधीन्द्रगुरुपाद-
शिष्यराघवेन्द्रयतिकृते अष्टमो(ऽ)ध्यायः ॥

श्रीकृष्णार्पणमस्तु ॥

Subject : Chāndogyopaniṣad arthasaṅgraha—a gloss on the Chāndogyopaniṣad, chiefly bringing out the dvaita tenets therein. 1—8 Adhyāyas.

Remarks :—The Ms. is old and is in good condition. The author of this work is Rāghavendrayati, a pupil to Sudhīndra gurupāda. According to the introductory verse given above, this work is a good summary of the Chāndogyopaniṣad bhāṣya of Ānandatīrtha Madhvācārya.

## ॥ तैत्तिरीयोपनिषद्भाष्यम् ॥

## 1621. TAITTIRĪYOPANIṢAD BHĀṢYAM.

Burnell's Catalogue No. 5781. Page 99. Left column.

Substance—Paper. Size—$8\frac{1}{2} \times 4$ inches. Sheets—16. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—275. Author—Ānandatīrtha. Complete.

Beginning:

श्रीवेदव्यासाय नमः ॥

सत्यज्ञानमनन्तं आनन्दं ब्रह्म सर्वशक्त्यै(क्त्ये)कं ।
सर्वैर्देवैरीड्यं विष्ण्वाख्यं सर्वदैमि सुप्रेष्टम् ॥ १ ॥

आदित्यसंस्थिताद्विष्णोः श्रुत्वा ब्रह्मा यथा हरिं ।
तुष्टाव तत्प्रकारेण वरुणोक्तेन वै भृगुः ॥ २ ॥

विष्णुमस्तौत्तथा प्राह शन्नोमित्रादिका श्रुतिः ।
यदुवाच हरिः सूर्यमण्डलस्थः परः पुमान् ॥ ३ ॥

ब्रह्मा तदाह वरुणे वरुणो भृगवे(ऽ)पि तु ।
शन्नोमित्रादिभिर्वाक्यैस्तैरेव हरिमस्तुवत् ॥ ४ ॥

भृगुः पञ्चात्मकं पूर्णमन्नादिमयमच्युतम् ।
मुक्तगीतावसानैस्तु स्तुतस्तेन जनार्दनः ॥ ५ ॥

सुप्रीतः प्रददौ ज्ञानं स्वात्मभक्तिं च शाश्वतीं । इत्यादि यजुस्संहितायां ॥

भृगुवाक्यतया वायुनमस्कारादिकं हरिः ।
प्रोवाच ब्रह्मणे चैवं वचस्सु बहुदर्शिषु ॥ इति च ॥

वरणीयो वर्णः । स्वरतेः स्वरः । मानात् त्राता
मात्रा । बलरूपः । समश्च सर्वरूपेषु । सन्ततश्च ॥

वर्णादिवाचकं रूपं ज्ञेयं वर्णादिनामकं ।
विष्णोर्वर्णादिसंस्थं च पुंसु तत्तत्क्रियाप्रदम् ॥

End:

ईशानासुः(साः) सूरयश्च निगूढाभिर्ग(र्गु)णोक्तिभिः ।
त्रेतायां द्वापरे चैव कलौ चेते क्रमात्रयः ॥
एतेषां परमो विष्णुः नेता सर्वेश्वरेश्वरः ।
स्वयम्भू(ः) ब्रह्मसंज्ञोसौ परस्मै ब्रह्मणे नमः ॥ इति च ।
पूर्णागण्यगुणोदारधाम्ने नित्याय वेधसे ।
अमन्दानन्दसान्द्राय प्रेयसे विष्णवे नमः ॥

Colophon:

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते तैत्तिरीयोप-
निषद्भाष्ये भृगुवल्ली समाप्ता ॥

श्रीकृष्णार्पणमस्तु ॥

तारणनामसंवत्सरभाद्रपदशुद्धप्रतिपदरविवारहुविनक्षत्रदालि
समाप्ता ॥

श्री गणेशाय नमः ॥

'कर्मनामान्युत्तराणि षाड्विंशतिः' । कर्मणो नामानि । कर्मनामानि । उत्तराणीति प्रकृतेभ्यो ज्वलन्नामधेयेभ्यः । ज्वलत्येव ह्ययौ (वासौ?) कर्माणि क्रियन्त इति ज्वलन्नामभ्य उत्तराणि कर्मनामानि । कियन्ति पुनस्तानि । षाड्विंशतिः षडधिकविंशतिः षड्विंशतिः । कतमानि पुनस्तानि । अपः अप्नः दंसः इत्येवमादीनि ॥

End:

'द्यावा पृथिव्योर्महिमानमाचष्ट आचष्टे— ' इति । एतदनेन मन्त्रेण द्यावापृथिव्योर्महिमानं महाभाग्यं मन्त्रदृगाचष्टे । एवमेतन्नैघण्टुकं प्रकरणं परिसमाप्तं ॥ अतः परमैकपदिकं भवति यस्यायमादिः 'एकार्थमनेकशब्द 'मित्येतदुक्तमित्येवमादि ॥

Colophon:

इति श्रीजम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्गस्य कृतावृज्वर्थायां निरुक्तवृत्तावष्टमो(ऽ)ध्यायः ॥

श्रीरस्तु ॥

Subject: Nirukta Vṛtti otherwise known as Ṛjvarthā. Third Adhyāya. 1—4 Pādas.

Remarks:—The Ms. is in good condition.

## ॥ निरुक्तवृत्तिः ॥

## 1711. NIRUKTA VṚTTIḤ.

Burnell's Catalogue No. 2379 d. Page 3. Left column.
Substance—Paper. Size—10×4½ inches. Sheets—36. Lines—14 or 15 to a Page. Script—Devanāgarī. No. of Granthas—1325. Author—Durgācārya. Fourth Adhyāya only.

Beginning :

श्रीगणेशाय नमः ।

'एकार्थमनेकशब्दमित्येतदुक्तं' । किमर्थमिदमुच्यते । न हि यद्यद्वृत्तं तत्तद्वक्तव्यं । इदं वृत्तं इदं वर्तिष्यत इति । यद्यद्वृत्तं तत्तदनुक्तमपि प्रतीयते । यच्च वक्ष्यमाणमिति । आह— संक्षेपतो निगमनाय यदुक्तं यद्वा वक्तव्यं प्रतिजानीथ । समासविस्तराभ्यां हि सुखमाधस्त्यं प्रकरणमवधारयिष्यामहे । गृहीतार्थे सङ्क्षेपाच्च विस्तरेणोत्तरग्रन्थमुच्यमानं सुखमवभोत्स्यामहे ॥

End:

प्रकृतमिदानीं वर्णयिष्यामः । किञ्च पुनः प्रकृतम् । ऐकपदिकं समाम्नायव्याख्यानं तत्र यदुक्तं तदुक्तमेव । यदनुक्तं तद्वक्तव्यमितीदमारभ्यते 'सस्निमविन्दच्चरणे नदीना'मिति ॥

Colophon :

श्रीमज्जम्बूमार्गाश्रमवासिनो भगवद्दुर्गकृतवृत्तौ नवमाध्यायस्य चतुर्थः पादः । नवमाध्यायश्च समाप्तः ॥ (ऋज्वर्थायां)

Subject : Nirukta Vṛtti otherwise known as Nirukta vṛtti or Ṛjvarthā. Ninth (Fourth) Adhyāya. 1—4 Pādas.

Remarks :—The Ms. is in good condition.

## ॥ निरुक्तवृत्तिः ॥

## 1712. NIRUKTA VṚTTIḤ.

Burnell's Catalogue No. 2379 e. Page 3. Left column. Substance—Paper. Size—10 × 4½ inches. Sheets—50. Lines —12 or 13 to a Page. Script—Devanāgarī. No. of Granthas —1800. Author—Durgācārya. Fifth Adhyāya only.

Beginning:

श्रीगणेशाय नमः ॥

सन्निमित्य(त्येतद)नवगतं । अर्थाप्रतीतिरप्यनवगम(म्य) इत्युच्यते । लक्षणासम्पन्नश्च संस्कारः खल्वपि अविज्ञातमित्युच्यते । तत्रैवं सति क्वचित्प्रकृत्यादेः संस्कारस्यानवगमः । क्वचिदर्थाप्रतीतिरेव । क्वचिदुभयस्याप्यनवगमः । यथास्मिन्नेव सन्निमिति ॥

End:

'अन्तिकतमं' सन्निकृष्टतममौषधं पक्कं आगच्छेदिति युष्माभिरेवमुक्तं भवतु(मुक्ते सति) एतद्वयमाशास्महे । 'पक्कमौषधमागच्छत्वि'ति । अध्यायसमाप्त्युपप्रदर्शनार्थाय द्विरभ्यास इति ॥

Colophon:

इति श्रीमद्भगवद्दुर्गकृतवृत्तौ दशमस्याध्यायस्य चतुर्थः पादः ।

अध्यायश्च समाप्तः ॥

Subject: Nirukta Vṛtti otherwise known as Nirukta vṛtti or Ṛjvarthā. Tenth (Fifth) Adhyāya. 1—4 Pādas.

Remarks:—The Ms. is in good condition.

## ॥ निरुक्तवृत्तिः ॥

## 1713. NIRUKTA VṚTTIḤ.

Burnell's Catalogue No. 2379 f. Page 3. Left column. Substance—Paper. Size—10×4½ inches. Sheets—51. Lines—13 or 14 to a Page. Script—Devanāgarī. No. of Granthas—1556. Author—Durgācārya. Sixth Adhyāya only.

Beginning:

श्रीगणेशाय नमः ॥

'आशुशुक्षाणि'रित्यनवगतं। 'आशु शु [कृस]चा(चा)सनितावा'स्यात् आशु(शु)चाक्षणितावा॥' "त्वमग्ने द्युभिस्त्वमाशुशुक्षणिः० जायसे शुचिः" ॥ १ ॥ गृत्समदस्येदमार्षं । प्रातरनुवाकाश्विनयोः शस्यते । जगत्याग्नेयी । हे भगवन्नग्ने । त्वं द्युभिः अहोभिर्निमित्तभूतैः पौर्णमास्याद्यैरेषां मथ्यमानो नृणां जायसे । पौर्णमास्याममावास्यायां वाऽऽदधीतेत्युक्तम् ॥

End:

अधुनास्य मन्त्रस्य भाष्यकारः समस्तार्थमाह—"यद्वृष्ट ओषधय उद्यन्ति प्राणिनश्च पृथिव्यां तदश्विनो रूपं।" सो(ऽ)श्विनोरधिकारः । तदश्विनोर्माहाभाग्यं । तेन माहाभाग्यलक्षणेन रूपेणैतावश्विनौ मन्त्रदृक् स्तौति स्तौति ॥

Colophon:

एकादशस्य षष्ठः पादः ॥

इति श्रीजम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्गस्य कृतौ ऋज्वर्थायां निरुक्तवृत्तावेकादशोऽध्यायः ॥

यावन्तो मन्त्राः सर्वशाखासु तेषु यानि गुणपदानि लक्षणोद्देशतः तानि सर्वाण्येव व्याख्यातानि ॥ अस्मिन्नध्याये व्याख्यात।

ऋच: ॥ २७० ॥ एवमध्यायषट्के ऋच: ॥ ४६० ॥

संवत् १८२० मार्गशिर:कृष्णद्वितीयायां लिखितम् ।

श्रीरस्तु ॥ ग्रन्थसङ्ख्या ॥ १५५६ ॥

Subject:—Nirukta Vṛtti otherwise known as Ṛjvarthā. Eleventh (Sixth) Adhyāya. 1—6 Pādas.

Remarks:—The Ms is in good condition. The Ms. is dated Saṃvat 1820 or 1763. A. D.

## ॥ निरुक्तवृत्तिः ॥

## 1714. NIRUKTA VṚTTIḤ.

Burnell's Catalogue No. 2379 g. Page 3. Left column. Substance—Paper. Size—10×4½ inches. Sheets—48. Lines—13 to 14 to a Page. Script—Devanāgarī. No. of Granthas—1600. Author—Durgācārya. Seventh Adhyāya only.

Beginning:

श्रीगणेशाय नमः ॥ श्रीविश्वेश्वर्यै नमः ॥

समाप्तं चैकपदिकं प्रकरणमस्यानुदैवतं तद्भवति यस्यायमादि'रथातो दैवत'मिति ॥ यावन्तो मन्त्राः सर्वशाखासु, तेषु यानि गुणपदानि लक्षणोद्देशतस्तानि सर्वाण्येव व्याख्यातानि । द्वयोः प्रकरणयोः नैघण्टुकैकपदिकयोः, संविज्ञातपदानि तु प्रधानस्तुतिभाग्देवताविषयाण्यग्न्यादीनि सर्वमन्त्रेष्ववशिष्यन्ते । तानि च पुनरमूनि समाम्नातान्यस्मिञ्छास्त्रे अग्न्यादीनि देवपत्न्यन्तानि । य(अ)तस्तद्व्याच(चि)ख्यासयेदमारभ्यते ॥ 'अथातो दैवत'मिति ॥

End:

तदेवमेतास्मिन्वैश्वानरपदविचारप्रसङ्गे हविष्पान्तीयं सूक्तमुपक्षिप्य सूर्यो वैश्वानरोऽग्निर्वैश्वानर इति एकमेवेदं ज्योतिस्त्रिधा वर्तते इति मन्त्रस्य भावोपप्रदर्शनार्थमुपवर्णितम् । ईदृशेषु शब्दार्थन्यायसङ्कटेषु मन्त्रार्थघटनेषु दुरवबोधेषु मतिमतां मतयो न प्रतिहन्यन्ते । वयन्त्वेतावदत्रावबुद्ध्यामह इति ॥

Colophon:

इति ऋज्वर्थायां निरुक्तवृत्तौ जम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्गकृतौ द्वादशो(ऽ)ध्यायः समाप्तः ॥

शुभमस्तु ॥

Subject: Nirukata vṛtti otherwise known as Ṛjvarthā. Twelfth (Seventh) Adhyāya. 1—7 Pādas.

Remarks:—The Ms. is in good condition.

## ॥ निरुक्तवृत्तिः ॥

## 1715. NIRUKTA VṚTTIḤ.

Burnell's Catalogue. No. 2379 h. Page 3. Left column. Substance—Paper. Size—10×4½ inches. Sheets—18. Lines—14 to a Page. Script—Devanāgarī. No. of Granthas—650. Author—Durgācārya. Eighth Adhyāya only.

Beginning:

श्रीः ॥ 'द्रविणो दा' इत्येतद्दैवतापदं निर्वाच्यं । तदर्थमुपोद्घातः—'द्रविणोदाः कस्मा'दिति । तत्र पूर्वपदमेव तावत्प्रथमं विगृह्य निराह—'धनं द्रविणमुच्यत' इति । तत्कस्मात्, 'यदेनमभिद्रवन्ति' । कर्मकारकम् । यस्मादेतदाभिमुख्येन तदर्थिनो(ऽ)वश्यं द्रवन्ति ॥

End :

तत्र नराशंसयाजिनां सौत्रामणिप्रयोगे कथं प्रयोगः। किं तनूनपाच्छुचिव्रत इत्येतदेव प्रयुज्यतां उतान्यः कुत-श्चिदाप्रीसूक्तादाह्रियतां नराशंस इति न्यायविदो मेधा-विनः समनुगंस्यन्ते विशेषमिति ॥

Colophon:

इति श्रीनिरुक्तवृत्तौ त्रयोदशो(ऽ)ध्यायः समाप्तः ॥

श्रीगृहपतिः प्रीयतां ॥

Subject: Nirukta vṛtti otherwise known as Ṛjvarthā. Thirteenth (Eighth) Adhyāya. 1—3 Pādas.

Remarks:—The Ms. is in good condition.

## ॥ निरुक्तवृत्तिः ॥

## 1716. NIRUKTA VṚTTIḤ.

Burnell's Catalogue No. 2379 i. Page 3. Left column. Substance—Paper. Size—10×4½ inches. Sheets—14. Lines—14 or 15 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—Durgācārya. Ninth Adhyāya only.

Beginning:

श्रीगणेशाय नमः ॥

"अथ यानि पृथिव्यायतनानि सत्वानि" त्येवमादि। अथेति विशेषाधिकारे। प्रकृतार्थादनन्तरं अधिकरोति। 'पृथिव्यायतनानि' पृथिव्याश्रयाणि 'सत्वानि' द्रव्याणि च ॥ तेषामप्यत्र विवक्षितत्वात्। 'स्तुतिं लभन्त' इति समाम्नातानि। 'तानि' 'अतः' पर'मनुक्रमिष्यामः' व्याख्यास्याम इति शेषः ॥

End:

तामेवं लक्षणं 'ऊर्जं' 'ऊर्जाहुती' 'ऊर्जयमाने' बल-
वती ऊर्जतां च कुर्वाणे 'अधातां' दत्तां। 'वसुवने' 'वसुव-
ननाय च' 'वसुधेयस्य' 'वसुधानाय च' 'वीतां' पिबेतां
कामयेतां वा। 'यजे'ति संप्रैषो यजेति संप्रैषः॥

Colophon:

जम्बूमार्गाश्रमवासिनो भगवद्दुर्गाचार्यस्य कृतौ
ऋज्वर्थायां निरुक्तवृत्तौ चतुर्दशो(ऽ)ध्यायः॥

Subject. Nirukta vṛtti otherwise known as Ṛjvarthā. Fourteenth (Ninth) Adhyāya. 1—4 Pādas.

Remarks:—The Ms. is in good condition.

## ॥ निरुक्तवृत्तिः ॥

## 1717. NIRUKTA VṚTTIḤ.

Burnell's Catalogue No. 2379 j. Page 3. Left column. Substance—Paper. Size—10×4½ inches. Sheets—23. Lines—14 or 15 to a Page. Script—Devanāgarī. No. of Granthas—800. Author—Durgācārya. Tenth Adhyāya only.

Beginning:

श्रीः॥ व्याख्यातानि पृथिवीस्थानदेवतापदानि।
अधुना समाम्नायानुक्रमेणैव मध्यमस्थानदेवतापदानि
व(निर्व)क्तव्यानि। तदर्थमिदमारभ्यते। 'अथातो म-
ध्यस्थाना देवता' इति॥ अथशब्दो विशेषाधिकारा-
र्थः। अतःशब्द आनन्तर्यार्थः। मध्यं स्थानमेतासामिति
मध्यस्थाना देवताः वाय्वाद्याः वक्ष्यन्त इति वाक्यशेषः॥

End :

अपि च सर्वमेतदुपपद्यते, पुरूरवस्त्वयि यस्मा[तस्मा]-
'न्महते' 'रणाय' 'रमणीयाय' 'सङ्ग्रामाय' असुरैः सह
(दस्युह)त्याय' शत्रुवधायावर्धयन् स्वैर्महिमभिस्त्वं नो
असुरान्जेष्यसीति पुरश्चकुर्देवा इति । द्विरभ्यासोऽध्याय-
समाप्तौ, यस्माल्लक्ष्यते समाप्तम् ॥

Colophon :

इति श्रीमज्जम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्ग(स्य)
कृतावृज्वर्थायां निरुक्तवृत्तौ पञ्चदशोऽध्यायः समाप्तः ॥
श्रीगृहपतिः प्रीयतां ॥

Subject: Niruktavṛtti otherwise known as Ṛjvarthā. Fifteenth (Tenth) Adhyāya. 1-4 Pādas.

Remarks :—The Ms. is in good condition.

॥ निरुक्तवृत्तिः ॥

## 1718. NIRUKTA VṚTTIḤ.

Burnell's Catalogue No. 2379 k. Page 3. Right column. Substance—Paper. Size—10 × 4½ inches. Sheets—19. Lines—13 to 15 to a page. Script—Devanāgarī. No. of Granthas—675. Author—Durgācārya. Eleventh Adhyāya only.

Beginning :

श्रीगणेशाय नमः ॥

'श्येनो' व्याख्यातः । 'श्येनः शंसनीयं गच्छती'ति ॥
इह त्वभिधेयो मध्यमः । 'तस्यैषा भवति'— आदाय-
श्येन इति । वामदेवस्यार्षं । श्येनाजिरादिषु मरुत्वतीये
शस्यते । ऋत्विग्भिर्विधानतः । प्रत्तं 'श्येन' इन्द्रः 'सोममा-

द्राय अभरत् अपिबत् । क । 'सहस्रं सचान्' । सहस्रं सुत्यानां यत्र कुर्वन्ति ।

End:

'आ यस्मिन् तस्थौ' यस्मिन्नातस्थौ यस्मिन्नातिष्ठति । रंहणे गमने । 'रोदसी' 'सचा' सह ('मरुत्सु') मरुद्भिः सहिता मरुद्भिः रोदसी । किमिति 'सुरणानि' सु रमणीयानि उदकानि बिभ्रती धारयन्त्यातिष्ठति । तं वयं मेघं रथमाह्वयामहे वर्षार्थमिति ॥

Colophon:

इति श्रीजम्बूमार्गानिवासिनो भगवद्दुर्गाचार्यस्य कृतौ निरुक्तवृत्तौ षोडशो(ऽ)ध्यायः ॥

Subject: Nirukta Vṛtti otherwise known as Ṛjvarthā. Sixteenth (Eleventh) Adhyāya. 1-4 Pādas.

Remarks:—The Ms. is in good condition.

---

## ॥ निरुक्तवृत्तिः ॥

## 1719. NIRUKTA VṚTTIḤ.

Burnell's Catalogue No. 2379 l. Page 3. Right column. Substance—Paper. Size—10 × 4½ inches. Sheets—22. Lines—14 to 16 to a Page. Script—Devanāgarī. No. of Granthas—800. Author—Durgācārya. Twelfth and Thirteenth Adhyāyas only.

Beginning:

श्रीगणेशाय नमः ॥

व्याख्याता मध्यस्थाना देवताः सवचनलिङ्गविशेषाः । अधुना (ए)तेनैव समाम्नायानुक्रमेण द्युस्थाना व्याख्येयाः ; तदर्थं विशेषतः पुनरधिकारवचनं— अथातो द्युस्थाना

देवता इति। बहुवचनं पक्षेऽर्थवत्। द्यौः तेषां स्थानमिति द्युस्थानाः देवता व्याख्यास्यन्त इति शेषः ॥

End :

'तदिद'मतपस्विना सर्वथाप्या'ध्युरिच्छता' निरुक्तशास्त्रं न (नि)र्वक्तव्यं । अ(त)पस्वी ह्यागमवानपि मलिनान्तःकरणत्वान्न शक्नुयात् ततो(ऽ)स्यायुश्छिद्येत। तपस्विनापि च निर्ब्रुवता। 'तस्माच्छन्दस्सु' शाखान्तरेषु निगमोदाहरणानामाकाङ्क्षितत्वनिराकाङ्क्षिता(ङ्क्षा)यै वाक्यशेषाः पादार्द्धर्चादिलक्षणाः उपेत्ये(उपे)क्षितव्या इति ॥

Colophon :

इति श्रीजम्बूमार्गाश्रमवासिनो भगवद्दुर्गाचार्यस्य
कृतावृज्वर्थायां निरुक्तवृत्तावष्टादशो(ऽ)ध्यायः ।
निरुक्तवृत्तिः समाप्ता ॥ शुभमस्तु । श्रीरस्तु ॥

निरुक्तं त्रिकाण्डमुक्तं ॥

आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा ।
तृतीयं दैवतं चेति समाम्नाये त्रिधा स्थितः ॥

गौराद्यपारेपर्यन्तमाद्यं नैघण्टुकं मतम् ।
जहाद्युल्बमृबीसान्तं नैगमं सम्प्रचक्षते ॥

अग्न्यादिदेवपत्न्यन्तं देवताकाण्डमुच्यते ।
अग्न्यादिदेवी ऊर्जाहुत्यन्तः क्षितिगतो गणः ॥

वाय्वादयो भगान्ताःस्युरन्तरिक्षस्थदेवताः ।
सूर्यादिदेवपत्न्यन्ता द्युस्थाना देवता इति ॥

गवादिदेवपत्न्यन्तं(न्तः) समाम्नायम(योऽभि)धीयते ॥

ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः ।
शि(क्षा)कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति ॥

॥ शिक्षा ॥ वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा ।

कल्पः ॥ आश्वलायनापस्तम्बबौधायनादिसूत्रं कल्पः । कल्प्यते समर्थ्यते यागप्रयोगोऽत्रेति व्युत्पत्तेः । व्याकरणं । प्रकृतिप्रत्ययाद्युपदेशेन पदस्वरूपतदर्थनिश्चयायोपयुज्यते । निरुक्तं ॥ अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं । गौः ग्मा इत्यादि देवपत्न्यो देवपत्न्य इत्यन्तः पदसङ्घः ॥ छन्दः । छन्दोविशेषाणां तत्र विहितत्वाच्छन्दः ॥ ज्योतिषं । यज्ञकालार्थसिद्धये इति तस्मिन्नेव ग्रन्थे ज्योतिषप्रयोजनमुक्तं कालविधानशास्त्रमिति ॥ एवं शिक्षादिषडङ्गानां प्रयोजनमुक्तं उपोद्घाते ॥ श्रीः ॥

Subject: Nirukta Vṛtti—Ṛjvarthā. Seventeenth (Twelfth) Adhyāya. 1-4 Pādas and Eighteenth (Thirteenth) Adhyāya otherwise known as Pariśiṣṭādhyāya.

Remarks :—The Ms. is in good condition. The prose extract taken from Sāyaṇa's Introduction to his Ṛg-Veda Saṃhitā bhāṣya given in the colophon, gives the contents of the six Vedāṅgas —Śikṣā, Vyākaraṇa, Chandas, Nirukta, Jyautiṣa and Kalpa.

---

## ॥ वैदिककोशव्याख्या ॥

## 1720. VAIDIKAKOŚAVYĀKHYĀ.

J. L. collection No. 90. Substance—Paper. Size—9¼ × 5½ inches. Sheets—68. Lines—11 to 14 to a Page. Script—Devanāgarī. No. of Granthas—1500. Author—Nārāyaṇayajvan. Incomplete.

Beginning :

श्रीगणाधिपतये नमः ।

देवा यामुपजीवन्ति यस्यां सर्वं प्रतिष्ठितम् ।
तामद(मिन्दि?)रात्मिकां देवीं वाचं वयमुपास्महे ॥
यावजीजनतां ब्रह्म ये च मामध्यजीगपन् ।
प्राबूबुधन्त(धंश्च मा?)मित्थं तान्नमामि गुरून्सदा ॥

ये वैदिकनिघण्टुकाश्शब्दाश्श्लोकैर्विवव्रिरे ।
प्रक्रिया क्रियते तेषां सस्वरा व्याक्रियोदिता ॥
यद्यपि प्रक्रिया तेषां प्राग्भिरेव प्रपञ्चिता ।
तथापि कथ्यते सात्र सङ्ग्रहेण यथामति ॥
प्रारीप्सितस्य ग्रन्थस्याविघ्नेन परिपूर्तये ।
शिष्टाचारपरिप्राप्तं गुरुवन्दनलक्षणं ॥
विधाय मङ्गलं ग्रन्थविषयश्च प्रदर्श्यते—
'श्रीगुरुचरणौ नत्वा भास्कररायेण सोमपाभिचिता ।
वैदिकनिघण्टुकथिताः शब्दाः श्लोकैर्निबध्यन्ते ॥ १ ॥'

* * * * *

राया सहितः अः विष्णुः रायः लक्ष्मीनारायणः स इव भास्करः भास्कररायेण । व्याघ्रादेराकृतिगणत्वादुपमितसमासः ।

* * * * *

अस्मिन्वैदिककोशे प्रथमं नानापदात्मकं काण्डं ।
ऐकपदिकं द्वितीयं त्रितयत्रितये क्रमेण वर्गाणाम् ॥

* * *

तत्रादौ भूरादिनामानि परिगणय्य तेषामर्थमाह—
भूरित्यादिना सार्धश्लोकेन ॥
"भूर्भूमिरवनिर्गोत्रा गौरिळा निर्ऋतिर्मही ।
ग्मा ज्मा क्ष्मा क्षक्षितिः क्षामा क्षोणी पृथ्व्यादिती रिपः ॥
उर्वी पूषा गातुरिति भू(ना)मान्येकविंशतिः" ॥

End :

अग्रुवः । अगतिर्गतिकौटिल्ये ज ................तः ।

क्रियाविशेषे कौटिल्यं गछन्त्योङ्कुळयोर्मुरा । ❀ ❀
हरन्तीति हरिताङ्कुळयोऽभवन् । प्रक्रियोक्ता नदी नाम...... ॥

Colophon: (Sheet No. 59).

भूहेमाम्बरघृष्टिदिग्भजनिकाप्रत्यूषघस्रादयो
वाणीतोयतरङ्गिणीहयभिदादीप्तिज्वलद्वाचकाः ।
श्रीनारायणयज्वना गुरुपदाम्भोजैकसक्तात्मना
संक्षेपेण निरूचिरे तदभिया(?) भूरादयः पान्तु माम् ॥

क्रियाविशेषज्वलना नामनिर्वचनात्परम् ।
क्रियासामान्यनामानि निरुच्यन्ते यथामति ॥

इति भूरादिवर्गनिर्वचनसङ्ग्रहः ॥

रङ्गणाभट्टगोस्वामिनां पुस्तकं ॥

Subject: Vaidikakośavyākhyā—a commentary on Bhāskara-rāya's Vaidikakośa. This Ms. adopts the following division into two Adhyāyas and five Vargas:

1. नानापदकाण्डः—(a) भ्वादिवर्गः ॥
(b) कर्मादिवर्गः ॥
(c) बह्लादिवर्गः ॥

2. एकपदकाण्डः—(a) जह्रादिवर्गः ॥
(b) आशुशुक्षण्यादिवर्गः ॥

Remarks:—The Ms. is old and is in a fairly good condition, though the last sheet is much injured. This Ms. abruptly breaks off in the second varga of the First Kāṇḍa. The text Vaidikakośa in verses is also given in this Ms.

## ॥ वैदिककोशव्याख्या ॥

## 1721. VAIDIKAKOŚAVYĀKHYĀ.

J. L. Collection No. 82. Substance—Paper. Size—8¼ × 4

inches. Sheets—193 (2-215; sheets 1, 3, 9-13, 15-23, 26, 27, 29, 62, 133, and 135 are missing). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—3700. Author—Nārāyaṇayajvan. Incomplete.

Beginning:

तात्पर्यायोपलक्षकत्वाश्रयणात्तस्यापि पूजार्थतोपपत्तिः ।

* * * * *

राया सहितः अः विष्णुः रायः लक्ष्मीनारायणः ॥

Same as No. 1720.

End:

विश्वेदेवाः गणदेवाः शृणुतेमंहवंते । साध्याः रश्मिषु निरुक्ताः । नैरुक्तपक्षे रश्मयः । ऐतिहासिकानां तु कर्मभिरात्मनः साधनात् पूर्वे देवसमूहाः ते च विश्वसृजो नाम ऋषयः । यत्र पूर्वे साध्याः सन्ति देवाः । वसवः रश्मिषु व्याख्याताः ॥

**Colophon:**

(1) (Sheet No. 74)

भूहमाम्बर + इति भूरादिवर्गनिर्वचनसङ्ग्रहः ।

Same as No. 1720.

(2) (Sheet No. 168)

इति भास्कररायेण काण्डो नानापदाभिधः ।
स्वादिकर्मादिब्रह्मादिवर्गैस्त्रिभिरुदीरितः ॥
इति वैदिककोशे नानापदकाण्डः प्रथमः समाप्तः ॥

(3) (Sheet No. 202)

इति भास्कररायेण काण्ड एकपदाभिधः ।
उक्तो जहाद्याशुशुक्षणणादिवर्गद्वयान्वितः ॥
* * इत्याशुशुक्षण्यादिवर्गः ॥

(4) (Sheet No. 203)

इति श्रीमद्भारद्वाजगम्भीरराजदीक्षितसूरिसूनु-
भास्कररायदीक्षिताभिधेन रचितो द्वितीय ऐकपदिककाण्डो

वैदिककोशश्च समाप्तः ॥

Subject—Same as No. 1720.

Remarks:—The Ms. is in good condition. Along with the commentary the text Vaidikakośa is also given in this Ms. This is evidently a rare work that has not yet been printed so far.

## ॥ज्यौतिषम् ॥

## 1722. JYAUTIṢAM.

Burnell's Catalogue No. 2384 a (1).

Substance—Paper. Size—$8\frac{1}{4} \times 3$ inches. Sheets—3 (13-15). Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—36. Author—Lagadha (?). Complete.

Beginning:

पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिम् ।
दिनर्त्वयनमासाङ्गं प्रणम्य शिरसा शुचिः ॥ १ ॥
प्रणम्य शिरसा कालमभिवाद्य सरस्वतीम् ।
कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः ॥ २ ॥
ज्योतिषामयनं कृत्स्नं प्रवक्ष्याम्यनुपूर्वशः ।
विप्राणां सम्मतं लोके यज्ञकालार्थसिद्धये ॥ ३ ॥
निरेकं द्वादशार्धाब्दं द्विगुणं गतसाङ्गिकं ।
षष्ट्या षष्ट्या युतं द्वाभ्यां पर्वणां राशिरुच्यते ॥ ४ ॥

End:

यथा शिखा मयूराणां नागानां मणयो यथा ।
तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्धनि स्थितम् ॥ ३५ ॥
वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः ।
तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान् ॥
यो ज्योतिषं वेद स वेद यज्ञान् इति ॥ ३६ ॥

**Colophon:**

इति ज्योतिषं समाप्तम् । श्रीकृष्णार्पणमस्तु ।

श्रीसत्याधिराजगुरुभ्यो नमः ॥

Subject: Vedāṅgajyautiṣa, according to Ṛg-veda recensions. The contents of this work are given in the following verse found in this Ms.

इत्येतन्मासवर्षाणां मुहूर्तोदयपर्वणां ।

दिनर्त्वयनमासाङ्गं व्याख्यातं लगधोऽब्रवीत् ॥ २९ ॥

Remarks:—The Ms. is in good condition. The other works contained in this Ms. are निघण्टुः and छन्दः. This work is not noticed by Dr. Burnell under this Ms. Dr. Burnell observes that this Vedāṅga jyautiṣa is edited by Prof. Weber 4 to.

## ॥ ज्योतिषम् ॥

## 1723. JYAUTIṢAM.

Burnell's Catalogue No. 2389. Page 36. Right column. Substance—Paper. Size—9½ × 4 inches. Sheets—3. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—36. Author—Lagadha (?). Complete.

Beginning, end and Subject—Same as No. 1722.

Colophon:

इति वेदाङ्गज्योतिषं समाप्तम् । तुलजाराजस्येदं पुस्तकम् ।

Remarks:—The Ms. is in a fairly good condition. This Ms. belonged to Tulaja Mahārāja of Tanjore who reigned between 1765-87 A. D. At the end of this work the following index is given:

"पञ्चसंवत्सरं, प्रपद्येते, कार्याः, कला दश च, याः पर्व, सविता, विषुवं, सप्त ॥"

# ॥ वेदलक्षणम् ॥

# VEDA-LAKSANAM.

## ॥ उपलेखः ॥

## 1724. UPALEKHAH.

Burnell's Catalogue No. 2402. Page 2. Left column. Substance—Paper. Size—8¼×3 inches. Sheets—8. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—100. Author—(?). Complete.

Beginning :

श्री वेदव्यासाय नमः ॥ ॐ ॥

अकारादयो द्वादश स्वराः शिष्टं व्यञ्जनम् ककारादयः पञ्चपञ्चवर्गस्पर्शा यकारादयश्चतस्रोऽन्तस्थाश्शकारादयोऽष्टावूष्माणः कᳲपौ विसर्गोनुनासिका प्रथमद्वितीयवर्गाणामूष्माण[ः]श्च हकारवर्जमघोषवन्तः शिष्टं घोषवद्ध्रस्वमेकमात्रं दीर्घंद्विमात्रं प्लुतं त्रिमात्रं व्यञ्जनमर्धमात्रं स्वरभक्तिश्चाक्रमे क्रमे त्वर्घोना[मो]क्रमो द्वैपदशस्तयोरुत्तरेणोत्तरेण पदं सन्दध्यादर्धतादु इति मितीत्याकारे षत्वसंहिते स्वितिपदेन परेणावस्येत् ॥ १ ॥

End :

उक्तः सन्धिः पदान्तानां वक्ष्यामः स्वरादितयकारयोः संयोगमापद्यत इकारोकारवर्जं तावीकारमापद्यत कुवित्सोमस्यापामिति निदर्शनम् । व्यञ्जनाद्यसंयुक्तं प्रकृत्या संयोगादिश्छकारादिश्च क्रामयेम्भूस कृत्वा ग्राह्या वाणे तश्छर्दिः पाविति निदर्शना ॥

* * * *

त्र्यम्बकप्रथमं भद्रं न प्रजापत ऋतञ्च सत्यञ्चेति यथा

संहितं नार्थचेसन्धिरस्ति शास्त्रमुपलेख(:) नमः शौनकाय
नमः शौनकाय ॥

Colophon :

उपलेखा(खः) समाप्तः ॥

Subject : Upalekha in Sūtras—a grammatical work connected with the Prātiśākhyas. 1-8 Vargas. This is a short grammatical treatise on Sandhi and such other changes that take place in the Vedic Kramapāṭha. The vowels and consonants with their different accents, the grammatical peculiarities in the Trikrama and such other combinations of words, and the Parigṛhyas in detail, (various peculiarities in the Veṣṭana of a compound or other word in different conditions) are fully given in this work. In short, this work is an epitome of Śaunaka's Ṛg-Vedaprātiśākhya, with the addition of some supplementary matter.

Remarks :—The Ms. is old and is in a fairly good condition. Dr. Burnell observes that this work is edited by Dr. Pirtsch.

## ॥ उपलेखः ॥

## 1725. UPALEKHAḤ.

J. L. Collection No. 74 c. Substance—Paper. Size—9×4 inches. Sheets—4 (27-32 ; sheet 28 is missing). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—80. Author—?. Incomplete.

Beginning, end and subject—Same as No. 1724.

Colophon :

इति क्रमोपलेखा(खः) समाप्ता(प्तः) ॥

Remarks :—The Ms. is old and is in a fairly good condition. It is damp in appearance. For the other works contained in this Ms. see the list under Remarks on No. 1574.

## ॥ उपलेखभाष्यम् ॥

## 1726. UPALEKHA BHĀṢYAM.

Burnell's Catalogue No. 2402*. Page 2. Left column. Substance—Paper. Size—8¼×3 inches. Sheets—26. Lines —8 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—?. Complete.

Beginning :

श्रीवेङ्कटेशः प्रसन्नः ॥

अकारादयो द्वादश स्वरा इति ॥ अकारादिः प्रथमो येषां ते अकारादयः द्वौ च दश चेति द्वन्द्वः । स्वराविति संज्ञा विधीयते । ननु यथा चित्रगुमानयेत्युक्ते विशेषणीभूतानां गवामानयने सम्बन्धो नास्ति । एवमकारादयः स्वरा इत्युक्ते विशेषणीभूतस्य आकारस्य स्वरसंज्ञा न प्राप्नोति । चोद्यं नैतदस्ति । लम्बकर्णमानयेत्युक्ते विशेषणीभूतयोरपि कर्णयोरानयने सम्बन्धस्तथेहापि विशेषणभूतस्याकारस्य स्वरसंज्ञा भवति । एवं प्रतिसूत्रं वेदितव्यम् । इदानीं सूत्रार्थः संक्षिप्यते । अकारादयो द्वादशसंख्येया वर्णाः स्वरसंज्ञका भवन्ति ॥

End :

इदानीं क्रमं तस्योक्तप्रवृत्त्या कान्छ(?)माह । क्रमविमुन(?)पयाभिगीतं उप समीपे सदृशो विशेषाः सन्निहिता इत्यर्थः । ते लेख्यनगरायते यस्मिन् ऋतालेखयेति गण्यनि(?) कृत्स्नशो निरूपयति । इत्युपलेखभाष्येऽष्टमो वर्गः । इत्युपलेखशास्त्रं । तथा च राज्ञा विशेषाः स्वरादयः पूर्वमुक्ताः । ततस्त्रिक्रमचतुष्क्रमे विशेषाः । ततः एकं-

पदा द्विपदाद्याः । ततः परिगृह्याद्याः । ततः षत्वणत्वाद्याः । ततः विसर्गान्तपदानां विशेषाः । ततः पदान्तस्येति आद्यन्तयोः सन्धिविशेषाः । ततः स्वरविषयः । ततः कम्पाविशेषाः । इत्येवं सदृशाः सदृशविषयः । तस्मादिदमुपलेखशास्त्रमिति । शास्त्रान्ते वृद्धाचार्यं नमस्करोति । नमः शौनकाय नमः शौनकाय ॥

श्रीवेङ्कटेशार्पणमस्तु । श्री सत्याधिराजः ॥

Colophon : Nil.

Subject : Upalekha bhāṣya—a commentary on the Upalekha Sūtras. 1—8 Vargas. See Subject on No. 1724.

Remarks:—The Ms. is in a very good condition. This Ms. is full of scriptorial errors.

## ॥ ऋग्विधानम् ॥

## 1727. ṚG-VIDHĀNAM.

Burnell's Catalogue No. 2431. Page 5. Left column. Substance—Paper. Size—$8\frac{1}{4} \times 3\frac{7}{8}$ inches. Sheets—98. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—2100. Author—Śaunaka. Incomplete.

Beginning:

श्री वेदव्यासाय नमः ॥ हरिः ॐ ३ म् ।

शौनक उवाच ।

नियतं न हि देवानां मन्त्राणां कलिदोषतः ।
कलिदोषनिवृत्त्यर्थं गायत्रीं पूजयेद्द्विजः ॥
गायत्रीमन्त्रसिद्ध्यर्थं गायत्रीमयुतं जपेत् ।
सर्वेषां वेदमन्त्राणां सिद्ध्यर्थं लक्षकं ततः ॥

गायत्रीस्वस्त्य(मन्त्र)सिद्ध्यर्थं सप्तव्याहृतिसम्पुटम् ॥
त्र्ययुतं चेज्जपेत्पूर्वं गायत्री सिद्धिदा तथा ।
त्रिमधुं वै त्रिसाहस्रं गायत्री(त्र्या) जुहुयादथ ॥
भूसुराणां च सर्वेषां किमलभ्यं जगत्रये ।
प्रथमं लक्षगायत्रीं सप्तव्याहृतिसम्पुटम् ॥
ततः सर्वे(वैः) वेदमन्त्रा(न्त्रैः):[तु] सर्वसिद्धिं च विन्दति ।
होमं (मे)कार्यं (कृते)च गायत्री(त्र्या) पलाशैरयुतं मधु ॥
वेदमन्त्रास्तु सत्यं वै जनानां कामधेनवः ।
तर्पणं चाभिषेकं च होमं विप्रांश्च पूजयेत् ॥
चिन्तामणिर्वेदमन्त्रः कामधेनुः सुरद्रुमः ।
इति मन्त्रविधिं कुर्यात्(कृत्वा(?))ऋग्विधानमथाब्रवीत् ॥

शौनक उवाच ॥

वक्ष्येऽहं सूक्तमाहात्म्यं वर्गान् मन्त्रांस्तु पादतः ।
शृणुध्वं भूसुराः सर्वे विश्वासेन समाहिताः ॥
सूक्तानां यत्फलं प्रोक्तं वर्गाणां तच्छतोत्तरम् ।
मन्त्राणां यत्फलं प्रोक्तं पादानां तच्छतोत्तरम् ॥
कृतादिषु जपेद्धीमान्युगादिषु यथाक्रमम् ।

हरिः ॐ । प्रणवस्य ऋषिर्ब्रह्मा । दैवीगायत्री छन्दः ।
परमात्मा देवता ॥

प्री(प्र)तिप्रणवसंयुक्तैः प्राणायामैः चतुःशतैः ।
मुच्यते ब्रह्महत्यायाः किं ततः शेषपातकैः ॥
मृत्युञ्जयाय(र्थे) गोदानं गृहीत्वा चायुतं जपेत् ।
(व्याहृत्य सम्पुटं रात्रौ त्र्यहं मृत्युं न विन्दति ।

व्याहृतीं सम्पुटाकारां गायत्रीमयुतं जपेत् ॥)
प्रतिग्रहेणनदत(णानडुह)स्तत्पापात्स विमुच्यते ॥
आदौ(अथ)वा शुद्धगायत्रमियुतं तु जपेद्बुधः ।
प्रतिग्रहेण नुदतः(णानडुहः) तत्पापात्प्रतिमुच्यते ॥
अग्निमीळे नव वैश्वामित्रो मधुच्छन्दा ऋषिः ।
(गायत्री छन्दः) । अग्निर्देवता ।
अग्निमिळे जपेत्सूक्तं पावनं श्रीकरं च यत् ।
पारायणफलं तस्य वेदानां चैव सर्वशः ॥

End:

आ त्वा षट् ध्रुवो नामानुष्टुबिन्द्रः । राज्ञः स्तुतिर्वा ।
राजानमभिषिञ्चेत तिष्येण श्रवणेन वा ।
पौष्णसावित्रसौम्यश्च(म्यैश्च) रोहिण्यामुत्तरासु च ॥

* * * * * *

त्रिरेनमाभिषिञ्चेत(षिञ्चन्ते(?)) दुन्दुभीन्यभिनाचरेत्
(भिध्वनिनादितैः) ।
प्राच्यां दिशि त्वां वसवोऽभिषिच्यन्तु भूतये ॥
दाक्षिणां(णस्यां) दिशि रुद्राय अभिषिच्यन्तु वृद्धये ।
प्रतीच्यां दिश्यादित्या(या)भिषिञ्चन्तु वृद्धये ॥
विश्वेदेवा उदीच्यां तु अभिषिच्यं(ञ्च)न्तु श्रेयसे ॥
अभिषिच्य च राजानमाशीर्भिः प्रतिनिन्य (प्रतिनुत्य)च ॥

..... .....................................

Colophon : (Sheet No. 93).

इति अष्टमाष्टके सप्तमो(ऽ)ध्यायः ॥

Subject : Ṛgvidhāna or Bṛhadṛgvidhāna—an elaborate metrical treatise giving the God, metre and use of the Sūktas of Ṛg-Veda Saṃhitā—1 to 8 Aṣṭakas.

Remarks :— The Ms. is in good condition. It breaks off in the description of the 31st Varga of the 8th Adhyāya of the 8th Aṣṭaka (173rd Sūkta of the 12th Anuvāka of the 10th Maṇḍala). Dr. Burnell mentioned this Ms. in the Errata et Addenda of his catalogue.

## ॥ ऋग्विधानम् ॥

## 1728. ṚGVIDHĀNAM.

T. S. Collection No. 36. Substance—Paper. Size—10⅜ × 5¼ inches. Sheets—19. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—186. Author—Śaunaka (?). Complete.

Beginning:

श्रीगणेशाय नमः ॥

निष्कृतिर्नहि देवानां मन्त्राणां जनदोषतः ।
कालदोषनिवृत्त्यर्थं धार्मिक(का)श्चक्रिरे द्विजः(जाः) ॥ १ ॥
गायत्रीमन्त्रसिद्ध्यर्थं गायत्रीं त्वयुतं जपेत् ।
सर्वेषां वेदमन्त्राणां सिद्ध्यर्थं लक्षकं जपेत् ॥ २ ॥
गायत्रीं सर्वपापघ्नीं शिरोव्याहृतिसम्पुठाम् ।
अयुतं तु जपेत्सूर्यगायत्री सिद्धिदा ततः ॥ ३ ॥
त्रिमधुं चैव साहस्रं गायत्र्या जुहुयादथ ।
भूसुराणां च देवानां भेदो नास्ति जगत्त्रये ॥ ४ ॥
प्रथमं लक्षगायत्रीं शिरोव्याहृतिसम्पुटाम् ।
ततः सर्वैर्वेदमन्त्रैः सर्वसिद्धिं च विन्दति ॥ ५ ॥

* * *

एतदादि जपेद्धीमान्मासादिषु यथाक्रमम् ।

अध्वर्यंच इदं सूक्तं त्रिसहस्रं जपेज्जले ।
इहत्या जन्मनि कृतं(ता) ब्रह्महत्या प्रमुच्यते ॥

End:

अरिष्टेभिजपेत्पादं षोडशं भोजने यदि ।
पञ्चायुतं ब्रह्मचारी जले वा कल्मषेन हि ॥
तश्नो मित्रो जपेत्पादं वृषे रौद्रे च भोजयेत् ॥

* * * * *

वेदविक्रयये(यिणो) द्रव्यं यच्च क्लीबादुपार्जितम् ।
अदेयं पितृदेवेभ्यः स्त्रिया यच्चार्जितं धनम् ॥ ८९ ॥

Colophon:

इति शौनकोक्तं ऋग्विधानं समाप्तम् ॥

श्रीरामाय नमः ॥

Subject: Ṛg-Vidhāna— based on Bṛhadṛgvidhāna, giving the gods, meters and uses of some selected Sūktas of Ṛg-Veda Saṃhitā.

Remarks:—The Ms. is in a fairly good condition. Many verses in this Ms. are the same as those found in Bṛhadṛgvidhāna, but with slight variation in their readings. The arrangement of the Sūktas is different from that found in No. 1727. The Ms. is full of scriptorial errors.

## ॥ ऋग्विधानम् ॥

## 1729. ṚGVIDHĀNAM.

Burnell's Catalogue No. 355. Page 5. Left column.
Substance—Paper. Size—8¾ × 3¾ inches. Sheets—37.
Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—600. Author—Śaunaka (?). Complete.

Beginning and subject—Same as No. 1728.

End :

इळामग्ने पुरुदं ॥ विश्वामित्रोऽग्निस्त्रिष्टुप् ।

इळामग्ने जाप(पे)न्मन्त्रं लक्षे(क्षं) चेच्छिवसन्निधौ ।

षष्टि(ष्टी)नां त्रिशतं कृच्छ्रं स्वर्णकृच्छ्रसमं विदुः ॥

नूनं सा त(ते) प्रति ऋचं गृत्सम इह इन्द्रा त्रे(त्रै)ष्टुभम् ।

नूनं सा त(ते) जपेन्मन्त्रं माघमासे तु लक्षकम् ।

षष्टीनां त्रिशतं सत्यं अन्नकृच्छ्रसमं विदुः ॥

विशो विशा(शो) वर्गत्रयस्य सूक्तस्य गा(गो)न ऋषिः अग्निः चानुष्टुप् अन्त्यस्याचा(चो)नुष्टुप् । शेषं गायत्रम् ।

विशो विशो जपेत्सूक्तं धात्रीयामयुतं तथा ।

स्त्रीणां पुमांश्च(पुंसां चा)पायघ्नं चान्द्रायणशताधिकम् ॥

* * *

तथाचाश्वलायनः —

अथाता(तो)ऽध्यायोपाकरणमोख(ष)धीनां प्रादुर्भावे श्रवणेन श्रावणस्य पञ्चम्यां हस्तर्चेति ॥

Colophon : (Sheet No. 32).

इति शौनकप्रोक्तं ऋग्वेदविधानं समाप्तम् ।

(Sheet No. 37.)

इति ज्येष्ठऋग्विधानं समाप्तम् ।

संवत् १७२२ आश्विन वदि त्रयोदशी पुस्तकम ॥

Subject : Jyeṣṭhaṛgvidhāna based on Śaunaka's Bṛhadṛgvidhāna, giving the deity, metre and use of some selected Sūktas of Ṛg-Veda Saṃhitā.

**Remarks** :—The Ms. is old and is in a fairly good condition. The Ms. is dated Saṃvat 1722 or 1665 A. D. For other details see Remarks on No. 1728. The Ms. is full of scriptorial errors,

## ॥ ऋग्विधानम् ॥

## 1730. ṚGVIDHĀNAM.

Burnell's Catalogue No. 356. **Page 5.** Left column.
Substance—Paper. Size—$12\frac{1}{2} \times 5\frac{1}{2}$ inches. Sheets—9. Lines —9 to 11 to a Page. Script—Devanāgarī. No. of Granthas —600 Author—Śaunaka (?). Complete.

Beginning, end, colophon and subject—Same as No. 1678.

Remarks :— The Ms. is in good condition. This Ms. is recent and is a copy of No. 1729.

## ॥ ऋग्विधानम् ॥

## 1731. ṚGVIDHĀNAM.

Burnell's Catalogue No. 357. Page 5. Left column.
Substance—Paper. Size—× inches. Sheets—35. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—900. Author—Śaunaka (?). Complete.

Beginning :

श्रीगणेशाय नमः ।

स्वयम्भुवे ब्रह्मणे विश्वगोप्त्रे नमस्कृत्वा मन्त्रदृग्भ्यश्च
विवक्षुरस्म्यृग्विधानं पुराणं पुरादृष्टमृषिभिर्मन्त्रदृग्भिः ॥
मन्त्रेभ्यो मन्त्रदृग्भ्यश्च समाम्नायानुपूर्वशः ।
कर्मणामृषिदृष्टानां विधिं प्रोवाच शौनकः ॥
ऋषिभिर्विविधा मन्त्रा दृष्टादृष्टप्रयोजनाः ।
प्रयोजनाय चोद्दिष्टास्तस्मिंस्तस्मिंश्च दर्शिताः ॥
नानार्थानि च कर्माणि शान्तिपुष्ट्याश्रयाणि च ।
सिद्ध्यश्च तपोमूलाः श्रद्दधानस्य कुर्वतः ॥

स्तुत्यादयो ये विकाराः प्रदिष्टा-
स्तथार्थवादा ऋक्षु सूक्तेषु चैव ।
यैर्यैः कामैर्ऋषिभिर्देवताश्च
तुष्टूष्यन्ते तान् शृणुष्वोच्यमानान् ॥
आयुः स्वर्गो द्रविणं सूनवश्च चतुर्विधं प्रोक्तमाशास्यमग्रे ।
अन्ये कामाः शतशः सम्प्रदिष्टाः संस्तुवद्भिर्ऋषिभिर्देवताश्च ॥
सिद्धा मन्त्रा विधिना ब्राह्मणस्य
फलं यच्छन्ति विधिवत्प्रयुक्ताः ।
सत्यं तेषां साधनं संयमश्च
शमस्तितिक्षाऽनसूया दमश्च ॥
तस्माद्द्विजः प्रशान्तात्मा जपहोमपरायणः ।
तपस्यध्ययने युक्तो भवेद्भूतानुकम्पकः ॥
क्षत्रियो बाहुवीर्येण तरेदापदमात्मनः ।
धनेन वैश्यः शूद्रस्तु जपहोमैर्द्विजोत्तमः ॥
तपसा स्वर्गमाप्नोति तपसा विन्दते महत् ।
तपोयुक्तस्य सिध्यन्ति कर्माणि नियतात्मनः ॥
विद्वेषणं संवननं विषघ्नं रोगनाशनम् ।
येन येनार्थमृषिणा यदर्थं देवताः स्तुताः ॥ २ ॥
स स कामः समृद्धश्च तेषां तेषां तथा तथा ।
तानि कर्माणि वक्ष्यामि विविधानि च कर्मणाम् ॥
पुरश्चरणमादौ तु कर्मणां सिद्धिकारकम् ।
स्वाध्यायाभ्यसनस्यादौ प्राजापत्यं चरेद्द्विजः ॥
केशश्मश्रुलोमनखान्वापयित्वा प्लुतः शुचिः ।
तिष्ठेदहनि रात्रौ तु शुचिरासीत वाग्यतः ॥

सत्यवादी पवित्राणि जपेद्व्याहृतयस्तथा ।
ॐकाराद्यास्तु ता जप्त्वा सावित्रीं च तदित्यृचम् ॥
आपोहिष्ठेति सूक्तन्तु शुद्धवत्योघमर्षणम् ।
संवत्यः स्वस्तिमत्यश्च पावमान्यस्तथैव च ॥ ३ ॥
सर्वत्रैतत्प्रयोक्तव्यमादावन्ते च कर्मणाम् ।
आसहस्रादाशताद्वा दशान्तमथवा जपेत् ॥

End :

नराणां भाग्यहीनानामृग्विधानमजानताम् ।
ऋग्वेदः कल्पवृक्षोऽयं फलं नैव प्रयच्छति ॥

रत्नगर्भ इव(वा)वास ऋग्वेदः प्रतिभाति मे ।
ऋग्विधानप्रदीपेन विना नैव प्रकाशते ॥

रत्नाकर इवोदार ऋग्वेदो(ऽ)त्यन्तदुस्तरः ।
ऋग्विधानमहापोतं विना नैव प्रकाशये(ते) ॥

निधानं सर्वरत्नानां ऋग्वेदो ब्रह्ममन्दिरम् ।
ऋग्विधानविधानेन ध्रुवमेतदवाप्यते ॥

ऋग्वेदः पठितोप्येष नृणां भवति निष्फलः ।
ऋग्विधानं विना तस्माद्ध्येयं तत्प्रयत्नतः ॥

नमः शौनकाय नमः शौनकाय ॥ २८ ॥

Colophon :

श्रीचतुर्थोऽध्यायः समाप्तः । वर्गपञ्चका ॥ १३६ ॥

श्रीसंवत् १६९१ वर्षे भाद्र[वा]वदि॥ संवत १६९१ वर्षे भाद्रपदमास कृष्णपक्षे ११ एकादशीतिथौ सोमवासरे अद्ये श्रीवृद्धनगरवास्तव्यं आभ्यन्तरं नागरज्ञातीययाज्ञिकश्रीसोमयाचित्तं माहायाज्ञिकश्री६ ॥ नानासुतमातायाज्ञिकश्री ६ राघवसूनुन(ा) लिखितम् ॥

शुभमस्तु । कल्याणमस्तु ॥

तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबन्धनात् ।
परहस्ते गताद्रक्षेदेवं वदति पुस्तकम् ॥

याज्ञिकश्री ६ नानासुतयाज्ञिकश्री ६ राघवसूनुना बृहस्पति के न्यज्य(ले)खित्वा आचार्यश्री ६ पुरुषोत्तमसुत आ०श्रीयज्ञे कृष्णार्येण प्रदत्ता ॥ श्री आविमुक्तपाराश्यं ल्पर्षीत्वा (?) ।

श्रीरस्तु कल्यान(ण)मस्तु ॥

Subject: Ṛgvidhāna (Kaniṣṭhar̥gvidhāna) in verses, giving the viniyoga of the Ṛks. 1-4 Adhyāyas.

Remarks:—The Ms. is old and is in a fairly good condition. A Transcribed copy of this Ms. in paper is also available in the Library. See Transcript Volume 311, the date of copying being February 1921 A. D. Ref. T. V. 311 (22). Whether this work is composed by Śaunaka is not known. From the introductory verses, it is known that this work is based on Śaunaka's Ṛg-Vidhāna. The Ms. is dated Monday—eleventh day after full moon—in Bhādrapada Month in Saṃvat 1694 or 1637 A. D. This work is printed at Nirṇaya Sāgara Press, Bombay.

## ॥ ऋग्वेदप्रातिशाख्यम् ॥

## 1732. ṚGVEDAPRĀTIŚĀKHYAM.

Burnell's Catalogue No. 2423. Page 1. Right column. Substance—Paper. Size—8¼ × 3 inches. Sheets—5. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—72. Author—Śaunaka. Incomplete.

Beginning:

ॐ श्रीवेदव्यासाय नमः ॥

परावरे ब्रह्मणि यं सदाहु·
वेदात्मानं वेदनिधिं मुनीन्द्राः ।
तं पद्मगर्भं परमं त्वादिदेवं
प्रणम्यर्चां लक्षणमाह शौनकः ॥

माण्डूकेयः संहितां वायुमाह
तथाकाशञ्चास्य माक्षव्य एव ।
समानतामनिले चाम्बरे च
मत्वागस्त्यो विपरिहारं तदेव ॥

सन्धेर्विवर्तनं निर्भुजं वदन्ति
शौद्धाक्षरोच्चारणं च प्रतृण्णम् ।
उभयमन्तरेणोभयं व्याप्तमग्रे
परे कामा अश्रनाकोभयाख्याः ॥

अकारकौरा वि उ ए ओ ऐ औ
पदाद्यन्तयोर्नल्कारः स्वरेषु ।
आकारादीन् दीर्घरूपा[दि]न्द्वितीया·
न्ह्रस्वेषु पञ्चस्वपि तानि सन्ति ॥

कखौ गघौ ङः चछौ जझौ ञः
टठौ डढौ णः तथौ दधौ नः ।
पफौ बभौ मो यरलवा हशषसाः
क≍प्पौ इति वर्णराशिक्रमश्च ॥

अष्टौ समानाक्षराण्यादितः तत·
श्चत्वारि सन्ध्यक्षराण्युत्तराणि ।
एते स्वराः, इपरो दीर्घवत्प्लुतो-
ऽनुस्वारो व्यञ्जनं वा स्वरो वा ॥

End:

ब्रुवते ध्वंस्तवसे वाचि मेरपद्दधिरेशानहुषेसत्पुरोभिनत् ।
उपतेऽधां वहते यं यमोऽदितिर्जनुषो वासुवितोऽनुश्रिषेधित ॥

वपुषेऽनुविश्चोयंत सन्तोवद्यानि खेन सः ।

भरन्तो(ऽवस्य) वो वोऽस्तु बुध्न्योऽजो मायिनोऽधमः ॥

देवो न यत्पुरुवसोऽसुरघ्नो भूतोभिविश्वेतो रुषस्तेन नोद्य ॥

येजामथस्तेरदन्नोधिवक्षा ते वर्धत तरुणाभिः सदोधि ।

स्वाध्योऽजनयन्धन्वनोभिमातीरग्नेयदहमनसोधियोघ्नः ॥

यो ह्यस्ते विन्दंस्तपमोधिनयोधिपादोस्य योति

(ब्राह्मणोऽस्यापोऽनयन्) ॥

Colophon :(Sheet 4)

इति प्रातिशाख्ये प्रथमपटलं समाप्तम् ॥

परिभाषापटलं समाप्तम् ॥

Subject : Ṛk-Prātiśākhya, 'dealing with the orthography, pronounciation and prosody of the Ṛg-Veda'. First Paṭala. 1-5 Sections (1-29 sections) and Second Paṭala. 1-10 Sections (1-24 sections) only.

Remarks :—This Ms. abruptly ends in the middle of the tenth (twenty-fourth) section of the second Paṭala. i.e., Saṃhitā Paṭala. The Ms is in good condition. This work along with Uvaṭa's bhāṣya is now available in the Benares Sanskrit series. The second and third verses given in the beginning are additionally found in this Ms. Regarding its old editions and translations, Dr. Burnell observes on page 1 b. of his catalogue that 'this (work—Ṛg-Veda Prātiśākhya) has been edited with a German translation by Dr. Max Muller, and with a French translation by M. Regnier.'

## ॥ ऋग्वेदप्रातिशाख्यवृत्तिः ॥

## 1733. ṚGVEDAPRĀTIŚĀKHYAVṚTTIḤ.

Burnell's Catalogue No. 2419. Page 2. Left column. Substance—Paper. Size—18¼ × 3 inches. Sheets—15. Lines — 8 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—Viṣṇumitra. First two Vargas.

Beginning:

श्रीवेङ्कटेशः प्रसन्नः ॥

श्रीशौनकाय नमः ॥

सूत्रभाष्यकृतः सर्वान् प्रणम्य शिरसा शुचिः ।
शौनकं च विशेषेण येनेदं पार्षदं कृतम् ॥

तथा वृत्तिकृतस्सर्वास्तान्सूत्रयशसस्तथा ।
तेषां प्रसादादेतेषां स्वशक्त्या वि(वृ)त्तिमारभे ॥

लेखदोषनिवृत्त्यर्थं विस्तरार्थं क्वचित् क्वचित् ।
ज्ञानार्थं पठनार्थं च (बहूदाहरणार्थं च) योज्यते सा मया पुनः ।
तस्याः समापने शक्तिं त एव प्रदिशन्तु मे ॥

लब्ध्वा काममहन्तोयः(तेभ्यः) प्रमेयं पारमीप्सितम् ।
चम्पायामवसत्पूर्वं वत्सानां कुलमृद्धिमत् ॥

यस्मिन् द्विजवरा जाता बह्वृचाः पारगोत्तमाः ।
देवमित्र इति ख्यातस्तस्मिन् जातो महामतिः ॥

सर्वैः(वैष) पार्षदैः(द)श्रेष्ठः सतस्तस्य महात्मनः ।
नाम्ना तु विष्णुमित्रः स कुमार इति शब्द्यते ॥

तेनेयं योजिता वृत्तिः सङ्क्षिप्ता पार्षदं(दे) स्फुटा ।
परिगृह्णन्तु विप्रेन्द्राः सुप्रसन्नामिमां मम ॥

अज्ञानाद्यदयुक्तं स्यात्तदृजूकृत्य गृह्यताम् ।
शास्त्रावतारं सम्बन्धे विषयं च प्रयोजनम् (धं षड्विधं परिकीर्तयन्) ॥

ज्ञात्वा ग्राह्यं भवेच्छास्त्रमिति शिष्टानुशासनम् ।

तस्मादादौ तावच्छास्त्रावतार उच्यते—

"शौनको गृहपतिर्वै नैमिषीयैस्तु दीक्षितैः ।
दीक्षासु चोदितः प्राह सत्रे तु द्वादशाहिके ॥"

इति शास्त्रावतारं स्मरन्ति । अथ सम्बन्ध उच्यते । इह हि द्विजानां वेदाभ्यासः सकलपुरुषार्थसिद्धेः कारणमिति हि वैदिकः सिद्धान्तः । स च पुरुषार्थश्चतुर्विधः । धर्मोऽर्थः कामो मोक्षश्चेति ॥

End and Colophon:

इति वर्णराशिक्रमश्च । इत्येवमुक्तप्रकारेण वर्णराशिर्वेदितव्यः । आकाराद्यनुनासिकान्तः वर्णानां राशिर्वर्णराशिः सङ्घातः समूहः वर्णकोशः वर्णसमाम्नाय इत्यनर्थान्तरम् । वर्णक्रमश्च अयमेव वेदितव्यः । उक्तप्रकारेण वक्ष्यति । ऋकारादयो दशनामिनः स्वरा इति । तथा परेष्वैकारमोजयोः औकारयुग्मयोरिति । अन्त्याः सप्त तेषामघोषाः । तथा प्रथमपञ्चमौ द्वा ऊष्मणां इत्येवमादिष्वयं क्रमो वेदितव्यः ॥

इति श्रीवेदमित्रसुतविष्णुमित्रकृते प्रातिशाख्ये (ख्यवृत्तौ) वर्गद्वयवृत्तिः ॥

एवं वर्णसमाम्नायमुक्त्वा तत्र लघुनोपायेन संज्ञापरिभाषाभ्यां शास्त्रे संव्यवहारसिद्धिं मन्यमानः संज्ञिसंज्ञासंबन्धार्थमाह ।

श्रीराम । श्रीवेदपुरुषाय नमः ॥

भूवराहात्मकश्रीलक्ष्मीवेङ्कटेशार्पणमस्तु ॥

Subject: Ṛg-Veda Prātiśākhya Vṛtti—a commentary on the first two Vargas in the Paribhāṣā Paṭala (First Paṭala.)

Remarks :— The Ms. is in good condition. This work is described in No. 833 Vol. I. Part II. Oriental Manuscripts Catalogue as

'ऋक्प्रातिशाख्यभाष्यवृत्तिः' But evidently it is a commentary on Prātiśākhya itself—a fragment only. Perhaps Uvaṭa began his bhāṣya only from the portion beginning with 'अष्टौ समानाक्षराण्यादितः' in Ṛg-Veda Prātiśākhya and Viṣṇumitra, a later author, might have composed his Vṛtti for the former portion—the first two Vargas of the Paribhāṣāpaṭala, as noted in the subject column above. This is hinted in a way by Viṣṇumitra in his introductory note on the Verse 'अष्टौ समानाक्षराण्यादित .' etc., See End and colophon on Nos. 1733 & 1734. Hence Viṣṇumitra's work fills up the gap created by Uvaṭa in the beginning of his Ṛg-Veda Prātiśākhya bhāṣya.

## ॥ ऋग्वेदप्रातिशाख्यवृत्तिः ॥

## 1734. ṚGVEDAPRĀTIŚĀKHYAVṚTTIḤ.

Burnell's Catalogue No. 2417 a. Page 2. Left column. Substance—Paper. Size—$10\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—11 (1-11). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—170. Author—Viṣṇumitra. First two Vargas only.

Beginning and subject—Same as No. 1733.

End and Colophon:

तथा प्रथमपञ्चमौ च द्वा ऊष्मणामित्येवमादिष्वयं क्रमो वेदितव्यः ॥ एवं वर्णसमाम्नायमुक्त्वा तत्र लघुनो· पायेन संज्ञापरिभाषाभ्यां शास्त्रे सव्यवहारसिद्धिं मन्य· मानः संज्ञासंज्ञिसम्बन्धार्थमाह ॥

इति श्रीदेवमित्रसुतविष्णुमित्रकृते प्रातिशाख्ये(ख्यवृत्तौ) वर्गद्वयवृत्तिः ॥

अष्टौ समानाक्षरण्यादित इत्यादि[इति] परावरे ब्रह्मणीत्यारभ्य सकलदेशीयवैदिकैः पठ्यमानस्याद्यवर्गद्वयस्य व्याख्या ॥

अथ भाष्यम् ॥

Remarks:—The Ms. is old and is in good condition. The other work contained in this Ms. is Uvaṭa's Ṛg-Veda Prātiśākhya bhāṣya.

## ॥ ऋग्वेदप्रातिशाख्यभाष्यम् ॥

## 1735. ṚGVEDAPRĀTIŚĀKHYABHĀṢYAM.

Burnell's Catalogue No. 2417 b. Page 2 Left column. Substance—Paper. Size—$10\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—229 (11-239). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—4000. Author—Uvaṭa. Complete.

Beginning :

अष्टौ समानाक्षराण्यादितः । किमर्थमिदमारभ्यते । शिक्षाछन्दोव्याकरणैः सामान्येनोक्तलक्षणं तदेवमिह शाखायामिति शास्त्रप्रयोजनं प्रातिशाख्यप्रयोजनमनेन श्लोकेनोच्यते । शिक्षादिभिर्यत्सामान्येनोत्सर्गेणोक्तं लक्षणं यथा तावत् शिक्षायां 'स्युर्मूर्धन्या ऋटुरषाः' । सामान्येन सर्वशाखासु रेफो मूर्धन्य इत्युक्तः ॥ तथाऽन्यस्यां शिक्षायां दन्तमूलीय[ इति । रेफो दन्तमूलीय] इत्युक्तः । एवं च सर्वशिक्षा वर्णेषु स्थानकरणानुप्रदानादि सर्वासु शाखासु विदधा(ध)ति । न तु नियमतः । कस्यां शाखायां रेफो मूर्धन्यः(कस्यां)दन्तमूलीयः [कस्यां शाखायां मूर्धन्य] इति । अत एव(एतत्) व्यवस्थापकमारभ्यते । दन्तमूलीयस्तु तकारवर्गः । सकाररेफलकाराश्च रेफवत्स्थमेकं । एवमस्यां शाखायां दन्तमूलीयो वा वर्त्स्यो वा रेफ इत्येतदवधारितम् । तथा सर्वैश्छन्दोश्छिद्रा(विचित्या)दिभिः पिङ्गल-

यास्कसैतवप्रभृतिभिः यत्सामान्येनोक्तं लक्षणं यथा षड्‍-समत्यक्षरा चातिधृतिर्भवति । तथा तत्रैवोक्तम्—'पादः । इत्यादिपूरणः' ॥

End :

गुर्वक्षराणां गुरुधृत्ति सर्वं गुर्वक्षरं त्रैष्टुभमेव विद्यात् ।

यत्किञ्चित्स्थावरं जङ्गमं गुरुवृत्ति तत्सर्वं गुर्वक्षराणा-(र)मेव । किं पुनर्गुर्वक्षरं । त्रैष्टुभमिति । ४६ ॥

लघ्वक्षराणां लघुधृत्ति सर्वं
लघ्वक्षरं जागतमेव विद्यात् ।

यत्स्थावरं जङ्गमं लघुधृत्ति तत्सर्वं लघ्वक्षराणामेव विद्यात् । किंपुनस्तत् लघ्वक्षरं जागतमिति ॥ ४७ । ५ । १७ ॥

यश्छन्दसां वेदविशेषमन्तं (मेतं)
भूतानि च त्रैष्टुभजागतानि ।
सर्वाणि रूपाणि च भक्तितस्स (तोयः)
स्वर्गं जयत्येभिरथामृतत्वम् ॥

यो ब्राह्मणश्छन्दसामेतं विशेषं वेद भूतानि च त्रैष्टुभ-जागतानि यो वेद सर्वाणि रूपाणि च त्रैष्टुभजागतानि यो वेद भक्तितः स स्वर्गं लोकं जयति । एभिश्छन्दोभि-रथामृतत्वं च गच्छति । इत्याह भगवान् शौनकः ।'

श्लोकाः—

गायत्र्यादीनि छन्दांसि सोमेन व्या(वा)प्ततः पुरा ।
तानि सर्वमिदं (..............................) ॥
स्वर्ग्यं यशस्यमायुष्यं पुण्यं वृद्धिकरं शुभम् ।
कीर्तिमृग्यं यशस्यं च छन्दसां ज्ञानमुच्यते ॥

छन्दोज्ञानं नान्यस्तस्मात्प्रयत्नं कुरु महानातादन्य·
स्तीति(?) तस्वं किं ॥ २४ ॥ ४८ ॥ ३ ॥ १०६ ॥

Colophon:

इति श्रीपार्षद्व्याख्यायां आनन्दपुरवास्तव्यवज्रटपुत्र·
उवटकृतौ प्रातिशाख्यभाष्ये अष्टादशपटलं समाप्तम् ॥

Subject: Ṛg-Veda Prātiśākhya bhāṣya otherwise known as Pārṣada Vṛtti, a commentary on this Prātiśākhya. 1-3 Adhyāyas. 1-18 Paṭalas, omitting the first two Vargas in tho first Paṭala.

Remarks:—The Ms. is in good condition. The other woık contained in this Ms. is Viṣṇumitra's Ṛg-Veda Prātiśākhya Vargadvaya Vṛtti. This Bhāṣya is now available in print in the Benares Sanskrit series in India. Regarding this work, Dr. Burnell observes the follo wing on Page 1 b. of his catalogue: "A commentary on the Ṛg-Veda Prātiśākhya by Uaṭe-(Uvata)- bhaṭṭa, son of Vajraṭa and an inhabitant of Ānandpura (Benares ?). (The work is)in 18 Paṭalas. The introduction has been given by Prof. Roth in his '*Zur Litratur und Geschichte des Weda*' 1846; it attributes the work to Viṣṇumitra, but the colophon assigns it to Uaṭa (Uvaṭa) who is also known as a commentator on the white Yajur-Veda (Weber's white Yajur-Veda. Vol. I. Page 8). This commentary is not the oldest; Prof. Eggeling (V. Preface to Dr. Max Muller's Ṛg-Vedaprātiśākhya) has discovered one which is certainly more ancient than Uvaṭa's work." The confusion that prevails between the two commentators Viṣṇumitra and Uvaṭa is to be carefully looked into and avoided by their readers. See our suggestion under Remarks on No. 1733.

## ॥ ऋग्वेदप्रातिशाख्यभाष्यम् ॥

## 1736. ṚGVEDAPRĀTIŚĀKHYABHĀṢYAM

Burnell's Catalogue No. 2418. Page 2. Left column.
Substance—Paper. Size—8¼ × 3 inches. Sheets—222.

Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—3315. Author—Uvaṭa. Incomplete.

Beginning :

अष्टौ समानाक्षराण्यादितः । किमर्थमिदमारभ्यते०

Same as No. 1735.

End :

"विंशतेरुपसर्गाणामुच्चा एकाक्षरा नव" प्र ।
आ । निः । दुः । विः । सं । नि । सु । उत् । इत्येते उप-
सर्गा(णां)(नवसङ्ख्या) एकक्षराः उच्चा उदात्ता इत्यर्थः ॥
'आद्युदात्ता दशैतेषां' ॥ एतेषामुपसर्गाणां दशाद्युदा-
त्ता वेदितव्याः । परा । अनु । उप । अप । परि । प्रति । अति ।
अव । अपि इत्येते ॥ 'अन्तोदात्तस्त्वभीत्ययं' ॥
एषामेवोपसर्गाणां (मध्ये) अभीत्ययमन्तोदात्तो वेदित-
व्यः । अभिप्रियाणि पवते (च नो हितः) ।

क्रियावाचकमाख्यातमुपसर्गो विशेषकृत् ।
सत्वाभिधायकं नाम निपातः पादपूरणः ॥
निपातानामर्थवशान्निपातना-
दनर्थकानामितरे च सार्थकाः ।
नयन्त इत्यास्ति सङ्ख्येह वाङ्मये
मिताक्षरे चाप्यमिताक्षरे च ये ॥

श्रीरामार्पणमस्तु ॥

Colophon :

इति श्रीपार्षदव्याख्याभाष्ये सीमापटलं द्वादशं समाप्तम् ॥

इति द्वितीयाध्यायः ॥

Subject : Ṛg-Veda Prātiśākhya bhāṣya. 1-2 Adhyāyas. 1-12 Paṭalas.

Remarks :—The Ms. is in very good condition.

## ॥ ऋग्वेदप्रातिशाख्यभाष्यम् ॥

## 1737. ṚGVEDAPRĀTIŚĀKHYABHĀṢYAM.

J. L. Collection No. 91. Substance—Paper. Size—$8\frac{1}{2} \times 4\frac{1}{2}$ inches. Sheets—20. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—380. Author—Uvaṭa. Second Paṭala only.

Beginning:

श्रीगणेशाय नमः ॥

ॐ संहितापदप्रकृतिः । संहितापदप्रकृतिरित्यधिकृतं वेदितव्यं आसीमापटलात् । पदानि प्रकृतिभूतानि यस्याः संहितायाः सा पदप्रकृतिः । संहिता त(अ)त्र विकारः । तथा हि— षत्वणत्वादयो विकाराः संहिताया एव भवन्ति । प्रकृतिभूतत्वाच्च पदानां सिद्धत्वं । पदान्तात् पदादिभिः संदधदेति यत्सा कालाव्यवायेन ॥ संहितायाः पदानि प्रकृतिभूतानीत्युक्तं । न तु संहितायाः स्वरूपं तत्र प्रतिपाद्य(दित)मित्यत आह— पदान्तान् पदादिभिर्यदेकीकुर्वन्नेति ग्रन्थमनुसरति, सा संहितेत्युच्यते । कालव्यवायेन तु पदानां कालाक्रमानु(पादान)परिपाट्या । सा च द्विविधा संहिता । आर्षी क्रमसंहिता च ।

आर्षी—'अयं देवाय जन्मने'। क्रमसंहिता—पर्जन्याय प्र (प्र)गायत । (गायत) दिवः । संहितासंज्ञायाः प्रयोजनं ऋतेन च द्वौ पदसंहितास्वरौ । स्वरान्तरं तु विवृत्तिः । अस्यामेवं संहितायां यत्स्वरयोरन्तरं वक्ष्यति तद्विवृत्तिसंज्ञं स्यात् । नृ इत्थाते पूर्वथा च । विवृत्तिसंज्ञायाः प्रयोजनं

'यतो दीर्घः ततो दीर्घो विवृत्तय' इति ॥ (१) । १०७ ॥

**End:**

"प्राक्प(च्यप)ञ्चाल उपधानिभोदयाः शाकल्यस्य स्थविर[भ]स्य" ॥ प्राच्यपञ्चालपदवृत्तयो(र)धस्तात्प्रतिपादिता विवृत्तयः । तरसां शाकल्यस्य स्थविरस्य मतेन किञ्चिदुच्यते । प्राच्यपञ्चाल(ल)क्षिती(ता)नां विवृत्त(त्ती-ना)मुपधाः तान्निभाः तत्सदृशाः उदयो(या)यासां तास्तथोक्ताः । एष देवो अमर्त्यः आङ्गिरसो जुह्वे वाजे अस्मिन् । नो अह प्रविन्दसि ॥ इतरा स्थितिः । इतरा त्वस्माकं शाकलानां स्थितिः । प्राकृतोदयत्वं(त्थं !) नाम एष देवो अमर्त्यः ॥

अङ्गिरसो जुह्वे वाजे अस्मिन् । (नो अह) ॥

Colophon :

इति पार्षदव्याख्यायां संहितापटलं द्वितीयं समाप्तम् ॥

Subject : Ṛk-Prātiśākhya bhāṣya. Second Paṭala otherwise known as Saṃhitā Paṭala only.

Remarks: —The Ms. is in good condition. It is full of scriptorial errors.

## ॥ ऋग्वेदप्रातिशाख्यवृत्तिः ॥

## 1738. ṚGVEDAPRĀTIŚĀKHYAVṚTTIḤ.

J. L. Collection No. 92. Substance—Paper. Size—9¾×5 inches. Sheets—142 (27—192; sheets 54-67, 95, 96, 107, 108, 137-139, 146, 147 and 191 are missing). Lines—9 or 10 to a Page. Script—Devanāgarī. No. of Granthas—2600. Author—(?). Incomplete.

**Beginning:**

श्री नृसिंहायनमः ॥

संहितापदप्रकृतिः ॥ पदानि प्रकृतिर्यस्याः सेयं संहिताऽधिकृता वेदितव्या । पदप्रकृतिरिति विशेषणेन पदानीह साध्यन्ते । ऐन्द्रव्याकरणादिभिः साधितानि पदानि तस्मादन्यत्र सिद्धानां पदानां संहिताविधिरुच्यत इति सूच्यते । तस्याः स्वरूपमाह । पदान्तान् पदादिभिः संदधते(दे)ति यत्सा कालाव्यवायेन ॥ अध्येता अध्येता व्यासादिः पूर्वपूर्वपदान्तानुत्तरोत्तरपदादिभिः कालाव्यवायेन कालाव्यवधानेन संदधत् संयुञ्जानः सन् एति गच्छतीति यदस्ति स संहितेति पूर्वेणान्वयः । अयं देवाय जन्मने ॥ संहितासंज्ञायाः प्रयोजनं संहितायां ल...तेति ॥ स्वरान्तरन्तु विवृत्तिः । संहितायां यद्द्वयोः स्वरयोर्वर्णान्तरानन्तरं तयो...... संज्ञा वेदितव्यं(व्या) ॥

End:

सर्वाणि भूतानि मनोगतश्च
स्पर्शाश्च गन्धाश्च रसाश्चसर्वे ।
शब्दाश्च रूपाणि च सर्वमेत-
त्त्रिष्टुप्जगत्यौ समुपैति भक्त्या ॥ ३२ ॥

सर्वाणि भूतानि मनः गतिश्च स्पर्शाश्च गन्धाश्च शब्दाश्च रूपाणि च सममेतत् । त्रिष्टुप्जगत्यौ त्रैष्टुभं जागतं समुपैति गच्छति ।

गुर्वक्षराणां गुरुवृत्ति सर्वं लघ्वक्षरं जागतमेव विद्यात् । यत्किंचित्स्थावरजङ्गमं गुरुवृत्ति तत्सर्वं गुर्वक्षरमेव विद्यात् । किं पुनस्तद्गुर्वक्षरं त्रैष्टुभं । यत्किंचित्स्थावरजङ्गमं लघुवृत्ति तत्सर्वं लघ्वक्षरमेव विद्यात् । किं पुनस्तल्लघ्वक्षरं ।

जागतं ॥ ३१ ॥

यच्छन्दसां वेदविशेषमेतद्भू(तं भू)तानि च त्रैष्टुभजागतानि ।

सर्वाणि रूपाणि च भक्तितः सन् स्वर्गं जयत्येभिरथामृतत्वम् ॥

यो ब्राह्मण ऋक्छन्दसान्तं विशेषं वेद सः स्वर्गं लोकं

जयति । अमृतत्वं च प्राप्नोति ॥

Colophon:

इति श्रीपार्षदव्याख्यायां विंशतिः (अष्टादश(!)) पटलः समाप्तः ॥

श्रीमद्विठ्यलकृष्णनृसिंहार्पणमस्तु ॥

यदक्षरपरिभ्रष्टं मात्राहीनन्तु यद्भवेत ।

तत्सर्वं क्षम्यतां देव नारसिंह नमोऽस्तु ते ।

चित्रभानुपौषवदि त्रयोदशी भौमवासर... ।

Subject: Ṛg-Veda Prātiśākhya bhāṣya—a commentary on Ṛg-Vedaprātiśākhya. 2-20 (2-18 ?) Paṭalas.

Remarks:—The Ms. is old and is in a fairly good condition though the sheets are here and there worm-eaten.

## ॥ ऋग्वेदसर्वानुक्रमणिका ॥

## 1739. ṚGVEDASARVĀNUKRAMAṆIKĀ.

J. L. Collection No. 94. Substance—Paper. Size—11½ × 5 inches. Sheets—22. Lines—10 to a Page Script— Devanāgarī No. of Granthas—600. Author—Śaunaka. Complete.

Beginning:

श्रीगणेशाय नमः ॥

श्रीगुरुचरणाभ्यां नमः ॥

31. एकषष्टिसङ्ख्याकानि ॥
32. नवषष्टिसङ्ख्याकानि ॥
33. षट्सप्ततिसङ्ख्याकानि ॥
34. षण्णवतिसङ्ख्याकानि ॥
35. ?
36. ?
37. किञ्चित्प्रात:शाखीयलक्षणम् ॥
38. ?

Remarks:—The Ms. is in good condition. The Ms. is dated Śaka 1710 in Kīlaka year or 1788. A. D. The scribe is the son of Paurāṇika Rākṣasabhuvanakara Kamalākara. What the title of the Ms. 'Bontalakṣaṇa' exactly means is not known.

## ॥ बोन्तलक्षणम् ॥

## 1773. BONTALAKṢAṆAM.

J. L. Collection No. 83. Substance—Paper. Size—8¼ × 4½ inches. Sheets—34 (4-37; sheet No. 19 is missing). Lines—10 or 12 to a Page. Script—Devanāgarī. No. of Granthas—800. Author—(?). Incomplete.

Beginning :

........वन्तेत्यनुदात्ताकारपूर्वं । चक्रभाश्रुवर्तयत् प्रतिभ्रवाणि वर्तयते अश्रुचक्रभ्रकारेण ॥ २ ॥ वपो न पक्षन्व्यनुश्रियोधिरे सप्तो आधिश्रियोभिरे । मानो गुह्या आविर्भवन्ति गुह्याः शुनं वरत्रावध्यन्तां संवरत्रादधातनेति विसर्गेण देवा देवेषु यज्ञियाऽष ओषधीर्वनिनानि यज्ञियाऽभिप्रवंतसमनेव पेषा योनं गच्छन्ति समनं न योषाः ।

End:

दिवो नो वृष्टिं धारा विसर्जनीयः । दिवो न विद्युद्वारा स्वरान्ता । अतः समुद्रमवपश्यति । कस्यस्वित्सवनमवगच्छति । अभिये सन्त्यादश्रुर्विश्वा यस्मिन्नादधुः ।

* * * * * * * *

यद्धवृथाषाद । उर्जो वृषावाक् । भ्रगभ्युदात्तं । त्वं सत्यमनुदात्तं । अवानो धेहि वातो देहि ॥८॥ विः सौभगे त्वं मोषुण इन्द्र यथा तव स्वधा वो विश्वानरो मात्वा तनभ्मा त्वा तपयदसि द्रागाऽस्मभ्यं तद्गमहेवेभिः सि-

न्धुर्ईवानाहयमग्निराभिक्रन्दाकं........................ ॥

Colophon Nil.

Subject: Bontalakṣaṇa—A lakṣaṇa grantha belonging to Ṛg-Veda. This Ms. is composed of the following sections:—

| Sections. | | | Sub-sections. |
|---|---|---|---|
| 1. द्विसङ्ख्याकानि | ... | ... | 8 |
| 2. त्रीणिसंख्याकानि | ... | .. | 11 |
| 3. चतुः संख्याकानि | ... | ... | 8 |
| 4. पञ्चसंख्याकानि | ... | ... | 8 |
| 5. षट्संख्याकानि | ... | ... | 4 |
| 6. सप्तसंख्याकानि | ... | ... | 4 |
| 7. अष्टसंख्याकानि | .... | .... | 3 |
| 8. नवसंख्याकानि | ... | .... | 7 |
| 9. दशसंख्याकानि | ... | ... | 4 |
| 10. एकादशसंख्याकानि | ... | .... | 2 |
| 11. द्वादश० | ... | ... | 2 |
| 12. चतुर्दश० | ... | .... | 6 |
| 13. पञ्चदश० | .... | ... | 2 |
| 14. षोडश० | .... | ... | 5 |
| 15. सप्तदश० | ... | ... | 1 |
| 16. एकोनविंशति० | .... | .... | 2 |
| 17. एकविंशति० | .... | ... | 1 |
| 18. द्वाविंशति० | .... | ... | 2 |
| 19. चतुर्विंशति० | ... | .... | 2 |
| 20. त्रिंशत्० | ... | ... | 1 |

| | | | |
|---|---|---|---|
| 21. एकत्रिंशत् सङ्ख्याकानि | .... | ... | 1 |
| 22. चतुश्चत्वारिंशत० | ... | ... | 2 |
| 23. षट्चत्वारिंशत्० | .... | ... | 1 |
| 24. अष्टाचत्वारिंशत० | .... | .... | 2 |
| 25. पूर्वरूपाणि | ... | ... | 1 |
| 26. पञ्चाशत्० | .... | ... | 5 |
| 27. अखण्डितानि | ... | ... | 2 |
| 28. द्वैपदानि | ... | ... | 2 |
| 29. खण्डितानि | ... | ... | 8 |

Remarks:—The Ms. is very old and is in a fairly good condition.

## ॥ बोन्तलक्षणम् ॥

## 1774. BONTALAKṢAṆAM.

J. L. Collection No. 74 a. Substance—Paper. Size—9×4 inches. Sheets—24 (1-24). Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—(?). Complete.

Beginning:

वेदपुरुषाय नमः ॥

मध्वः पीत्वा धघुक्षमिति द्वे सचेवहि । प्रतरं मकारान्तं । समत्र गावस्ता अजयो द्वे अनवन्त । स देवत्रो माहि दस्रोति द्वे बभूवथुः(?) किम इन्द्र ।कमागं आसेति जिघांससि । गावो धेनवो बृहन्त इंजु द्वे आविवासान् । अछावदत द्विविढीतिद्वे । आविवास दिवो नयस्य पयः प्रत्नस्य द्वे दुधाना विसर्जनीयाः । तावां विश्वस्यद्यावापृथिवी जनयन्निति द्वे यज्ञिया स्वरान्तौ ॥

End:

प्रसेनानीरूर्ध्वे सेना स्वरांता । पूर्वे सेनाविसर्गांता ।
अर्थं नाधिशेषं नाचि । अर्थं वृणाक्ति शेषं वृणक्तु । अर्थ-
वर्धयन्तीः शेषं वर्धयन्तीः । त्रिषधस्यावर्जम् ।

* * * * *

युष्मे अस्मे त्वे अमीयप्रगृह्यं । दिवास्त्रवितवेवरी य एति
पृथिव्या स्वरान्ता । सर्धववक्ष मिमिक्षः । मिश्र जगृत्म
ररत्म ववत्म क्षामसुप्तनिर्व्यंथतमत्स्व सक्ष्व मिमिक्ष्व
वाविश्व दाधिष्व प्रोत हिमोत सुनात पुनात ॥

Colophon:

बोन्ते लक्षणसमूहः समाप्तः ॥

Subject: Bontalakṣaṇa—A treatise on Vedalakṣaṇa belonging to Ṛg-Veda.

Remarks:—The Ms. contains the following works:—

(1) बोन्तलक्षणम् ॥ (2) वर्णोच्चारणलक्षणम् ॥

(3) उपलेखसूत्रम् ॥ (4) संहितासूत्रम् ॥

The Ms. is very old and is in a fairly good condition. It is damp in appearance.

## ॥ बोन्तलक्षणम् ॥

## 1775. BONTALAKṢAṆAM.

Burnell's Catalogue No. 2425. Page 3. Right column. Substance—Paper. Size—8¼ × 3¼ inches. Sheets—10 (1-12; 4th & 5th missing). Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—120. Author—(?). Incomplete.

Beginning—Same as No. 1774.

End:

इमे चित्रवोपस्तुतिः स इत्स्वपा इमे उभे आर्त्नी इमे मदीमदाय इमे द्यावापृथिवीत्यष्टौ इमे प्रगृह्यं ॥ यत्र रोदसी प्रगृह्यं नैतावदन्येति वर्जयित्वा ॥ ८ ॥ सुदंससा भवसा वे ॥

Subject: Bontlakṣaṇa—a treatise on Vedalakṣaṇa belonging to Ṛg-Veda.

Remarks:—The Ms. is in a fairly good condition. Only the first eight sub-sections of the first section given in No. 1773. are found in this Ms.

## ॥ बोन्तलक्षणम् ॥

## 1776. BONTALAKṢAṆAM.

Burnell's Catalogue No. 2426. Page 3. Right Column. Substance—Paper. Size—8¼ × 3 inches. Sheets—7. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—100. Author—(?). Incomplete.

Beginning:

श्रीवेङ्कटेशः प्रसन्नः ॥

यानि यदि यदा यूयं यस्य तस्य हि यद्यथा ।
यन्ति येनाश्रियो यांश्च इष्टोदात्तं पदं भवेत् ॥

हे चौदा पद यां तील एकपदमावा आस ता पदास बर ता स्वरहोते ॥— द्वितादधुस्तं गन्धर्वा द्वे अदधुः । समत्र गावस्ता अंजय इति द्वे अनवन्त ॥ संदेवत्रोभा हि दक्षेति द्वे बभूवथुः । त्वं सत्पतिः स प्राविततेति द्वे मघवानो द्वैपदं ॥ किं न इन्द्र किमाग आसेति द्वे जिघांसासे दिवो नयस्य रेतसो दुघानाः पयः प्रत्नस्य रेतसो दुघाना इति

द्वे दुघाना विसर्जनीयाः ॥ तावां विश्वस्य गोपा द्यावापृ-
थिवी जनयान्निति द्वे यज्ञिया स्वरान्ता ॥

End:

क आसतः क ई व्यक्तो वुंदजक्षानो कडनुत इति
ते कारेण । दुहाना धेनुर्वृजनेषु धेनुः प्रत्नस्य सानो मन्द्रे
वागैर्वर्तनि गाव इव ग्राममिति पंचदुहाना स्वरान्ता ॥

**Colophon:** Nil.

Subject: Bontalakṣaṇa—a treatise on Vedalakṣaṇa belonging to Ṛg-Veda.

Remarks:—The Ms. is in good condition.

## ॥ भाषिकस्वरसूत्रवृत्तिः ॥

## 1777. BHĀṢIKASVRASŪTRAVṚTTIḤ.

J. L. Collection No. 76. Substance—Paper. Size—$7\frac{1}{4} \times 4$ inches. Sheets—13. Lines—11 or 12 to a Page. Script—Devanāgarī. No. of Granthas—260. Author—Ācārya Mahāsvāmin. Complete.

**Beginning:**

विघ्नराजाय नमः ॥

अथ ब्र(ब्रा)ह्मणस्वरसंस्कारनियमः । उक्तो मन्त्रस्वरः ।
तेनात्र सिद्धं । उदात्तानुदात्तौ भाषिकस्तत्सन्धिः ।
(अनुदात्तावन्तरेणोदात्तः।) आग्रपूर्वे आख्यातपरो न ।
समासत्वा(त्वा)नाख्यातपरोपि (न) । अपूर्वस्य(श्च) समासो
नैव । जात्याभिनिहितक्षैप्रम(प्र)श्लिष्टाश्च । व्रतोयामो(वो
मो नो) सो च । ऊर्वे(ओच्चै)केषां । उदात्तमेत्य(त)त् ।
स्वरितानुदात्तौ च । उदात्ता(त्त)मनुदात्तमनन्त्यं । अत्यलं
(न्त्यं) सं॰ हतानां । भाषिके चोभयस्य(येषां) । य(ए)

कस्यापि । (स्वरितस्य चाभिनिहितत्वं ।) तेषां प्रायुस्तः (त्त)मादनन्तराणां च कम्पनं । उदात्तपूर्वस्या(नुदात्तस्य च) । उदात्तपूर्वस्य च स्वरितस्यापि च । (अत्रान्त्यस्यो-दात्तस्या)नुदात्तता(तां) प्रत्येके विवदन्ते ॥ १ ॥

आख्यातपदविकरणाः । अर्थादिः । (पादादिः ।) हि । हन्त । तेने(नेत्) । कुचि(वि)त् । अह । समुच्चये । आमन्त्रित[स्वरेण]सस्वरं । जिज्ञासां(सितं) । विचारितं । अवधारितम् । यद्योगी(गः) । विनियोगः । वाक्यशेषः । अनुबन्ध इति । एव आ षोडशादक्षरात्पदं विकुर्वन्ति । आपञ्चविंशादिति भारद्वाजः । आत्रिंशादित्योप-सिद्धिः(त्यौपशिबिः) । आमर्यादाख्ययोः पदयोर्बहूनां चा-पूर्वपदं विक्रियते । सवाणान्यो(त्राणीत्यौ)पशाविः (॥ २ ॥).

(वि)नियोगे तु पूर्वपदं । जिज्ञासितयोश्च । अ[न]न्वर्हि-(रहि)तयोश्च । विचारित(समुच्चित)योश्च । निर्वचनेनब-ध्य(निर्वचनेनुबन्धो) वाक्यशेषाभंज्ञार्थ(षोऽवध्यर्थ)श्चाव-धारणो न विकुरुत इति भारद्वाजः । भु(भूयो)वादि(दी) वरीयोवादि(दी) कनीयोवादि(दी) चानवधारणाः । परि-समाप्ता(त्यर्थश्चान्यतमो ह्यादी)नां न विकरोति । समप-दयोः स्वराद्यं(द्यो)रल्पस्वरतरं प्रकृत्या । स्वराद्यस्वराद्योश्च सममात्रयोः पूर्वनिम्न(त्रष्ट)मितिभारद्वाजः । यथार्थं चतुर्वि-धे(धं) पदं विप[र्य]यस्तं । (कण्ठ्यस्वरो ऋत्सवर्णे । वका-रस्य पदान्तस्य स्वरमध्ये लोपः । शेषं सामान्यशा(स्त्रात्) । अकारेकारोकारर्का(र)लृकारा अवर्णधारणाः ॥ रथत-

सयव(शतपथवत्)ताण्डिभाल्लविनां ब्राह्मणस्वरः । सप्त सामां । षड्जऋषभगान्धारमध्यमपञ्चमधैवतनिषादाः । तेषां योनयः । कण्ठात् षड्जः । शिरस ऋषभः । नासिकाया गान्धारः । उरसो मध्यमः शिरसः कण्ठात् पञ्चमः । धैवतो ललाटात् । निषादः सर्वतः इति । मन्त्रस्वरवत् ब्राह्मणस्वरश्चरकाणां । तेषां खाण्डिकेयौ-खेयानां चातुस्वर्यमपि क्वचित् । ततोऽन्येषां ब्राह्मण-स्वरः । तान एवाङ्गोपाङ्गानां तान एवाङ्गोपाङ्गाना-मिति ॥ २ ॥

इति परिभाषा समाप्तः(प्ता) ॥

श्रीगणेशाय नमः ॥

अथ ब्राह्मणस्वरसंस्कारनियमः । उच्चादयस्स्व[य] राः समाम्नाये उपदिष्टाः । व्याकरणप्रातिशाख्ये च तैः सिद्धैः ब्राह्मणस्वर उपादिश्यते । अथशब्द आ(न)न्तर्ये प्रयुज्यते । व्याकरणप्रातिशाख्याभ्यां संस्कृतौ सत्यां ब्राह्मणैः स्वरसंस्कार उपदिश्यते । अपि केतु(?) । अनु-भाषिकस्वरेण निराकांक्षा न जायते । किं तेन संस्कारनि-यमेनेत्यत आह— उक्तो मन्त्रस्वरः । ननु स्वरे स्व-भिहिते अपि ब्राह्मणे स्वरः कथं सिद्ध्यतीत्यत आह— तेनात्र सिद्धम् ।

❀ ❀ ❀ ❀

उदात्तपूर्वस्य च स्वरितस्य भाषिके परे कम्पनं भवति । नमो भूत्यै येदं चकार । एष्टा रायः प्रेषेभगायः । अत्रा-न(न्त्य)स्योदात्त(स्या)नुदात्त(तौ) प्रत्येके विवदन्ते । केॆ

अत्रान्त(न्त्य)स्योदात्तस्यासत अनुदात्ततां प्रति एके आ-
चार्या वदन्ति । तस्माद्ु ऊर्यादेवैतस्य पुरुषस्य बाहू ।
अस्य प्राणादपानती ॥

इति भाषिकमते वृत्तौ प्रथमा कण्डिका ॥ १ ॥

अथाख्यातपदविकरणाः । आख्यातं च तत्पदं च
तस्य विकरणाः ॥

End:

तान एवाङ्गोपाङ्गानां तान एवाङ्गोपाङ्गाना-
मिति । शिक्षा कल्पो व्याकरणं नैरुक्तं छन्दो ज्योतिषमि-
ति षडङ्गानि । पदं पदमनुपदं । छन्दो भाषा धर्मो मी-
मांसा न्यायस्तर्क इत्युपाङ्गानि । एतेषामङ्गोपाङ्गानां तान
एव स्वरो भवति । द्विरभ्यासः शास्त्रपरिसमाप्त्यर्थं इति-
करणश्चेति ॥

Colophon:

इत्याचार्यश्रीमहास्वामिकृता भाषिकवृत्तिः समाप्ता ॥

उदात्तास्वरितेनाचो स्वरितान्यं विधारयेत् (?)।
तेषामन्त्यं पुनर्नस्यादुदात्तस्वरितोदयम् ॥

संवत् १६१० वर्षे फाल्गुनमासे कृष्णपक्षे ९ नवम्यां तिथौ
शनिवासरे लिखितं प्रोहितदेवदत्तेन । इदं भाषिकवृत्तिः ॥

Subject: Bhāṣika Svara sūtras and their commentary. 1-3 K(h)aṇḍikas. This work " belongs to Prātiśākhya literature and gives briefly the bhāṣika svara and the Ākhyāta vikṛti (changes in verbs) that occur in Brāhmaṇas belonging to white Yajur-Veda.

Remarks:—The Ms. is very old and is in a fairly good condition. It is full of scriptorial mistakes. The text of the Sūtras is fully given, suggesting the correct readings in circular brackets, with the help of the commentary and the Printed Volume. The author of the Sūtras is not known. The commentary is

ascribed to one Ācārya Mahāsvāmin. The Ms. is dated Saṃvat 1640 or 1583 A. D. The scribe's name is given as Prohita (Purohita) Devadatta. On the front and back pages of this Ms. are respectively given "याजुषब्राह्मणस्वरसंस्कारनियमः ॥" and "भाषिकस्वरसूत्रवृत्तिपुस्तकं श्रीमद्गम्भीररा-ज(य)भारतीदीक्षितात्मजभास्कररायस्य ॥" i.e., that this Ms. is named Bhaṣika svara Sūtra Vṛtti, a treatise on Svara saṃskāra of (white) yajur Veda Bhrāhmaṇa and that it originally belonged to one Bhāskararāya, son of Gambhīrarāya bhāratī dīkṣita. Only the Sūtra text in this Ms. has been printed in the Benares Sanskrit Series.

## ॥ यजुर्वेदप्रातिशाख्यम् ॥

## 1778. YAJURVEDAPRĀTIŚĀKHYAM.

Burnell's Catalogue No. 9076 b. Page. 5. Right column.

Substance—Palm leaf. Size—16×1½ inches. Leaves—9 (100-108). Lines—7 or 8 to a Page. Script—Telugu. No. of Granthas—200. Author—(?). Complete.

**Beginning:**

हरिः ॐ ॥

अथ वर्णसमाम्नायः । अथ नवादितः समा(ना)क्षराणि । द्वे द्वे सवर्णे ह्रस्वदीर्घे । न प्लुतपूर्वं । षोडशादितः स्वराः । शेषो व्यञ्जनानि । आद्याः पञ्चविंशतिः स्पर्शाः । पराश्च-तस्रोऽन्तस्थाः । परे षडूष्माणः । स्पर्शानामानुपूर्व्येण पञ्च पञ्चवर्गाः । प्रथमद्वितीयतृतीयचतुर्थोत्तमाः । ऊष्म-विसर्जनीयप्रथमद्वितीया अघोषाः । न हकारः । व्यञ्जन-शेषो घोषवान् । आप्रावोवा(पा)भ्यधिप्रतिपरिविनीत्युप-सर्गाः । वर्णः कारोत्तरो वर्णाख्या ॥ अकारव्यवेतो व्य-

ञ्जनानां । न विसर्जनीयाजिह्वामूलीयोपध्मानीयानुस्वार-
नासिक्यानां ॥

End :

अथ चतस्रः संहिताः । पदसंहिताऽक्षरसंहितावर्णसंहि-
ताऽक्रमसंहिता चेति । नानापदसन्धानेन योगः पदसंहिते-
त्यभिधीयते । यथास्वमक्षरसंहितादीनामप्येवं ।

गुरुत्वं लघुता साम्यं पूर्व(ह्रस्व)दीर्घप्लुतानि च ।
लोपागमविकाराश्च प्रकृतिर्विक्रमः क्रमः ॥
स्वरितोदात्तनीचत्वं श्वासो नादोऽक्रमेव च ॥
एतत्सर्वं तु विज्ञेयं छन्दोभाषामधीयता ॥
पदक्रमविशेषज्ञो वर्णक्रमविचक्षणः ॥
स्वरमात्राविभागज्ञो गच्छेदाचार्यसंप(म)दम् ।
गच्छेदाचार्यसंप(म)दामिति ॥

Colophon :

इति द्वादशोऽध्यायः । द्वितीयप्रश्नः समाप्तः ॥
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।
सीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेतश्रीरामचन्द्राय नमः ॥
शुभमस्तु । श्रीगुरुभ्यो नमः ॥ श्रीगणाधिपतये नमः ॥

Subject : Black Yajurveda Prātiśākhya. First and Second Praśnas, each consisting of 12 Adhyāyas.

Remarks :—The Ms. is in a fairly good condition. For the other works contained in this Ms. see the list under Remarks on No. 1805. The work is available in print in the Mysore Sanskrit Series.

## ॥ यजुर्वेदप्रातिशाख्यम् ॥

## 1779. YAJURVEDAPRĀTIŚĀKHYAM.

Burnell's Catalogue No. 9074 h. Page 5. Right column. Substance—Palm leaf. Size—12×1 inches. Leaves—24 (48 to 76). Lines—5 to a Page. Script—Grantha. No. of Granthas—220. Author—(?). Complete.

Beginning, end and subject—Same as No. 1778.

Colophon : Nil

Remarks :—The following index (giving the beginnings of each Adhyāya of the two Praśnas in reverse order) is additionally given at the end of this Ms.

अथ चतस्रः संहिताः ॥ अथ वर्णविशेषोत्पत्तिः ॥ शब्दप्रकृतिः सर्वे वर्णानाम । व्यञ्जनं स्वराङ्गं ॥ इवर्णोकारे(र)योऽध्य(र्ये)वकारभा(वे) ॥ स्वरितयोर्मध्ये यत्र नि(नी)चं स्यात् ॥ ओकारं तु प्रणव एके ॥ तीव्रतरमानुनासिक्यम् ॥ अथ सकारपराः ॥ नकारस्य रेफोष्मयकारभावात् ॥ स्वरपूर्वं व्यञ्जनम् ॥ अथ मकारलोपः ॥ १२ ॥

अथ लोप. ॥ लुप्यते त्वकारे णकार ओकारपूर्वः ; अथैकमुभे ॥ ऊष्मपरो घोषपरो लुप्यते काण्डमायनस्य । अथ प्रथमः ॥ अथ नकारो णकारं । अथ षकार सकारविसर्जनीयौ ॥ अथ संहितायामेकप्राणभावे ॥ अथ प्रग्रहाः । अथावुत्तरे विभागे ॥ अथ शब्दोत्पत्तिः ॥ अथ वर्णसमाम्नायः ॥

The Ms. is in a decaying condition. For the other works contained herein see the list under Remarks on No. 1793.

## ॥ यजुर्वेदप्रातिशाख्यम् ॥

## 1780. YAJURVEDAPRĀTIŚĀKHYAM.

Burnell's Catalogue No. 12261 (f). Page 208. Right column.

Substance—Palm leaf. Size—$9\frac{5}{8} \times 1\frac{3}{8}$ inches. Leaves—17 (क to थ). Lines—7 or 8 to a Page. Script—Grantha. No. of Granthas—220. Author—(?). Complete.

Beginning and subject—Same as No. 1778.

Remarks:—The Ms. is very old and is in a decaying condition. For the index given at the end of this work see Remarks on No. 1779.

The Ms. coutains the following works:—

| | | | |
|---|---|---|---|
| 1 | गोपालमन्त्राः ॥ | 10 | सप्तलक्षणम् (तपरम्) |
| 2 | नृसिंहमन्त्राः ॥ | 11 | प्राणाग्निहोत्रमन्त्रः ॥ |
| 3 | सुदर्शनमालामन्त्रः ॥ | 12 | प्रणवमन्त्रः ॥ |
| 4 | गोपालमन्त्राः ॥ | 13 | वैश्वदेवप्रयोगः ॥ |
| 5 | गायत्रीजपविषयः ॥ | 14 | सन्तानगोपालमन्त्रः ॥ |
| 6 | यजुर्वेदप्रातिशाख्यम् ॥ | 15 | औपासनमन्त्रः ॥ |
| 7 | Do. ॥ | 16 | ऊर्ध्वपुण्ड्रविधिः ॥ |
| 8 | सप्तलक्षणम् (विलङ्घ्यम्) ॥ | 17 | केशवादिध्यानम् ॥ |
| 9 | ,, (नपरम्) ॥ | 18 | नारायणाष्टाक्षरः ॥ |

## ॥ यजुर्वेदप्रातिशाख्यम् ॥

## 1781. YAJURVEDAPRĀTIŚĀKHYAM.

Burnell's Catalogue No. 12261 (g). Page 208. Right column. Substance—Palm leaf. Size—$9\frac{5}{8} \times 1\frac{3}{8}$ inches. Leaf—1. Lines—10 to a Page. Script—Grantha. No. of Granthas—25. Author—(?). Fourth Adhayāya only.

Beginning :

अथ प्रग्रहाः । नावग्र(ह)ः । अन्तः । इतिपरोपि ।
ऊकारः । ओकारो(ऽ)संहितोऽकारव्यञ्जनपरः ॥

End:

न ग्रामी वर्चसी मिथुनी मासी(से) लोके भवे । अते समानपदे नित्यमवे भावे च ॥

Colophon :

प्रग्रहं(हः) समाप्तं(प्तः) ॥

Subject : Black Yajur Veda prātiśākhya. Fourth Adhyāya otherwise known as Pragrahādhyāya. 1-54 Sūtras.

Remarks :—The Ms. is very old and is in a decaying condition. For the other works contained in this Ms. see the list under Remarks on No. 1780.

## ॥ यजुर्वेदप्रातिशाख्यम् ॥

## 1782. YAJURVEDAPRĀTIŚĀKHYAM.

Burnell's Catalogue No. 9076 a. Page 35. Right column.

Substance—Palm leaf. Size—16×1½ inches. Leaves—99 (1-99). Lines—6 to 8 to a Page. Script—Telugu. No. of Granthas—2050. Author—Somayārya. Complete.

Beginning :

भक्तियुक्तः प्रणम्याहं गणेशचरणद्वयम् ।
गुरूनपि गिरां देवीमिदं वक्ष्यामि लक्षणम् ॥
व्याख्यानं प्रातिशाख्यस्य वीक्ष्य वाररुचादिकम् ।
कृतं त्रिभाष्यरत्नं यद्भासते भूसुरप्रियम् ॥

श्लोकयोरनयोरयमर्थः । भक्तियुक्तोऽहं । गणेशपादद्वयं । गुरून् । गिरामपि देवीं । वाग्देवीमित्यर्थः । तां च प्रणम्य लक्षणमिदं वक्ष्यामि । यल्लक्षणं त्रिभाष्यरत्ननामकं भूसुरप्रियं विप्रप्रियं भासते । कीदृशं लक्षणं प्रातिशाख्यस्य व्याख्यानरूपं । वाररुचादिकं भाष्यजातं वीक्ष्य न्यूनातिरेकपरि-

हारेण कृतं रचितं । आदिशब्देन आत्रेयमाहिषेयो(यौ) गृह्य(ह्ये)ते । अत एव त्रिभाष्यरत्नमिति नामोपपत्तिः । त्रयाणां भाष्याणां समाहारास्त्रिभाष्यम् । तस्य रत्नं भूषणम् ॥

अथ वर्णसमाम्नायः—'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथे'ति मङ्गलाद्यनेकार्थत्वादथशब्दस्यात्रैकोऽर्थो निश्चेतव्यः। तत्र प्रथमं तावन्मङ्गलार्थत्वमुच्यते, तस्य प्रणवसाधर्म्यात् ॥

End :

वेदस्वरूपमुच्यते ।

यजुर्वेदः पिङ्गलाक्षः कृशमध्यो बृहद्गलः ।
बृहत्कपोलः कृष्णाङ्गिस्ताम्रः काश्यपगोत्रकः ॥

वेदाङ्गान्युच्यन्ते ।

शीक्षा कल्पो व्याकरणं निरुक्तं [छन्दो] ज्योतिषं तथा ।
छन्दसां लक्षणं चेति षडङ्गानि विदुर्बुधाः ॥

अनुपदं चानुर्वी(पादं) छन्दो भाषासमन्वितम् ।
मीमांसान्यायकल्पश्च(तर्कश्च) (उ)पाङ्गानि विदुर्बुधाः ॥

एवं साङ्गोपाङ्गवेदगोत्रस्वरस्वरूपादिविज्ञा(जा)नन्नधीयानः पूतो भवति ।

ग्रन्थान्तरे यथा तद्वदिदं शास्त्रं यदृच्छया ।
अस्खलितेषु स्थानेषु पौरुषेयेषु वर्तते ॥

यथा प्रण(क्ष)त्राय देवाय । म ई ममादपहि । 'समद्शेन । आपि सीद । अस्मिंस्तनुवः । इत्यादौ न वर्तते ।

सिंहे व्याघ्र । अग्निष्टोमस्य निष्ठा । उपासि(इमसी) पोष मित्यादौ (तु) वर्तते । गच्छेदाचार्यसंसदीमित पदवीप्सा शास्त्रसमाप्तिं द्योतयति ॥

Colophon:

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे
द्वितीयप्रश्ने द्वादशोऽध्यायः ॥

त्रिलोचनध्यानविशुद्धकौमुदी
विनिद्रचेतःकुमुदः कलानिधिः ।
स सोमयाख्यो विततान संयुतं
विपश्चिदां भाष्यमिदं सुबोधिनि ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥

श्रीरामचन्द्राय नमः ॥

Subject: Black Yajurveda Prātiśākhya Vivaraṇa otherwise known as Tribhāṣyaratna.

Remarks:—The Ms. is in a very good condition. For the other works contained herein see Remarks under No. 1811.
The work is printed in the Mysore Sanskrit Series.

## ॥ रावणबैट् ॥

## 1783. RĀVAṆABAIṬ.

J. L. Collection No. 84. Substance—Paper. Size—9 × 3¾ inches. Sheets—8. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—120. Author—?. Complete.

Beginning:

श्रीगणेशाय नमः । रावणबैट् ॥

नान्तं विसर्गान्तमथावगृह्यं
सान्तं तु सेन्तं विषमं समं च ।
सङ्ख्या प्रगृह्यस्य च पञ्चकेऽन्त्ये
पदेषु वक्ष्ये प्रतिवर्गमत्र ॥ १ ॥

कादैरष्टचतुष्कैश्च वर्गो(त्?)ङणनमैः क्रमात् ।
न विसर्गान्तदुः(द्विः?)खण्डं कशयोर्विषमं समम् ॥ २ ॥
चेनकारष्टेविसर्गो ङेदुः(द्विः?)खंड(डाः) समा(ः)क्रमात् ।
ते दुः(द्विः)खंडाः पे विसर्गो येनांते(ताः) विषमं(माः) क्रमात्

* * *

वाक्यद्वयमिदं ज्ञेयं सुखग्रहणसिद्धये ।
पदरत्नपरीक्षायां पदसङ्ख्येयमीरिता[११] ॥
पदप्रगृह्यं दुः(द्विः?)खंडविसर्गमनताः क्रमात् ।
इति परिभाषा(प्रकरणं) समाप्ता(प्तं) ॥

अग्निमीले ॥ (अग्नि) ङेश ज्ञीश्र । प्रीचतिज्ञी ।
शु नु गेफो ।

End :

तद्विदास भुवनेषु । दिखेजव(वे) । छी छि चिचो ।
ठोङाळ्ड(ढ)। भूगीतषे। वुणुफूदे। बेभिरोभ(ब)। स्यौशि-
थूघे। राद्रि ॥ त्यांचिदर्त्रि। ङ्योफघथु। सेचाबुखो ! तो
खुङ्चु। वैचीकूङी। पढाङ्गीबू। पुतोशोव। व्योसछिट्टः।
पीपाझशो। तैणीजुध्रि। णषघोठे। गीदैतिच्ल्लि। तुति-
गिश। ङि ६४. हरिः ॐ ।

पदाविसर्जनीयो नो द्विखण्डं प्रग्रहस्तथा ।
मकारश्च तकारश्च सप्तसङ्ख्याः प्रकीर्तिताः ॥

तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबन्धनात् ।
मूर्खहस्ते न दातव्यामित्थं भवति(वदति) पुस्तकम् ॥

Colophon Nil.

Subject: Rāvaṇabait, belonging to Ṛg-Veda Saṃhitā—containing eleven Paribhāṣā verses are regarding the Saptasaṅkhyā—पड्दुविमनत्—and their exact number in a symbolical language.

Remarks:—The Ms. is old and is in a fairly good condition. It is damp in appearance.

---

## ॥ रावणबेट् ॥

## 1784. RĀVAṆABAIT.

T. S. Collection No. 65. Substance—Paper. Size—9½ × 4¼ inches. Sheets—7. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—125. Author—?. Complete.

Beginning, end and subject—Same as No. 1783.

Colophon:

पद्माविसर्जनीयोनो द्विखण्डं प्रग्रहं तथा ।
मकारश्च तकारश्च सप्तसङ्ख्या(:) प्रकीर्तिता: ॥
इति श्रीरावणबेटि(ङि)यं सम्पूर्णा ॥
शके १७४५ सुभानुसंवत्सरपुण्यमासे कृष्णपक्षे चतुर्दश्यां गुरुवासरे पौराणिकोपनामराक्षसभुवनकरस्थकमलाकरभट्टस्य सूनु(ना) रामेण लिखितमिदं पुस्तकं समाप्तम् ।

Remarks:—The Ms. is old and is in good condition. The Ms. is dated Śaka 1745 in Subhānu year or 1823 A. D. The scribe's name is given as Rāma, son of Kamalākarabhaṭṭa.

## ॥ रावणबैट् ॥

## 1785. RĀVAṆABAIT.

J. L. Collection No. 75. Substance—Paper. Size—$6\frac{1}{2} \times 4\frac{1}{4}$ inches. Sheets—3(1-3). Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—24. Author—?. Incomplete.

Beginning and subject—Same as No. 1783.

End :

ह्र विरूपे । ह्रडग्योझिफि । पकाचैच । + हुछुवा

लै । कटीभीडी । नौवौ ॥ ८ ॥ प्रवः पान्तं । प्रवोणो

चुखीये । ०................ ॥

Colophon. Nil.

Remarks :—This Ms. abruptly breaks off in the beginning of the lakṣaṇa Vākya of the First Adhyāya of the Second Aṣṭaka of Ṛg-Veda Saṃhitā. The Ms. is very old and is in a fairly good condition. It is damp in appearance.

## ॥ वर्णोच्चारणलक्षणम् ॥

## 1866. VARṆOCCĀRAṆALAKṢAṆAM.

J. L. Collection No 74 b. Substance—Paper. Size—9×4 inches. Sheets—4 (24-27). Lines—9 to to a Page. Script—Devanāgarī. No. of Granthas—50. Author—?. Complete

Beginning :

निर्विघ्नं सर्वकर्तारं सर्वात्मानं शिवं गुरुम् ।

प्रणम्यार्यान्प्रवक्ष्यामि वर्णोच्चारणलक्षणम् ॥ १ ॥

वेदस्य लक्षणं सम्यग्बालानां बुद्धिवर्धनम् ।

यथोक्तं वेदशास्त्रेषु यथासंक्षिप्तमर्थवत् ॥ २ ॥

द्विविधं वर्णजातं हि स्वरो व्यञ्जनमेव च ।

अकारादिः स्वरो ज्ञेयः कादिव्यञ्जनमुच्यते ॥ ३ ॥

द्विविधञ्च(श्च) स्वरो ज्ञेयो नासिक्यः सानुनासिकः ।
उदात्तश्चानुदात्तश्च स्वरितः प्रचयस्तथा ॥ ४ ॥
कादीनां पञ्चवर्गाश्च स्पर्शा इति हि संज्ञिका(ता): ।
दुस्पृष्टञ्चेति विज्ञेयो डढयोः स्वरमध्ययोः ॥ ५ ॥
वर्गाणां प्रथमा वर्णा द्वितीया ऊष्मसंज्ञकाः ।
तकारवर्जाश्चाघोषाः शिष्टं घोषवदुच्यते ॥ ६ ॥

End:

परस्परस्तु संयोगः स्पर्शानां सम्भवेद्यदि ।
तत्पदस्य श्रुतिर्नास्ति विरामो व्यञ्जनस्य च ॥
विट्कुला विभ्राट् बृहत्पुनर्यंमंस्त्रिष्टुप् । गायत्र्यर्वाक् ।
अस्मात्मनुष्टुत इति च निदर्शनानि ॥
स्पर्शानां पञ्चमैर्योगे भवता हयमाश्रिताः ।
अयःपिण्डेन तत्तुल्यं घनबन्धाः प्रकीर्तिताः ॥

Colophon :

इति वर्णोच्चारणं समाप्तम् ॥

Subject : Varṇoccāraṇa lakṣaṇa—a lakṣaṇa treatise belonging to Ṛg-Vedic Śikṣā—giving the different kinds of alphabets with their sthāna and prayatna. Also informations regarding the Sandhi changes with apt illustrations from Vedas are given.

Remarks:—The Ms. is old and is in a fairly good condition. It is damp in appearance. For the other works contained in this Ms. see the list under Remarks on No. 1774.

---

## ॥ विकृतिवल्ली ॥

## 1787. VIKṚTIVALLĪ.

Burnell's Catalogue No. 2389*b. Page 3. Right column.

Substance—Paper. Size—8½ × 3 inches. Sheets—3 (3-5 out of 9). Lines—7 or 8 to a Page. Script—Devanāgarī. No. of Granthas—19. Author—Vyāḷi(?). Incomplete.

Beginning:

तत्सर्वज्ञं जगत्सेतुं परमात्मानमीश्वरम् ।
वन्दे नारायणं देवं निरवद्यं निरञ्जनम् ॥ १ ॥
नत्वादौ शाकलाचार्यं गुरुं वन्दे महानिधिम् ।
मुनीन्द्रं सर्वदेवज्ञं ब्रह्मज्ञं लोकविश्रुतम् ॥ २ ॥
नमामि शाकलाचार्यं शाकल्यं स्थविरं तथा ।
ब्रह्मविद्यागुरुं श्रेष्ठं भारद्वाजं बृहस्पतिम् ॥ ३ ॥
शैशिरीये समाम्नाये व्याळिनैव महर्षिणा ।
जटाद्या विकृतीरष्टौ लक्ष्यन्ते नातिविस्तरम् ॥ ४ ॥
जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः ।
अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः ॥ ५॥
ब्रूयात्क्रमविपर्याय(से) क्रममीदृग्विधं दिशेत् ।
जटाख्यां विकृतिं धीमान् विज्ञाय क्रमलक्षणम् ॥ ६ ॥
अनुलोमविलोमाभ्यां त्रिवारं हि पठेत्क्रमम् ।
विलोमे पदवत्सन्धिरनुलोमे यथाक्रमम् ॥ ७ ॥
षत्वं णत्वं च दीर्घत्वं क्रमसन्धौ यथोच्यते ।
व्युत्क्रा(त्क्र)मे तत्र कर्तव्यं स्वरःक्षैया कथं(क्षैमादिकं
भवेत् ॥ ८ ॥
विलोमे पदवत्सन्धिरनानुपूर्व्यसंहिते ।
आनुपूर्व्यं क्रमे त्याज्यं व्युत्क्रामं पदवत्पठेत् ॥ ९ ॥

य(च)तुःक्रमे त्रिक्रमे च तथा पञ्चक्रमेपि च ।
आद्यन्ताभ्यां त्रिवृन्मध्यं ब्रूयात्क्रमविपर्यथाः ॥ १० ॥
समयादौ क्रमे यद्वत्समयात्परतस्तथा ।
जटायां समयादिस्थं शुद्धेन परिवर्तयेत् ॥ ११ ॥
समयक्रामणं नास्ति समयादिक्रमं विना ।
त्रिक्रमं समयादिस्थमादिना सह तं पठेत् ॥ १२ ॥
व्युत्क्रमे क्रमवत्सन्धिः स च क्षेप्रवदिष्यते ।
नकारादिविधानं तत्स्वरान्तः परिवर्तनम् ॥ १३ ॥
त्र्यक्षरान्तं प्रगृह्यानां उकारामन्त्रितस्य च ।
विलोमे पदसन्धौ तु प्रगृह्यत्वं न विद्यते ॥ १४ ॥
एकारौकारपरस्तु अकारोऽभिनिधीयते ।
व्युत्क्रामे क्रमवच्चैव [व] नवधा कम्पलोपनम् ॥ १५ ॥
विलोमसन्धौ प्रश्लिष्टे क्षैप्राभिनिहितेषु च ।
वर्जयित्वा स्वरं जात्यं त्रिषु कम्पं निबोधनम् ॥ १६ ॥
परिग्रहावग्रहेषु व्युदात्तादिपदेषु च ।
उदात्तादिविधानं तच्छौनकोक्तं भवेदिह ॥ १७ ॥
आदित्यैर्यातमित्यस्मिन् पादेव(?)ष्टाक्षरा भवेत् ।
पदाध्यायेऽनुदात्तः स्यात्संहितायामुदात्तवत् ॥ १८ ॥
पदद्वयमनुक्रम्य व्युत्क्राम्योत्क्रम्य सन्धिवत् ।
स्वरलक्षणसंयुक्ता सा जटेत्यभिधीयते ॥ १९ ॥

**Colophon**:

इति जटापटलं समाप्तम् ॥

Subject: Jaṭāpaṭala—a part of Vikṛti Vallī. 1-19 Verses. This work belongs to Ṛg-Vedic Lakṣaṇagrantha.

Remarks:— The Ms. is old and is in good condition. The other works contained in this Ms. are:

(1) स्वराङ्कुशः ॥ (2) जटोदाहरणम् ॥

## ॥ विकृतिवल्ली ॥

## 1788. VIKṚTIVALLĪ.

J. L. Collection No. 77 b. Substance—Paper. Size—7¾ × 1½ inches. Sheets—2 (3 & 4). Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—13. Author—Vyāḷi (?). Incomplete (wants end).

Beginning—Same as No. 1787.

End:

समयाक्रमणं नास्ति समयादिक्रमं विना ।
त्रिक्रमं समयादिस्थं आदिना सह तं पठेत् ॥ २ ॥
व्युत्क्रमे क्रमवत्सन्धिः स च क्षैप्रवदिष्यते ।

Colophon. Nil

Subject: Vikṛti Vallī, belonging to Ṛg-Veda. 1-13 Verses.

Remarks:—See Remarks under No. 1787. The other works contained in this Ms. are:

(1) स्वराङ्कुशः ॥ (2) जटोदाहरणम् ।

The Ms. is in good condition. This Ms. abruptly ends in the middle of the 13th Verse.

## ॥ विकृतिवल्ली ॥

## 1789. VIKṚTIVALLĪ.

Not noticed by Burnell.

Substance—Paper. Size—8 × 3½ inches. Sheets—2. Lines —8 to a Page. Script—Devanāgarī. No. of Granthas—20. Author—?. Inomplete.

Beginning :

श्रीलक्ष्मीवेङ्कटेशः प्रसन्नः । गुरुभ्यो नमः ॥

अष्टौ विकृतयः—

जटा माला शिखा लेखा ध्वजो दण्डो रथो घनः ।
अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा मनीषिभिः ॥ १ ॥

जटा—

पदद्वयमनुक्रम्य व्युत्क्रम्य क्रमसन्धिवत् ।
स्वरलक्षणसंयुक्ता सा जटेत्याभिधीयते ॥ २ ॥

माला—

अनुलोमविलोमाभ्यां त्रिवारं हि पठेत्क्रमम् ।
विलोमे पदवत्सन्धिरनुलोमे यथाक्रमम् ॥ ३ ॥

(क्रम)माला—

ब्रूयात्क्रमविपर्यासावर्धर्चस्यादितोऽन्ततः ।
अन्तं चादि नयेदेवं क्रममालेति गीयते ॥ ४ ॥

अग्नेः पूर्वे अवरीवुरित्यवरीवुः । पूर्वे भ्रातरः ।
आवरीवुः । भ्रातरो अर्थं । अन्वावरीवुः ॥

End :

(क्रम)दण्डः—

क्रममुक्त्वा विपर्यश्च(स्य) पुनश्च क्रममुत्तरम् ।
अर्धर्चादेवमुक्त्वोक्त्वा क्रमदण्डो विधीयते ॥

अग्नेः पूर्वे । पूर्वेऽग्नेः । अग्नेः पूर्वे । पूर्वे भ्रातरः ।
भ्रातरः पूर्वेऽग्नेः । अग्नेः पूर्वे । पूर्वे भ्रातरः ॥

* * *

अन्वावरीवुः । आवरीवुरन्वाधानम् ऋधीवेतमर्थम्

भ्रातरः पूर्वेऽग्रेः ॥ अग्रेः पूर्वे । पूर्वे भ्रातरः । भ्रातरोऽर्थे ।

अर्थमेतम् । एतं रथीव । रथीवाध्वानम् । रथीवेतिरथी

इव । अध्वानमतु । अन्वावरीवुः । आवरीवुः । आवरीवु-

रित्यावरीवुः । ० ० ० ॥ क्रमरथः ॥.... ॥

Colophon : Nil.

Subject : Vikṛti Vallī, belonging to Ṛg-Veda.

Remarks:—In this Ms. definitions and illustrations of

(1) जटा (2) माला (3) क्रममाला (4) शिखा (5) लेखा (6) क्रमध्वजः and (7) दण्ड are given.

The Ms. is old and is in a bit worn-out condition. The definition of शिखा and the definitions and illustrations of रथ and घन are not given in this Ms. Only some verses of this Ms. are found in Vyāḷi's Vikṛti Vallī; others are given with some modification. Compare the text given in No. 1787.

## ॥ विकृतिवल्लीव्याख्या ॥

## 1790. VIKṚTIVALLĪVYĀKHYĀ.

J. L. Collection No. 54. Substance—Paper. Size—9×4¼ inches. Sheets—5. Lines 7—to a Page. Script—Devanāgarī. No. of Granthas—30. Author—(?). Incomplete.

Beginning :

श्रीगणेशाय नमः । श्रीसाम्बसदाशिवाय नमः ।

श्रीगुरवे नमः ॥

अथ मालादीनां षण्णां विकृतीनां स्वरूपमुदाहरणञ्च

लिख्यते ।

ब्रूयात्क्रमविपर्यासादर्धर्चस्यादितोऽन्ततः ।
अन्तं चादिं नयेदेवं क्रममालेति गीयते ॥

ब्रूयादिति । अर्धर्चस्य आदितः अन्ततश्च आरभ्य यथाक्रमं क्रमव्युत्क्रमाभ्यां क्रमं वदेत् ॥ अन्तं अन्तत आरभ्याधीतं क्रमं आदितः समाप्तिं नयेत् ॥ आदिं आदित आरभ्याधीतं क्रमं अन्ततः समाप्तिं नयेत् । एवंभूतविकृतिः क्रममालेति गीयते ॥ ५ ॥ ऋच्युदाहरणम् ॥ अग्निमीळे । ऋत्विजामित्यृत्विजं । ईळे पुरोहितं ऋत्विजं देवं । पुरोहितं यज्ञस्य । देवं यज्ञस्य । पुरोहितमिति पुरःऽहितं । यज्ञस्य पुरोहितं । यज्ञस्य देवं । पुरोहितमीळे । देवमृत्विजं । पुरोहितमिति पुरःऽहितं । ऋत्विजमित्यृत्विजं । ईळेऽग्निम्

End :

अथ ध्वजः ।

ब्रूयादादेः क्रमं सम्यगन्तादुच्चारयेदिति ।
वर्गे वा ऋचि वा यस्स्यात्पठितः स ध्वजः स्मृतः ॥१॥

ब्रूयादिति । वर्गे वा ऋचि वा आदेः आदित आरभ्य सम्यक् क्रमं ब्रूयात् । अन्तात् अन्तिमक्रममारभ्य सम्यगुच्चारयेत् । एकमेकं पूर्वं पूर्वं पदं अन्त्योपान्त्यादिक्रमपूर्त्यै अनुक्रमेण कर्षयेदित्यर्थः ॥

Colophon : Nil.

Subject : Vikṛti Vallī vyākhyā belonging to Ṛg-Veda.

Remarks:—In this Ms. the definitions of क्रममाला, शिखा, रेखा and ध्वज are given in verses, along with the explanations and illustrations. This Ms. breaks off in the explanation of

the ध्वज Vikṛti, without giving its illustration. The ṛks taken for illustration in this Ms. are different from those found in No. 1789. The Ms. is in good condition.

---

## ॥ वेदलक्षणम् ॥

## 1791. VEDALAKṢAṆAM.

Burnell's Catalogue No. 9074 f. Page 5. Right column. Substance—Palm leaf. Size—12½ × 1 inches. Leaves—12 (30-41 out of 72). Lines—5 to a Page. Script—Grantha. No. of Granthas—120. Author—?. Complete.

Beginning :

दधिक्राविष्णो वृष्णाकोऽतिवरुणाय हिरण्यवाशिः आच्छेत्ता ते माच्छेदमरशिपन् । यस्याग्निहोत्रं अश्वेषु पूर्वं निकारः । अन्यत्र ऋकारः । अग्निनाग्निः श्रद्धयाग्निः कविराग्निः । दिवोवष्मन्यनूषो अग्निनाग्निः समिध्यते । अन्यत्र समिध्यसे । आप उन्दन्तु उदायुषा युञ्जते । अयं वान्दवासुरानिन्द्रं देवम्याहम् । अग्राविष्णूमहिन्द्रं हिरण्यगर्भो मारुतं नवो नवो निवीतं । उशन्तस्त्वा निगृह्य अग्निनोपयामगृहि(ही)तोऽसि

End :

सेवासुरा सुवर्ग्याय देवस्यत्तवो वै यथा वा ऋक्षा वा आदित्याः गावोऽग्निना वै होत्रा तार्प्येण सुवर्गस्य लोकस्यानुख्यात्यै ब्रह्मयदिन उत्तरावर्ति आपो निनयाति अन्यत्रापोवनयति पिवोन्नो प्रथमजामृतस्य अन्यत्र प्रथमजा ऋतस्य सत्यमाहुरानितो अहश्रेष्यते पूर्वं यः प्रजापतिरग्निमसृजत प्रजापतिं पितरं वर्जयित्वा । यदग्ने यानि यविष्ठ्यसकारपरश्चान्यत्र यविष्ठहोतरि यविष्ठेति

वर्जयित्वा वृणामहे तस्माद्योनिः गर्भो यज्ञे येषयः पूर्वमृ-
त्वियः अन्यत्वर्त्विजः विश्वा कर्पात ऊर्ध्वं ध्यानं मध्यं क-
—वर्जं रुद्रस्यानयस्तमसि इन्द्रो वै दहरंतराल्तिं परं गुप्त्यै।
अन्यत्र गुप्त्यै ॥

Colophon: Nil.

Subject: Vedalakṣaṇa, belonging to Black Yajurveda(?).

Remarks:—For the other works contained in this Ms. see the list under Remarks on No. 1804. The Ms. is in a fairly good condition and is full of scriptorial errors.

## ॥ वेदलक्षणम् ॥

## 1792. VEDALAKṢAṆAM.

J. L. Collection No. 21. Substance—Paper. Size—9×3½ inches. Sheets—4 (15-18). Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—60. Author—?. A Fragment only.

Beginning:

..................ष्ठं आराजानो शंतारुता तावो विश्वस्या-
भूतं गोपासु गोपास्वगोपाशं नः पृश्निगर्भवतुस्वावेशा
भवतु देवगोपानवगोपा स्वरांता। मही द्यावापृथिविम्रहज्ये-
ष्ठस्वेजनं तेदोरुवादाविषुतस्य त्यारुवा पवमानरुत्रा रुचा
संपस्वानयारुचा अथा रुत्रोग्रेवरुवातवरुवाउकारेण ॥

End:

स्वस्ति न इन्द्रो धियं पूषा स नो अग्निः सुवीर्यं आगं+
परन्तोभे सौप्रणः परिणो देववीतये आभिगव्यानि वीतये
केतुं कृण्वन्दिवस्वारींदोव्यव्यमर्षसि श्रूषेव यथैतानि सो-
मतं त्वा हस्तिनकविर्वेधसा......... ॥

**Colophon**: Nil.

Subject: Vedalakṣaṇa (?) 8-16 Sections.

Remarks:—The Ms. is old and is in a fairly good condition. It is damp in appearance. The contents of this Ms. are yet to be identified. It is full of scriptorial errors.

## ॥ सप्तलक्षणम् ॥

## 1793. SAPTALAKṢAṆAM.

Burnell's Catalogue No. 9074 d (e). Page 5. Right column. Substance—Palm leaf. Size—$12\frac{1}{2} \times 1$ inches. Leaves—12 (19-30). Lines—5 to a Page. Script—Grantha. No. of Granthas—100. Author—Śrīvatsāṅka. Complete—Aniṅgya only.

**Beginning**:

हरिः ॐ ॥

नमस्कृत्य विनेतारं विघ्नानामनुशिष्यते ।
अनिङ्ग्यमिङ्ग्यसाद्दश्याद्यत्सन्देहास्पदं परम् ॥
श्रुतिश्चच्छन्दनिर्दिष्टं विकृतं चापदात्मकैः ।
स्यादनन्यपरा(वदन्)काराद्यकारादि च यत्पदम् ॥
मिश्र्यां भ्यः सुपिरर्वागोभावं ह्रस्वभागदीर्घश्च ।
निङ्ग्य(त्वं)विहायनेङ्ग्यं गोगीः सुरदुन्दुचे(ति)भिश्श्रुत्या ॥

* * * * * * *

एभिर्युक्तं ह्रस्वभाग्युद्धह्रस्व·
यौदूदन्तं देवताद्वन्द्वकश्च ।
हित्वा सर्वं नीचमन्यस्वरं चे·
नीचं तत्राप्येवमेवोहनीयम् ॥

(इति परिभाषा ॥)

अथान मित्रान्यतराम्बरीषः
श्रुतोवधिष्मा श्वतरोऽनवद्यम् ।
अवाकयाङ्काङ्कमसृषुदन्ता·
वयातवीयानवताद(?)ध्यम् ॥ १ ॥

End :

साधारणं सहिम्र(र्दिंगृ)र्दिं सभेय·
स्तालाबुकेभ्यश्च सरीसृपेभ्यः ।
संस्कृत्य सुप्तास्तनयिन्तुशब्दाः
स्वात्तं समानत्र समस्य सं[ग्रं]काः ॥

साह्नन्त्यसावित्रसपत्नसूनृताः
शब्दा हविष्यं च हलीक्ष्णशब्दवत् ।
हेमन्त(हिरण्य)होत्रीयहिरण्ययश्श्रुतो
हैमन्तिकश्शुच्चाह्निकं हिरण्मयम् ॥

प्रपश्चत्वादनिङ्गयानां दिङ्मात्रमिह सूचितम् ।
अतोऽनुक्तं च यत्किञ्चि(द्दु)ज्ञेयं तन्मनायणः(नीषिभिः) ॥

हरिः ॐ ॥

Colophon :

समुलक्षणं समाप्तम् ॥

Subject: Aniṅgyalakṣaṇa, belonging to the Black Yajurveda.

Remarks :—The Ms. is old and is in a fairly good condition. For the other works contained in this Ms. see the list under Remarks on No. 1804. This work available in print in Grantha script edited by Brahmaśrī Sundareśvara Śrautin of Tiruvadi near Tanjore, gives one more verse at the end, which throws some light on its author: cf.

"एषा[म]निङ्गयपदानां पदवी सन्दर्शिता [सुगता] सुधिया ।

देवी(व)मनीषिसुतेन श्रीवत्साङ्केन तैत्तिरीयाणाम् ॥

The author of this work is known as Śrī Vatsāṅka, son of Devamanīṣin. The first two Maṅgala verses of this work—

(1) मुनिमानसमन्थान + मुरारये ॥

(2) गुणत्रयविहीनाय + पुरत्रयमथे नमः ॥

are not given in this Ms. For the full text of these two verses see the beginning of No. 1807.

## ॥ सप्तलक्षणम् ॥

## 1794. SAPTALAKṢAṆAM.

Burnell's Catalogue No. 9074 d. Page 5. Right column. Substance—Palm leaf. Size—12½ × 1 inches. Leaves—5 (13-17). Lines—5 to a Page. Script—Grantha. No. of Granthas—40. Author—?. Complete—Avarṇi only.

Beginning:

हरिः ॐ ॥

अवर्ण(र्णि)न्यनुक्तं समो(मा)प्यातिरिक्तं
परित्यज्य दुष्कृ(कीर्ति)तञ्चाभिवीक्ष्य ।
ककारादिवर्णक्रमेणाहमेतं
सुवृत्तिं करिष्यामि विस्पष्टवाचम् ॥ १ ॥

ओदेतदवर्णसञ्ज्ञं संहितायां मता(पदा)दिक(ग)म् ।
अवर्णं ज्ञ(ज्ञा)तुमस्माभिरिदं शास्त्र(स्त्रं)प्रणि(णी)यते ॥ २ ॥

नोदात्तो यः पदाध्याय उदात्तः संहितागमे ।
यश्चोदात्तः पदाध्यायो स्वरितः संहितागमे ॥ ३ ॥

अघोषाक्षरतः पूर्व ओकारः सांहितश्च यः ।
तेभ्यः परः पदाध्यारोप(ये त्व)कारः स्यात् पदाति(दि)गः ॥

End :

अस्मै चास्थान्यसीदच्चास्मानस्याभिहतो न तु ।
अस्या (हिर)हभूनोहन् अहुतादोहरमहुन् (ह) ॥
अहरच्चाहरन्ताहारहार्षं चाहुतो…हर(तादहं) ।
अहास्थाहरतां चे(चैवे)त्युक्तो ह्रस्वस्य सङ्ग्रहः ॥

Colophon : Nil.

Subject : Avarṇilakṣaṇa, belonging to Kṛṣṇa Yajurveda Saṃhitā, giving a list of words where an initial अ or आ may be merged in the final ओ, ए, or आ of the immediately previous words under the rules of Sandhi.

Remarks :—The Ms. is old and is in a fairly good condition. For the other works contained in this Ms. see the list under Remarks on No. 1804.

## ॥ सप्तलक्षणम् ॥

## 1795. SAPTALAKṢAṆAM.

Burnell's Catalogue No. 9074 d(i).

Substance—Palm leaf. Size—$1\frac{1}{2} \times 1$ inches. Leaves—3 (17-19). Lines—5 to a Page. Script—Grantha. No. of Granthas—23. Author-?. Complete.—Āvarṇi only.

Beginning :

आग्नीध्राग्रग(य)णाज्योपापत्का(वर्ता)ग्नोत्यायुषभृतिः ।
आग्नीराहवनीयाग्नेयाग्नामुष्यायणश्रुतिः ॥ १ ॥
आत्मशब्दो नोरसादिरायुश्शब्दोनघात्परम्(ः) ।
अन्तोदात्त(त्तो) निहत(तो)त्वाप्यादित्यश्रुनी(तिरि)ष्यते ॥२॥
आश्विनारण्यशब्दो चाप्यन्तोदात्ता श्रुता(तौ) श्रुतिः ।
आहुत्यायतनयोश्च शब्दौ नापूर्वके(कौ) न तु ॥ ३ ॥

End :

आसीदासामहै चापि त्वासामास्येन चासुरः ।
आसादयति चोदात्तवानासन्नाय चाप्यथ ॥

आस्थादास्था(तास्ताव)आहावमाहुत्याहवनस्तथा ।
अल्पेन च च(ग्रा)हरन्ति स्यादाहनन्याय चाहलम् ॥

ऋतुनास्मोपहत्यथ परा श्राव्यानुवाक्यया ।
आहैतत्पूर्वमाहुश्चेत्येषोऽवार्णिः सुनिर्मितः ॥

Colophon : Nil.

Subject: Āvarṇi lakṣaṇa, one of the seven lakṣaṇas belonging to Black Yajur Veda. This work gives a list of such words from the Yajur Veda as begin with an ā which is merged in the final vowel of the previous word.

Remarks:—The Ms. is in a fairly good condition. This work is not, however, noticed by Dr. Burnell under this Ms. For the other works contained in this Ms. see the list under Remarks on No. 1804. The No. 868. Āvarṇi in Vol. II. Vedic literature of the Oriental Manuscript Catalogue gives a verse in its end which gives the name of the author of this work : cf.

"आहुराकारपूर्वश्चेदेषोऽवर्णिस्सुनिर्मितः

तिन्त्रिणीकुलसम्भूतमहाधिपतियज्वना ॥

The work is attributed to one Mahādhipatiyajvan of Tintriṇī (the tamarind tree) family.

## ॥ सप्तलक्षणम् ॥

## 1796. SAPTALAKṢAṆAM.

Burnell's Catalogue No. 9074 c. Page 5. Right column.
Substance—Palm leaf. Size—$12\frac{1}{2}\times1$ inches. Leaves—5 (9-13 out of 72). Lines—5 to a Page. Script—Grantha

No. of Granthas—50. Author—Śourisūri. Complete—Napara and Tapara only.

I. Beginning of Napara:

नत्वा नारायणं देवं सर्वसम्पत्करं परम् ।
शौरिसूनु:(रि:(?)) प्रवक्ष्यामि नपरं तपरं पदम् ॥१॥

दुर्ज्ञानं दुष्परं(ठं) यत्तु सापेक्षं चोत्क्रमं तथा ।
लक्षणं क्रियते चादिपरं नाम नवं मया ॥ २ ॥

तत्परित्यज्य सव्याख्यमकारादि च पुष्कलम् ।
नारम्भणीयमेतच्च स्वत एव व्यवस्थिते(:) ॥ ३ ॥

प्रसिद्धाध्ययनात्तत्र केचित् सन्दि(ह)ते भृशम् ।
कुतो विधी(ऽवसी)यते कैश्चिन्निपुणैश्च महात्मभिः ॥ ४ ॥

निश्चितं स्वानुरूपेण लक्षणेनावसीयते ।
चादौ विकारिनोनेतः पदान्तो विषयो(ऽ)स्य सः ॥ ५ ॥

अभिधेयौ च तावेव तज्ज्ञानं च प्रयोजनम् ।
चछजेषु तवर्गीये य(श)कारेण विवर्जिते ॥ ६ ॥

चतुष्टये मकारे च लकारे (च) परे स्थिते ।
विकारिनः पदान्तो यः तकारो न परश्च यः ॥ ७ ॥

दृश्यते येषु तौ ज्ञातुं प्रवक्ष्यामि पदान्यहम् ।
नानापदत्वमिङ्ग्यानामिष्यते चात्र लक्षणे ॥ ८ ॥

ह्रस्वोपधमनिङ्ग्यं यत्तपरं नीचमेव तत् ।
नागमं च शके शं(यं)चाप्यधा(चा)रिषमथाशकम् ॥ ९ ॥

अथष्वमेनमित्येतत्पदषट्कं विधीयते ।
नकारान्तं पदं पूर्वमकारादिक्रमेण तु ॥ १० ॥

तकारान्तं ततो नेन क्रमेणैव च गृह्यते ।

॥ इति परिभाषा ॥

अमुष्मिन्नमुष्मिन्नस्मिन्ननड्वानसुरानपि ॥

अकुर्वन्नवसन्नक्रन्ननयन्नदुहंस्तदा(था) ॥ १ ॥

End of Napara:

* * * * * * * *

सामन् सुन्धान् सरस्वांश्च निषीदन्सूर्य एष सन् ।

पन्निस्सञ्जायसे स्फूर्जन्सर्वान्सर्पांश्च निश्चितः ॥

स्तेगान्सहीयान्हविष्मान्होमानिति नपद्धतिः ॥

नपरं समाप्तम् ॥

II. Beginning of Tapara:

अद्यादत्तृणदश्नीयादब्रवीद्यजुषस्ततः ।

अस्थादस्मदसच्चैवमनन्यजनदर्पयेत् ॥ १ ॥

* * * * *

End of Tapara:

इन्त्याधि(कृ)न्नपरं तान्तं पदमेवं प्रकीर्तितम् ।

यत्र क्वचन तेनैवं पूर्वं द्रष्टुमपेक्ष्य(क्ष)ते ॥

नतान्तापदमालेयं तपरंतो(नवरत्नो)त्तराक्षरा ।

सगुणं वेदविदुषां रचितं कण्ठभूषणम् ॥

Colophon: Nil.

Subject: Naparataparalakṣaṇa-two lakṣaṇas in verses, belonging to Black Yajur Veda. "These two treatises on Vedalakṣaṇa give two lists of such words as end in न् and त् respectively, as they occur in the Kṛṣṇayajur-Veda; they are given as a help to the knowledge of the Padapāṭha since these letters become changed into other letters through Sandhi*

Remarks :—The Ms. is in a fairly good condition. For the other works contained in this Ms. see the list under Remarks on No. 1804

## ॥ सप्तलक्षणम् ॥

## 1797. SAPTALAKṢAṆAM.

Burnell's Catalogue No. 12261 (j). Page 208. Right column. Substance—Palm leaf. Size—9⅝ × 1⅜ inches. Leaves—2. Lines—10 to a Page. Script—Grantha. No. of Granthas —25. Author—Śaurisūnu. Complete—Tapara only.

Beginning and end—Same as No. 1796. (section II).

Colophon :

तपरं समाप्तम् ॥

Subject : Taparalakṣaṇa belonging to Black Yajur Veda. See Subject on No. 1796.

Remarks :—The Ms. is very old and is in a decaying condition. For the other works contained in this Ms. see the list under Remarks on No. 1780

## ॥ सप्तक्षलणम् ॥

## 1798. SAPTALAKṢAṆAM.

Burnell's Catalogue No. 9076 e. Page 5. Right column. Substance— Palm leaf. Size—16 × 1⅝ inches. Leaf—1 (113 out of 121). Lines—7 to a Page. Script—Telugu. No. of Granthas—20. Author—?. Complete—Napara only.

Beginning :

अथ यजुस्संहितायां च-छ-ज-त-द-ध-न-म-ल -प-राः तचत्सानुनासिकाः पदान्ताः पद्काले न का (रा) दृश्यन्ते । अशुष्मिन्नास्मिन्नभुवन्मनञ्चानकुर्वन्नसुराननस· मनयमन्दुहन्नधुक्षन् ॥

End :

नामात्सुम्भांत्स्वूर्जन् । न निर्जोयनेन वान्यात्सही-
ष्यान् । निषीदन्निहैव गर्भस्तूर्ये एष सन् नर्वात्से गान्स्य-
ईन् हविष्मान् होमान् ॥

Colophon : Nil.

Subject : Naparalakṣaṇa consisting of a list of words that end in न्, as they occur in Kṛṣṇa Yajur Veda Padapāṭha.

Remarks :—The Ms. is old and is in good condition. The text of this Ms. is different from that given in No. 1796. For the other works contained in this Ms. see the list under Remarks on No. 1805.

## ॥ सप्तलक्षणम् ॥

## 1799. SAPTALAKṢAṆAM.

Burnell's Catalogue No. 12261 (i). Page 208. Right column. Substance—Palm leaf. Size—9⅜ × 1⅜ inches. Leaf—1. Lines—11 to a Page. Script—Grantha. No. of Granthas—20. Author—?. Complete—Napara only.

Beginning, end and subject—Same as No. 1798.

Colophon :

नपरं समाप्तम् ॥

Remarks :—The Ms. is very old and is in a decaying condition. For the other works contained in this Ms. see the list under Remarks on No. 1780.

## ॥ सप्तलक्षणम् ॥

## 1800. SAPTALAKṢAṆAM.

Burnell's Catalogue No. 9074 b. Page 5. Right column. Substance—Palm leaf. Size—12½ × 1 inches. Leaves—6

(4-9 out of 72). Lines—5 to a Page. Script—Grantha No. of Granthas—60. Author—Nārāyaṇa. Complete—Vilaṅghya only.

**Beginning:**

प्रणम्य भारतीं देवीं सर्वलोकैकमातरम् ।
नारायणः प्रवक्ष्यामि विलङ्घ्यानि पदान्यहम् ॥

एकारैकारवर्णौ यौ संहितायां विकारिणौ ।
तदन्तानि विलङ्घ्यानिइ(नी)त्युच्यन्ते वेदवित्तमैः ।
पुरातनेऽतिरिक्तं यच्चयक्तानुक्तं समाप्य च ।
(वर्ण)क्रमेण गृह्यन्ते सव्याख्यान्येव तान्यपि ॥

इङ्क्थं यत्पदमत्रापि नानापदवदिष्यते ।
निमित्तत्वेन यद्ग्राह्यं गृह्यते पदमेव तत् ॥

अपि चेत्स्वाद्धि नान्यत्तु पुरुणेतृ(पूरणेऽत्र) विधीयते ।
(इति परिभाषा) ॥

अग्रे वारे यदर्ये(ह्ये) (तिथ)येनिष्टके जरे ॥

अन एवाद्यते साह्व ईरतामवरेऽश्रुते ।
अनूच्यतेन्तरिक्षेसेमृतेवदयतेदिते ॥

End:

भवत्याहवनीये च हुते होत्रे हवामहे ।
हते हस्ते तु नेङ्क्थान्तं हरन्ते ह्वयते हुते ॥

हीयते हूयते हत्यै हन्त वै च हरामहे ।
ह्वयामहै हरे हित्यै नैभ्यस्सन्त(न्त्य)धिकान(नि) तु ॥

**Colophon:** Nil.

Subject:. Vilaṅghyalakṣaṇa. 1—49 verses. This is a treatise on black Yajurvedalakṣaṇa, dealing with changes of e (ए) and ai (ऐ) before a following vowel.

Remarks:—The Ms. is old and is in a fairly good condition. For the other works contained in this Ms. see the list under Remarks on No. 1804.

## ॥ सप्तलक्षणम् ॥

## 1801. SAPTALAKṢAṆAM.

Burnell's Catalogue No. 12,261(h). Page 208. Right column Substance—Paper. Size—9⅝ × 1⅜ inches. Leaves—4. Lines—10 to a page. Script—Grantha. No. of Granthas—60. Author—Nārāyaṇa. Vilaṅghya only.

Beginning, end and subject—Same as No. 1800.

Colophon:

विलङ्घ्यं समाप्तम्।

Remarks:—The Ms. is very old and is in a decaying condition. For the other works contained in this Ms. see the list under Remarks on No. 1780.

## ॥ सप्तलक्षणम् ॥

## 1802. SAPTALAKṢAṆAM.

Burnell's Catalogue No. 9076 d. Page 5. Right column Substance—Palm leaf. Size—16 × 1⅜ inches. Leaves—4 (110-113 out of 121). Lines—7 or 8 to a Page. Script—Telugu. No. of Granthas—40. Author—?. Vilaṅghya only.

Beginning:

अथ यजुस्संहितायामकाराकारपूर्वस्वरपरो यकारो वि-
सर्जनीयो येषु पदेषु लुप्यते तेष्वेकारैकारान्तानि पदानि
प्रवक्ष्यन्ते। अग्र क्षित्या अन्नमदितेहृदयेष्ठा अनात्मान्
ईरतामपरेन्ये जरेति विश्वदयतेमूने हिंसाया अन एवां
सेद्यतेर्केनिष्टकेतमस्या अमुष्या अक्षपता अन्तरिक्षेऽश्नुते

नामानुच्यते वरूथ्या अवारेरिष्वा अग्नेनैन्द्रपूर्वः । अग्नये न चरन्तु पूर्वः ॥

End:

नातयेसिनी वाल्येन न्यायैस्तु मएवाह्निशे नामेव ववमाने स्तुते घोस्ता मनसाग्रे सृजन्ते न पितेन्ये । नेति परः । उपसथपूर्वस्थे नोर्वन्तरिक्षं परः । हवामह(है) हन्त वै हुते हुत उपहवे हत्यै हित्यै होत्रे हवनीय ऐन्द्रऽहुते ह्वयते हुते ह(हु)ते हूयते हीयन्ते हीयते हरामहै ह्वयामहै हरै हरन्ते हस्ते अनिङ्ग्यान्तः ॥

Colophon : Nil.

Subject : Vilaṅghylakṣaṇa belonging to the black Yajurveda. This is quite different from other vilaṅghyalakṣaṇas given under Nos. 1800, 1801 & 1802 and this gives a list of words in Yajurveda ending in ए, ऐ, ओ, औ as such endings are often obscured by sandhi changes in Saṃhitā-pāṭha.

Remarks :—The Ms. is old and is in good condition. For the other works contained in this Ms. see the list under Remarks on No. 1805.

## ॥ सप्तलक्षणम् ॥

## 1803. SAPTALAKṢAṆAM.

Burnell's Catalogue No. 9076 f. Page 5. Right column.
Substance—Palm leaf. Size—16×1⅜ inches. Leaves—2 (114 & 115 out of 121). Lines—7 or 8 to a Page. Script—Telugu. No. of Granthas—52. Author—?. Complete—Vilaṅghya only.

Beginning:

तच(?) स्वरपरोनुस्वारो नकारान्ते ग्रपजेन ह रेफपरो·

नुस्वारो मकारा(?)।

आकारान्तमुदात्तान्तमाद्यपरं यत्र दृश्यते ।
त्रिक्रमं तं विजानीयान्मोक्षूणऊर्जेरोऽस्तथा ॥

अथ यजुस्संहितायां०

Same as No. 1802.

End and subject—Same as No. 1802.

Colophon: Nil.

Remarks:—The Ms. is old and is in good condition. For the other works contained in this Ms. see the list under Remarks on No. 1805. The verse given above is also found in Trikramalakṣaṇa given under No. 1769.

## ॥ सप्तलक्षणम् ॥

## 1804. SAPTALAKṢAṆAM.

Burnell's Catalogue No. 9074 a. Page 5. Right column. Substance—Palm leaf. Size—12½ × 1 inches. Leaves—4 (1-4 out of 72). Lines—5 to a Page. Script—Grantha. No. of Granthas—35. Author—?. Śamāna only.

Beginning:

अथ (यजुः)संहितायामाकारप्लुतपूर्वो घोषवद्व्यञ्जनोत्तरश्चसकारपरो विसर्जनीयो येषु पदेषु लुप्यते तानि पदानि प्रवक्ष्यामि। अवग्रहपदानामनापदत्वमसङ्ख्याने। तेषां पूर्वपदमवग्रह(इति)। ऊष्मविसर्जनीयप्रथमद्वितीया अघोषाः नः(नह)कारः। व्यञ्जनशेषो घोषवान्। गजडाद्यास्त्रयो वर्णाः दादयश्चैव बादयः। यादिवान्तो हकारश्च रासौ तावन्यसंयुतौ ॥

(इति परिभाषा ॥)

अग्निया अथर्मा अग्रा अग्रा असुरा अपूणा अजायथा ॥

End :

न प्रतिपूर्वः । स्थिराः अनवपूर्वः : सर्वाः न वै परः ।
अनूक्षु साध्याः । द्विमा होतव्या । हाया हायना हारुकाः ।
होत्राः । नदेपरः । हुताः मकारपरः ॥ हरिः ॐ ॥

Subject: Śamānalakṣaṇa—one of the Seven Lakṣaṇas of Black Yajurveda.

Remarks:—The Ms. is old and is in a fairly good condition, though some leaves are here and there broken off. This Ms. contains the following works:—

1 संहिताशमानलक्षणम् ॥
2 विलङ्घ्यलक्षणम् ॥
3 नपरतपरलक्षणम ॥
4 अवर्णिलक्षणम् ॥
5 आवर्णिलक्षणम ॥
6 आनङ्घलक्षणम् ॥
7 वेदलक्षणम (?) ॥
8 त्रिक्रमलक्षणम् ॥
9 यजुर्वेदप्रातिशाख्यम् ॥

This series of works has been printed in grantha script in the Jyotirvilāsa press in Tiruvāḍi near Tanjore.

## ॥ सप्तलक्षणम् ॥

## 1805. SAPTALAKṢAṆAM.

Burnell's Catalogue No. 9076 c. Page 5. Right column. Substance—Palm leaf. Size—16×1⅜ inches. No. of Leaves—2 (109 & 110 out of 121). Lines—7 or 8 to a Page. Script—Telugu. No. of Granthas—35. Author—?. Complete—Śamāna only.

Beginning, end and subject—Same as No. 1804.

Remarks:— See Remarks on No. 1804. The readings of this Ms. are slightly different from those in No. 1804. Compare

1 "अथ यजुः संहितायां" with "अथसंहितायां" ॥

2 "व्यञ्जनोत्तरनशकार०" with "व्यञ्जनोत्तरशकार०". ॥

| | | | |
|---|---|---|---|
| 3 | स्थिरा अनवपूर्वः । अनृक्षुसाख्या. । सर्वाः न वै परः । हिमाहोतव्या । हायाहारुका | with | स्थिरा अनवपूर्वः । सर्वा न वै परः अनृक्षुसाख्याः । हिमाहोतव्या । हायाहायना हारुकाः॥ |

The Ms. contains the following works:—

| | | | |
पितरं मातरंन्च नस्मै न दुह्येत्कतमन्च नाह । अग्निरिव कक्षं दहति वृ(ब्र)अपृष्टमनाइतं तस्मै ब्रह्म न प्रब्रूयाभ्याः(?) मानय कुर्वतेमि सं॰सिद्धिमपि गच्छेत विद्यया सह ज्ञानवान्त्व(?)म सते दद्यात्सतश्च न विमानयेदित्यथैता वेदस्याष्टाबुपनिषदो भवन्ति विविश्चोपस्तवश्च दपश्च शुद्धा च सं........॥

Colophon: Nil.

Subject: Saṃhitopaniṣad. 1-3 sections.

Remarks:—The Ms. is in a fairly good condition. This Ms. abruptly ends in the middle of the 3rd section. On the title page the following are given:

1. श्रीशिवशक्तिजू श्रीनृपवषते शर्पे सदा सहाय शुभअस्थानवास अजेगड शुभं भवतु ।

2. श्रीमत्पन्ननदक्षेत्रवासिनः क्षेत्रपालपुराभिजनस्य श्रीबालकृष्णाख्यरन्द्रगुरुशिष्यस्य श्रीमल्लिकपठशास्त्रिण इदं पुस्तकम् ।

3. There are three seals on the front page of this Ms. with the following symbols:—

a. अगस्तिश्च पुलस्त्यश्च वैशम्पायन एव च ।
जैमिनिश्च सुमन्तुश्च पञ्चैते वज्रवारणाः ॥

b. श्रीमच्चिदानन्दपरब्रह्म अक्षरअक्षरातीतमुष्य इह नृपवषतेस ।

c. निष्कळङ्कजूनृपवषते सपैस दासहाइसं १८६४.

On the side margin of every sheet is given a seal with the following symbol:—

'श्रीरामकृष्णबेनीमाधैत्यागराजमहाइ सं १८६४.'

This Ms. is dated Saṃvat 1864 or 1807 A. D.

## ॥ स्वरूपोपनिषद् ॥

## 1916. SVARŪPOPANIṢAD.

S. S. Collection No. 12. Substance—Paper. Size—10¾×5 inches. Sheets—3. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—26. Complete.

Beginning:

श्रीगणेशाय नमः ॥

अहमेव परं ब्रह्म वासुदेवाख्यमव्ययम् ।
इति स्यान्निश्चितो मुक्तो बद्ध(द्ध) एवान्यथा भवेत् ॥ १ ॥

अहमेव परं ब्रह्म न चाहं ब्रह्मणः पृथक् ।
इत्येवं समुपासीत ब्राह्मणो ब्रह्मणि स्थितः ॥ २ ॥

अहमेव परं ब्रह्म निश्चितं च तां चं तं ता(?) ।
चिद्रूपत्वादसङ्गत्वादबाधत्वात्प्रयत्नतः ॥ ३ ॥

End :

सदा साक्षी स्वरूपत्वाच्छिव एवास्मि केवलम् ।
मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ॥ २३ ॥

मयि सर्वं लयं याति तद्ब्र(ह्मा)स्म्यद्वयोऽस्म्यहम् ।
अयं प्रपञ्चो मिथ्यैव सत्यं ब्रह्माहमव्ययम् ॥ २४ ॥

तत्र प्रमाणं वेदान्ता अनुभवो गुरवस्तथा ।
ब्रह्मैवाहं न संसारी न चाहं ब्रह्मणः पृथक् ॥ २५ ॥

नाहं देहो न मे देहः केवलोऽहं सनातनः ।

तथा हि श्रुत्यन्तरेपि ।

एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किञ्चन ॥ २६ ॥

Colophon:

इत्याथर्वणवेदस्वरूपोपनिषत ॥

Subject : Svarūpopaniṣad, giving out the oneness of the soul and other chief doctrines of Advaita Philosophy.

Remarks—The Ms. is in a fairly good condition. After the colophon the following extract from Upaniṣads is given:

यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसं-
विशन्तीति श्रुतेः ॥ २८ ॥ इदं सर्वं यदयमात्मा आत्मैवेदं सर्वं
ब्रह्मैवेदं । सर्वं पुरुष एवेदं सत्रं सर्वं खल्विदं ब्रह्म । वासुदेवः
सर्वमिति नारायणः सर्वमिदं पुराण इत्यादिश्रुतेः ॥ २८ ॥
देवात्मशक्तिं स्वगुणैर्निगूढामित्यादि श्रुतेः ॥ ३ ॥ माया चाविद्या च
स्वयमेव भवतीति श्रुतेः ॥ ४ ॥

---

## ॥ शान्तिपाठः ॥

## 1917. ŚĀNTIPĀṬHAḤ.

J. L. Collection No. 177. Substance—Paper. Size—7¾ × 2¾ inches. Sheets—2. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—25. Complete.

Beginning:

ॐ गणपतये नमः ।

शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न
इन्द्रो बृहस्पतिः ।

End:

ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥
अतिकल्याणरूपत्वान्नित्यकल्याणसंश्रयात् ।
स्मर्तृणां वरदत्वाच्च ब्रह्म तन्मङ्गलं परम् ॥

ॐ प्रथ । ॐ प्रथ ॥ ॐ ॥

Colophon : Nil.

Subject :—Śāntipāṭha used in śāntikarmas. This Ms. contains the following sections:--

१ शं नो मित्र । २ । सह नाववतु । ३ । यश्छन्दसां । ४ । अहं वृक्षस्य । ५ । भद्रं नो अपि वातय । ६ । भद्रं कर्णेभिः । ७ । पूर्णमदः । ८ । भूमिमुपस्पृशेत् । ९ । आप्यायन्तु ॥

Remarks: —The Ms. is in a fairly good condition.

## ॥ निरालम्बोपनिषद्भाष्यम् ॥

## 1918. NIRĀLAMBOPANIṢAD BHĀṢYAM.

T. S. Collection No. 1135.

Substance—Paper. Size—8×4 inches. Sheets—2 (3 & 4). Lines —8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—20. Author—(?). A Fragment only.

Beginning :

........लानुसन्धानं यत्तदक्रमं । ब्रह्म सत्यं जगन्मि-
थ्येत्यपरोक्षात् क्षीणब्रह्माद्यैश्वर्याशासङ्कल्पबीजसन्तापस्तपः ॥

End :

ब्राह्मण इति ब्रह्मवित्सर्व एव ब्राह्मण इति । निराल-
म्बोपनिषदं योऽधीते स ब्रह्म भूत्वा न पुनरावर्तते न
पुनरावर्ततेत्युपनिषत् ॥

साम्बसदाशिवार्पणमस्तु ॥

यत्रैतन्मम(?) नुस्यूतं जाग्रत्स्वप्नसुषुप्तिषु ।
'तदेव त्वम्परं तत्वमितो नास्त्यधिकं परम् ॥

ॐ तत्सत् ॥

Colophon :

इति निरालम्बोपनिष(द्भाष्यम् ॥)

Subject : Nirālambopaniṣad bhāṣya—according to the Advaita school of Philosophy.

Remarks :—The Ms. is in a fairly good condition.

## ॥ माण्डूक्यकारिकाभाष्यम् ॥

## 1919. MĀṆḌŪKYAKĀRIKĀBHĀṢYAM.

Burnell's Catalogue No. 6500 a. Page 88. Right column. Substance—Paper. Size —11¾×4 inches. Sheets—14. Lines —12 to a Page. Script—Devanāgarī. No of Granthas—500. Author—Śaṅkarācārya. First and second Prakaraṇas only.

Beginning—Same as No. 1547.

End and colophon—Same as No. 1920.

Subject : Māṇḍūkya Kārikā Bhāṣya—First and Second Prakaraṇas.

Remarks :—The Ms. is in good condition. On the title page is given:

'हे पुस्तक श्रीमन्त राजेश्री शरभोजीमहाराजसहेबयांच्या कारकतींत काशीदेशाहून खरीदीकरून आणिलें असें ।'

i.e., this Ms. has been brought to Tanjore from Benares with the benevolent patronage and help of King Serfoji II. who reigned between 1800-1832 A. D.

## ॥ माण्डूक्यकारिकाभाष्यम् ॥

## 1920. MĀṆḌŪKYAKĀRIKĀBHĀṢYAM.

Burnell's Catalogue No. 6314. Page 88. Right column. Substance—Paper. Size—9¼×4½ inches. Sheets—11.

Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—220. Author—Śaṅkarācārya. Second Prakaraṇa only.

Beginning—Same as No. 1551.

End:

तत्त्वमाध्यात्मिकं दृष्ट्वा तत्त्वं दृष्ट्वा तु बाह्यतः ।
तत्त्वीभूतस्तदारामस्तत्त्वादप्रच्युतो भवेत् ॥

बाह्यं पृथिव्यादि तत्त्वमाध्यात्मिकं च देहादिलक्षणं रज्जुसर्पादिवत्स्वप्नमायादिवच्च असत् * * * न तथा आत्मविद्भवेत्, आत्मन एकरूपत्वात्, स्वरूपप्रच्यवनासम्भवाच्च। सदैव ब्रह्मास्मीत्यप्रच्युतो भवेत्तत्वात् सदा अप्रच्युतात्मतत्त्वदर्शनो भवेदित्यभिप्रायः, 'शुनि चैव श्वपाके च, समं सर्वेषु भूतेषु' इत्यादिस्मृतेः ॥

Colophon:

इति श्रीगोविन्दभगवत्पूज्यपाद+वैतथ्याख्यं द्वितीयं प्रकरणं समाप्तम् ॥

Subject: Māṇḍūkyakārikā bhāṣya—Second Prakaraṇa only.

Remarks:—The Ms. is in a fairly good condition. On the title page is given—'तुलजाराजस्येदं पुस्तकम्' i.e., this Ms. belonged to Tulajā Mahārāja of Tanjore who reigned between 1765-1787 A. D. Regarding the contents and the author of this Ms. Dr. Burnell observes the following on page 88 of his Catalogue:—"गौडपादीयभाष्यम्" (Gauḍapādīya, or Āgama śāstra Vivaraṇa) by Śaṅkarācārya, in 4 prakaraṇas, of which the first is a commentary on the Maṇḍūkyopaniṣad, and has been edited by Dr. Roer. The whole forms a summary of Vedānta doctrine, and consists of (a) Ślokas (184) which the author of the commentary (Ānandagiri) says Śaṅkarācārya learned from Gauḍapāda (the teacher of his teacher, Govinda), and (b)

prose consisting of Śaṅkarācārya's elucidations. The several chapters contain mystical explanations of a, u, m and om."

## ॥ माण्डूक्यकारिकाभाष्यम् ॥

## 1921. MĀṆḌŪKYAKĀRIKĀBHĀṢYAM.

Burnell's Catalogue No. 6469. Page 88. Right column.
Substance—Paper. Size—$9\frac{1}{4} \times 4\frac{1}{2}$ inches. Sheets—49. Lines—10 to a page. Script—Devanāgarī. No. of Granthas—1000. Author—Śaṅkarācārya. Third and fourth Prakaraṇas only.

Beginning :

उपासनाश्रितो धर्मो जाते ब्रह्मणि वर्तते ।
प्रागुत्पत्तेरजं सर्वं तेनासौ कृपणः स्मृतः ॥

ओङ्कारनिर्णये उक्तः प्रपञ्चोपशमः शिवोऽद्वैत आत्मेति प्रतिज्ञामात्रेण, ज्ञाते द्वैतं न विद्यत इति च । तत्र द्वैताभावो वैतथ्यप्रकरणेन स्वप्नमायागन्धर्वनगरादिदृष्टान्तैः दृश्यत्वाद्यन्तवत्त्वादिहेतुभिस्तर्केण प्रतिपादितः । अद्वैतं किमागममात्रेण प्रतिपत्तव्यं आहोस्वित्तर्केणापीत्यत आह—शक्यते तर्केणापि ज्ञातुं तत्कथमित्यद्वैतप्रकरणमारभ्यते ।

End and colophon—Same as No. 1551.

Subject: Māṇḍūkyakārikā bhāṣya—Third and Fourth Prakaraṇas.

Remarks:—The Ms. is in a fairly good condition. On the title page is given 'पुस्तकमिदं तुलजा भोसल्याचे'—i.e., the Ms. belonged to Tulajā Mahārājā of Tanjore between 1765-87 A. D.

## ॥ माण्डूक्यकारिकाभाष्यम् ॥

## 1922. MĀṆḌŪKYAKĀRIKĀBHĀṢYAM.

Burnell's Catalogue No. 6500 b. Page 88. Right column.

Substance—Paper. Size—11¾×4 inches. Sheets—8. Lines—14 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Śaṅkarācārya. Third prakaraṇa only.

Beginning—Same as No 1921.

End :

न कश्चिज्जायते जीवः सम्भवोऽस्य न विद्यते ।
एतत्तदुत्तमं सत्यं यत्र किञ्चिन्न जायते ॥

सर्वोऽप्ययं मनोनिग्रहादिः मृल्लोहादिवत्सृष्टिरुपासना च उक्ता परमार्थस्वरूपप्रतिपत्त्युपायत्वेन, न परमार्थसत्येति ।

* * *

यस्मान्न विद्यतेऽस्य कारणम् तस्मान्न कश्चिज्जायते जीव इत्येतत् । पूर्वेषूपायत्वेनोक्तानां सत्यानां एतदुत्तमं सत्यं यस्मिन् सत्यस्वरूपे ब्रह्मण्यणुमात्रं अपि किञ्चिन्न जायत इति ॥

Colophon :

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य
श्रीमच्छङ्करभगवतः कृतौ आगमशास्त्रविवरणे अद्वैताख्यं
तृतीयं प्रकरणं समाप्तम ॥

Subject : Māṇḍūkya Kārikābhāṣya—Third Prakaraṇa only.

Remarks :—The Ms. is in a fairly good condition.

## ॥ माण्डूक्यकारिकाभाष्यम् ॥

## 1923. MĀṆḌŪKYAKĀRIKĀBHĀṢYAM.

Burnell's Catalogue. No. 6500 c. Page 88. Right column.

Substance—Paper. Size—11¾×4 inches. Sheets—10. Lines—14 to a Page. Script—Devanāgarī. No. of Granthas—400. Author—Śaṅkarācārya. Fourth Prakaraṇa only.

Beginning :

ज्ञानेनाकाशकल्पेन धर्मान्यो गगनोपमान् ।
ज्ञेयाभिन्नेन सम्बुद्धस्तं वन्दे द्विपदां वरम् ॥

ओङ्कारनिर्णयद्वारेणागमतः प्रतिज्ञातस्याद्वैतस्य ब्रह्मविषयभेदवैतथ्याच्च सिद्धस्य पुनरद्वैतशास्त्रयुक्तिभ्यां साक्षान्निर्धारितस्यैतदुत्तमं सत्यमित्युपसंहारः कृतोऽन्ते । तस्यैतस्यागमार्थस्य अद्वैतदर्शनस्य प्रतिपक्षभूता द्वैतिनो वैनाशिकाश्च । तेषामन्योन्यविरोधात् रागद्वेषादिक्लेशास्पदं दर्शनं इति मिथ्यादर्शनत्वं सूचितम् । क्लेशानास्पदत्वात्सम्यग्दर्शनमित्यद्वैतदर्शनं स्तूयते ॥

End and colophon—Same as No. 1551.

Subject: Māṇḍūkya Kārikābhāṣya—Fourth Prakaraṇa only.

Remarks :—The Ms. is in good condition.

## ॥ माण्डूक्यकारिकाभाष्यम् ॥

## 1924. MĀṆḌŪKYAKĀRIKĀBHĀṢYAM.

Burnell's Catalogue No. 9637. Page 83. Right column. Substance—Palm leaf. Size— 17¾×1½ inches. Leaves—48 (87-127). Lines—9 to a Page. Script—Grantha. No. of Granthas—1800. Author—Śaṅkarācārya. Complete.

Beginning—Same as No. 1547.

End—Same as No. 1551.

Colophon :—Same as No. 1551.

इदं पुस्तकं रामचन्द्रशर्मणा लिखितम् ॥

बिन्दुदुर्लिपि+सज्जनाः ॥

Subject: Māṇḍūkyopaniṣad Kārikābhāṣya. 1—4 Prakaraṇas.

Remarks:—The Ms. is in a fairly good condition. The scribe of this Ms. is one Rāmacandra Śarman.

---

## ॥ माण्डूक्यकारिकाभाष्यम् ॥

## 1925. MĀṆḌŪKYAKĀRIKĀBHĀṢYAM.

Burnell's Catalogue No. 9638 (a).

Substance—Palm leaf. Size—18¼×1½ inches. Leaves—47 (1-47). Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—3500. Author—Śaṅkarācārya. Complete.

Beginning, end, colophon and subject—Same as No. 1924.

Remarks:—The Ms. is in a fairly good condition. The other work contained in this Ms. is Ānandagiri's Māṇḍūkya Kārikābhāṣyaṭīkā. The Māṇḍūkyakārikābhāṣya described above is not, however, noticed by Dr. Burnell under this Ms.

---

## ॥ माण्डूक्यकारिकाभाष्यटीका ॥

## 1926. MĀṆḌŪKYAKĀRIKĀBHĀṢYAṬĪKĀ.

Burnell's Catalogue No. 6241 a. Page 88. Right column.

Substance—Paper. Size—11¾×4 inches. Sheets—22. Lines—13 or 14 to a Page. Script—Devanāgarī. No. of Granthas—1000. Author—Ānandajñāna (Ānandagiri). First Prakaraṇa only.

Beginning:

श्रीः ॥

सच्चित्सुखस्वरूपाय संसाराङ्कुरहेतवे ।
कृष्णाय विष्णुरूपाय नमः श्रीनायकाय ते ॥ १ ॥
परिपूर्णपरिज्ञानपरितृप्तिमते सते ।

विष्णवे जिष्णवे तस्मै कृष्णनामवते नमः ॥ १ ॥

शुद्धानन्दपदाम्भोजद्वन्द्वमद्वन्द्वतास्पदम् ।
नमस्कुर्वे पुरस्कर्तुं तत्वज्ञानमहोदयम् ॥ २ ॥

गौडपादीयभाष्यं हि प्रसन्नमिव लक्ष्यते ।
तदर्थतोऽतिगम्भीरं व्याकरिष्ये स्वशक्तितः ॥ ३ ॥

पूर्वे यद्यपि विद्वांसो व्याख्यानमिह चक्रिरे ।
तथापि मन्दबुद्धीनामुपकाराय यत्यते ॥ ४ ॥

श्रीगौडपादाचार्यस्य नारायणप्रसादतः प्रतिपन्नान्मा-ण्डूक्योपनिषदर्थाविष्करणपरानपि श्लोकानाचार्यप्रणीता-न्व्याचिख्यासुर्भगवान्भाष्यकारश्चिकीर्षितस्य भाष्यस्या-विघ्नपरिसमाप्त्यादिसिद्धये परदेवतातत्वानुस्मरणपूर्वकं त-न्नमस्कारपूर्वकं(रूपं) मङ्गलाचरणं शिष्टाचारप्रमाणकं मुख-तः समाचरन्नर्थादपेक्षितमभिधेयाद्यनुबन्धमपि सूचयति—प्रज्ञानेत्यादिना ॥

End :

ननु यथोक्तप्रणवपरिज्ञानरहितस्यापि शास्त्रपरिज्ञान-वत्वान्न जन्मोपलक्षितसंसारभाक्त्वेन पुरुषार्थसिद्धिः । नैवं । शास्त्रविदोऽपि तत्वज्ञानाभावे मुख्यपुरुषार्थासिद्धि-रित्यभिप्रेत्याह—नेतर इति । तदेवं प्रणवद्वारेण निरुपा-धिकमात्मानमनुसन्दधानस्य पुरुषार्थपरिसमाप्तिर्नेतरेषां बहिर्मुखानामिति स्थितम् ॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यशुद्धानन्दपूज्यपादशिष्यभग-वदानन्दज्ञानविरचितायां गौडपादभाष्यटीकायां
प्रथमं प्रकरणं समाप्तम् ॥

Subject : Māṇḍūkyakārikābhāṣyaṭīkā—a commentary on the first (Āgama) Prakaraṇa of the Māṇḍūkyakārikābhāṣya, according to the Advaita school of philosophy.

Remarks :—The Ms. is in good condition. The first śloka given in the beginning might be the scribe's own.

## ॥ माण्डूक्यकारिकाभाष्यटीका ॥

## 1927. MĀṆḌŪKYAKĀRIKĀBHĀṢYAṬĪKĀ.

Burnell's Catalogue No. 6244 b. Page 88. Right column. Substance—Paper. Size—11¾×4 inches. Sheets—12. Lines—13 or 14 to a Page. Script—Devanāgarī. No. of Granthas—650. Author—Ānandajñāna (Ānandagiri). Second Prakaraṇa only.

Beginning:

सृष्टिस्थितिप्रलयकारणमादिदेवं
विश्वेश्वरं विगतकल्मषमम्बुजाभम् ।
सच्चित्सुखं डमरुशूलधरं गुरुं त्वां
भूयो नमामि सकुमारपतिं पशूनाम् ॥

आगमप्राधान्येनाद्वैतं प्रतिपादयता तत्प्रत्यनीकस्य द्वैतस्य मिथ्यात्वमर्थादुक्तम् । इदानीं तन्मिथ्यात्वमुपपत्तिप्राधान्येनापि प्रतिपत्तुं शक्यमिति दर्शयितुं प्रकरणान्तरमवतारयन्नादौ दृष्टान्तसिद्ध्यर्थं तस्मिन्वृद्धसम्मतिमाह—वैतथ्यमिति ॥

End:

स्वरूपाप्रच्यवने च स्मृतिं दर्शयति— समम् इति । तत्र हि विनश्यत्स्वविनश्यन्तमिति स्वरूपाप्रच्यवनमुक्तम् ॥ ३८ ॥

**Colophon:**

इति श्रीशुद्धानन्द + भाष्यटीकायां द्वितियं प्रकरणम् ॥

Subject: Māṇḍūkyakārikābhāṣyaṭīkā— a commentary on the second Prakaraṇa of the Māṇḍūkyakārikābhāṣya, according to the Advaita school of philosophy.

Remarks:—The Ms. is in good condition. The first śloka given in the beginning might be the scribe's own.

## ॥ माण्डूक्यकारिकाभाष्यटीका ॥

## 1928. MĀṆḌŪKYAKĀRIKĀBHĀṢYAṬĪKĀ.

Burnell's Catalogue No. 6244 c. Page 88. Right column. Substance—Paper. Size—11¾ × 4 inches. Sheets—14. Lines—13 to 15 to a Page. Script—Devanāgarī. No. of Granthas—770. Author—Ānandajñāna (Ānandagiri). Third Prakaraṇa only.

Beginning:

कृष्णं विष्णुस्वरूपेण सत्यमानन्दचिद्घनम् ।
जाग्रद्ग्रामादिरहितं मायया कारणम्परम् ॥ १ ॥
धामादिकृतभोगेन सदासङ्गं निरन्तरं ।
नमामि देवदेवेशं कारकादिविवर्जितम् ॥ २ ॥

तर्कावष्टम्भेन द्वैतवैतथ्यनिरूपणं परिसमाप्याद्वैतमार्थिकमपि तर्कतः सम्भावयितुं प्रकरणान्तरं प्रारीप्सुरुपास्योपासक(भेद)दृष्टिं तावदपवदति— उपासनेति ॥

End:

तदेव स्पष्टयति— कर्तेति । स्वभावतोऽजत्वं हेतूकर्तव्यं । तत्रैव हेत्वन्तरमाह—अत इति । हेत्वन्तरमेव स्पष्टयति— यस्मादिति । उत्तरार्धं व्याचष्टे —पूर्वेष्विति । पूर्वेषु ग्रन्थे·

ष्विति शेषः। इतिशब्दोऽद्वैतप्रकरणपरिसमाप्तिं द्योत-
यति ॥

Colophon :

इति श्रीमत्परमहंस + तृतीयं प्रकरणं अद्वैताख्यम् ॥

Subject: Māṇḍūkyakārikābhāṣyaṭīkā—a commentary on the Māṇḍūkyakārikābhāṣya according to the Advaita school of philosophy. This Ms. contains commentary on the bhāṣya on the third—Advaita—prakaraṇa only.

Remarks :—The Ms. is in good condition. The first two verses given in the beginning might be the scribe's own.

## ॥ माण्डूक्यकारिकाभाष्यटीका ॥

## 1929. MĀṆḌŪKYAKĀRIKĀBHĀṢYAṬĪKĀ.

Burnell's Catalogue No. 6244 d. Page 88. Right column. Substance—Paper. Size—11¾×4 inches. Sheets —18. Lines—14 or 15 to a Page. Script—Devanāgarī. No. of Granthas—935. Author—Ānandajñāna(Ānandagiri). Fourth prakaraṇa only.

Beginning :

श्रीरस्तु। मङ्गलानि भवन्तु ॥

जयतु श्रीमहागणनायकः ॥

आद्यन्तमध्यमङ्गलाः ग्रन्थाः प्रचारिणो भवन्तीत्यभि-
प्रेत्यादावोङ्कारोच्चारणवदन्ते परदेवताप्रणामवन्मध्येपि पर-
देवतारूपमुपदेष्टारं प्रणमति— ज्ञानेति ॥ पूर्वोत्तरप्रक-
रणसम्बन्धसिध्यर्थं पूर्वप्रकरणत्रये वृत्तमर्थं क्रमादनुद्रवति—
ॐकारेति। अद्वैत इत्यद्वैतोपलक्षितं तृतीयं प्रकरणमुच्यते।

चतुर्थं प्रकरणमवतारयितुमुपयुक्तमर्थान्तरमनुवदति — तस्येति ॥

End:

यस्मादमोघा सफला श्रवणादीनां प्राप्तिस्तस्मादभ्यत्वं तस्यां सम्भाव्यते तदेवमाचार्यप्रसादादात्मनोऽन्येषां च बहूनां पुरुषार्थे परिसमाप्तिसम्भवादाचार्यपरिचरणं पुरुषार्थकामैराचरणीयमित्यर्थः ॥

विष्णुं कृष्णं स्वमायाविरचितविविधद्वैतवर्गं निसर्गा-
दुद्योतानर्थसार्थं निरवधिमधुरं सच्चिदेकस्वभावम् ।
आम्नायाऽऽत्मानमेकं विधिमुखविमुखं नेति नेतीति गीतं
वन्दे वाचां वियाच्चापरमपि जगतामास्पदं कल्पितानाम् ॥

गौडपादीयभाष्यस्य व्याख्या व्याख्यातृसम्मता ।
सम्मिता निर्मिता सेयमर्पिता पुरुषोत्तमे ॥ २ ॥

Colophon :

गौडपादीयभाष्यस्य व्याख्याऽऽनन्दगिरी परा ।
बालकृष्णेन्द्रमुनिना लिखिता शिवतुष्टये ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य + चतुर्थं प्रकरणं समाप्तम्
समाप्तश्चायं ग्रन्थः ॥

श्रीरामविश्वेश्वरमाधवानां प्रणाममुक्त्वा खलु कर्मपाशात् ।
निसर्गसम्पादितशुद्धबुद्धिरहं स्वरूपेण व्यवस्थितोऽस्मि ॥ १ ॥

Subject: Māṇḍūkyakārikābhāṣyaṭīkā—a commentary on the Māṇḍūkyakārikābhāṣya, according to the Advaita school of philosiphy. This Ms. contains the ṭīkā on the bhāṣya on the fourth—Alātaśalya—prakaraṇa only.

Remarks:—The Ms. is in good condition. The scribe's name is

Bālakṛṣṇendramuni. On the title page the following is given in Mahrathi tongue:—

हे पुस्तकश्रीमन्तराजेश्रीशरभोजिमहाराजसाहेबयांच्या कारकर्तीत काशीदेशाहून खरीदिकरून आणिलें असें ॥'

i. e. this Ms. has been brought to Tanjore from Benares with the benevolent partonage and help of King Serfoji II, between 1800—1832 A. D.

## ॥ माण्डूक्यकारिकाभाष्यटीका ॥

## 1930. MĀṆḌŪKYAKĀRIKĀBHĀṢYAṬĪKĀ.

Burnell's Catalogue No. 9638 b. Page 88. Right column. Substance—Palm leaf. Size—18¼ × 1½ inches. Leaves—71 (47-117). Lines —7 to a Page. Script—Devanāgarī. No. of Granthas—2455. Author—Ānandajñāna (Ānandagiri). Complete.

Beginning—Same as No. 1926.

End and colophon—Same as No. 1929.

Subject: Māṇḍūkyakārikābhāṣyaṭīkā— a commentary on the Māṇḍūkyakārikābhāṣya. 1—4 Prakaraṇas.

Remarks:—The Ms. is in a fairly good condition. The other work contained in this Ms. is Māṇḍūkyakārikābhāṣya. Dr. Burnell observes that this Ms. is written about 1700 and it differs greatly from Nos. 6244 (1926, 1927, 1928 & 1929).

## ॥ अनुभूतिप्रकाशः ॥

## 1931. ANUBHŪTIPRAKĀŚAḤ.

Burnell's Catalogue No. 9751. Page 36. Right column. Substance—Palm leaf. Size—17¾ × 1½ inches. Leaves—141. Lines—6 to a Page. Script—Grantha. No. of Granthas—300. Author—Vidyāraṇyasvāmin. Complete.

Beginning :

ॐ ऐतरेयेण सम्प्रोक्ता द्वितीयारण्यकान्तगा ।
ब्रह्मविद्याऽत्र विस्पष्टं बालबोधाय वर्ण्यते ॥

आत्मैव सृष्टो(ष्टेः) प्रागासीन्नामरूपविवर्जितः ।
सोऽप्येक एव नान्योऽस्ति जडश्चान्यश्च विद्यते ॥

'मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम् ।'
इति शूद्रक्य(श्रुत्य)न्तरप्रोक्ता माया नान्या नृत्यतः(?) ॥

निस्तत्त्वं व्यवहारार्हमनृतं बालयक्षवत् ।
बालो यक्षं प्रकल्प्यास्माद्बिभेति व्याघ्रतो यथा ॥

वस्तुतत्वं जडं किञ्चिन्नान्यदस्त्यात्मवस्तुनः ।
अद्वया(या)नन्दरूपात्मा तदा सुप्ताविव स्थिता ॥

End :

ससाधनाया विद्याया सम्पूर्णत्वादयं नृपः ॥
स्वदेहसहितं राज्यं गुरवेऽस्मै न्यवेदयत् ॥

आख्यायिकां परित्यज्य श्रुतिरस्मदनुग्रहात् ।
सगुणं निर्गुणं ब्रह्म संक्षिप्योचे स्म वा इति ॥

पूजास्वीकारदातृत्वगुणयुक्तं महेश्वरम् ।
य उपास्ते पुमानेष यथेदं लभते धनम् ॥

विद्वद्दृष्ट्या स एवात्मा जरामरणवर्जितः ।
आनन्दो भयहीनश्च ब्रह्मैवातो न चेतरः ॥

य एवं ब्रह्म जानाति तद्ब्रह्मैव भवत्यसौ ।
हिशब्दोऽशेषवेदान्तप्रसिद्धं सूचयेदिति ॥

Colophon :

इत्यनुभूतिप्रकाशे जनकविद्याख्या(ख्य) एकादशोऽध्यायः ॥

श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥ शुभमस्तु ॥

श्रीगोपालस्वामि(मी) सहायं(यः) ॥

Subject: Anubhūtiprakāśa—A metrical version of 10 important Upaniṣads. 1-11 Adhyāyas.

Remarks:—The Ms. is in a very good condition. Regarding this Ms., Dr. Burnell observes the following:— The Ms. is "recent. It contains:

| | | |
|---|---|---|
| a. | ऐतरेयवार्तिकम् | (LL. 1-8). |
| b. | तैत्तिरीयवार्तिकम | ( „ 8-17). |
| c. | छान्दोग्यवार्तिकम्—3 Sections | ( „ 17-41). |
| d. | प्रश्नोपनिषद्वार्तिकम् | ( „ 41-46,b). |
| e. | कौषीतकिवार्तिकम् | (LL. 46,b-56). This has been edi-teb dy Prof. Cowell in his edition of the Upaniṣad (pp. 175-190) in the Bibliotheca Indica. |
| f. | मैत्रायणीयवार्तिकम् | (LL. 56-63, b). |
| g. | कठवल्लीवार्तिकम् | ( „ 63,b-70). |
| h. | श्वेताश्वतरोपनिषद्वार्तिकम् | ( „ 70-76,b). |
| i. | बृहदारण्यकोपनिषद्वार्तिकम् | ( „ 76,b-98). |
| j | मैत्रेयीब्राह्मणवार्तिकम् | (LL. 98-141). |

(The Ms.) ends with a xi. जनकविद्या".

---

## ॥ उपनिषन्मङ्गलाभरणम् ॥

## 1932. UPANIṢANMAṄGALĀBHARAṆAM.

Dr. Burnell's Catalogue No. 6325. Page 36. Right column. Substance—Paper. Size—13×5 inches. Sheets—208. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—6210. Author—?. Complete.

Beginning:

श्रीगुरुभ्यो नमः ॥

........................स्वरूपिणे ।
श्रीभूपार्षदयुक्ताय नृसिंहार्यैव मे नतिः ॥

अथ षष्ठी कला (कठ)वल्ली ॥

यतिमुख्यास्त्वविकृतो ब्रह्मानन्तं वरान्तरम् ।
वर्षयोस्थं(?) तत्तथात्रिस्स...धा हेतुसाध्यता ॥

उशन् ह वा इत्यादि ॥ उशन् वश कान्तौ अस्माच्छतरि ग्राहिज्यादिना सम्प्रसारणम् । अतितेजस्वी वाजश्रवसो नाम ऋषिः । यज्ञे सर्ववेदसं सर्वस्वदक्षिणां ददौ । तस्यास्य यज्वनो दक्षिणां ददतीति ता नचिकेता इति नाम प्रसिद्धः पुत्र आस बभूव ॥

End:

अशेषविकृतिपरित्यागपूर्वं तदुचितात्रियोग्गुपादानेन च प्रकृत्या अशेषजगत्कृतिभूतशब्दब्रह्मश्रीमातृकया षट्त्रिंशादिमातृकया यथासामर्थ्यमुपास्यमानया सिद्धो भवति सद्गुरुमतां सिद्धानां च प्रकृतिपरिज्ञानं सिद्धं आद्यचिरुपनिषत्समाप्ता(प्तौ) ॥

Colophon:

द्वादशखण्डः ॥ द्वादशमाह्निकम् ॥
इति श्रीमदुपनिषन्मङ्गलाभरणे षोडशकले
षोडशी तुर्योपनिषत्कला समाप्ता ॥
समाप्तमिदं श्रीमदुपनिषन्मङ्गलाभरणम् ॥

Subject: Upaniṣanmaṅgalābharaṇa — a commentary on 18 Upaniṣads. 6-10 and 13-16 Kalās.

Remarks:—The Ms. is in a fairly good condition. This work contains commentaries on the following Upaniṣads:—

॥...............कला ? ॥

| | | |
|---|---|---|
| 1 कठवल्ल्युपनिषद् 1-6 Vallis | Kalā | 6 |
| 2 प्रश्नोपनिषद् 1-6 Praśnas | ,, | 7 |
| 3 सुबालोपनिषद् 1-8 Anuśāsanas | ,, | 8 |
| 4 प्रतर्दनोपनिषद् (कौषीतक्युपनिषद्– 3rd Adhyāya.) | ,, | 9 |
| 5 बार्हद्रथोपनिषद् (मैत्रायण्युपनिषद् – 1-3 Prapāthakas) | ,, | 10 |
| 6 तैत्तिरीयोपनिषद् (a. पूर्वविद्या 1-3 Praśnas b. मन्त्रोपनिषद् 4th Praśna) | ,, | 13 |

॥ सन्यासकला ॥

| | | |
|---|---|---|
| 7 भिक्षुकोपनिषद् | ,, | 14 ? |
| 8 आरुणिकोपनिषद् | ,, | ,, |

॥ प्रकीर्णकला ॥

| | | |
|---|---|---|
| 9 अथर्वशिर उपनिषद् | ,, | 15 (6th) |
| 10 कालाग्निरुद्रोपनिषद् | ,, | ,, (7th) |
| 11 नारायणोपनिषद् | ,, | ,, (8th) |
| 12 कौषीतक्युपनिषद् | ,, | ,, (9th) |
| 13 परब्रह्मोपनिषद् | ,, | ,, (10th) |
| 14 शारीरोपनिषद् | ,, | ,, (11th) |

15 गर्भोपनिषद् ,, ,, (12th)

16 नादोपनिषद् ,, ,, (13th)

17 योगशिखोपनिषद् ,, ,, (14th)

॥ तुरीया कला ॥

18 षोडशी तुर्योपनिषद् ,, 16th

1-12 Āhnikas

In this Ms. the Upaniṣads are grouped into 16 Kalās of which the first five, 11th, 12th, and the first Upaniṣads of the fifteenth kalā are wanting. A transcribed copy of the Ms. in paper is also available in this Library. See Transcript Volume No. 447, the date of copying being 16th December 1926. Ref. T. V. 447 (23). The other work contained herein is नादोपनिषद्. After the colophon the following is given :—

श्रीमदाचार्यराजाय श्रीनृसिंहाय नमः ॥

ब्रह्मैवात्मा विश्वकर्ता तु येषा-

मन्तश्चित्ते मङ्गलब्रह्ममूर्तिः ।

गायत्र्यम्बा वाचिकाराच(?)चिह्नं

ब्राह्मं तेभ्यो ब्राह्मणेभ्यो नमोऽस्तु ॥

अम्बामधीत्य सषडङ्गपदक्रमार्थ-

ब्रह्मात्मिकां मनुमुखस्मृतिभूषणाञ्च ।

ब्राह्मण्यमर्थवदथापि जयन्तु तेऽमी

तान् ब्राह्मणांस्तु सततं प्रणमामि मूर्ध्ना ॥

* * * * * *

दैवं ब्रह्म ब्रह्मविद्यैव विद्या

ब्रह्माचार्यो माधवो देशिकेन्द्रः ।

ब्राह्मो लोकश्चेति येस्तु प्रपन्नः

सेवे साक्षात् ब्राह्मणांस्तान् प्रपन्नान् ॥

इति श्रीमत्प्रपन्नप्रपदनकला समाप्ता ॥

॥ छन्दः ॥

## 1933. CHANDAH.

J. L. Collection No. 178. Substance—Paper. Size—8×4 inches. Sheets — 6. Lines—9 to a page. Script—Devanāgarī. No. of Granthas—90. Author—Piṅgalanāga. Complete.

Beginning, end and subject—Same as No. 1687.

Colophon :

इत्यष्टमोऽध्यायः । छन्दः समाप्तः(म्) ॥

साम्बसदाशिवार्पणमस्तु ॥

शालीवाहनशके १७५२ ज्येष्ठवद्यप्रतिपत्तिथौ सौम्यवासरे इदं पुस्तकं

वृकोपनाम्ना महादेवेन लिखितम् ।

आर्जितं भूरि कष्टेन पुस्तकं लिखितं मया ।

हर्तुमिच्छति यः पापी तस्य वंशक्षयो भवेत् ॥

श्रीलक्ष्मीनृसिंहार्पणमस्तु ॥

Remarks —The Ms. is in a fairly good condition. The Ms. is dated Śālivāhana Śaka 1752 or 1830 A. D. The scribe's name is Vṛka Mahādeva.

॥ छन्दः ॥

## 1934. CHANDAH.

J. L. Collection No. 179. Substance—Paper. Size—$7\frac{4}{5} \times 3\frac{1}{2}$ inches. Sheets —17. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—90. Author—Piṅgalanāga. Complete.

Beginning, end, colophon and Subject—Same as No. 1687.

Remarks :—The Ms. is in good condition.

## ॥ छन्दोमञ्जरी ॥

## 1935. CHANDOMAÑJARĪ.

J. L. Collection No. 180. Substance—Paper. Size—9×12½ inches. Sheets—8. Lines—4 to 20 to a Page. Script—Devanāgarī. No. of Granthas—80. Author—(?). Incomplete.

Beginning :

श्रीशिवाय नमः ॥

सर्वानुक्रमणीप्रोक्तं छन्दोलक्षणमुच्यते ।
गायत्री प्रथमं छन्दस्तत उष्णिगनुष्टुभौ ॥ १ ॥
बृहती पङ्क्तिरिति च त्रिष्टुप् च जगती तथा ।
इत्याद्यं सप्तकं प्रोक्तमथातिजगती स्मृता ॥ २ ॥
शक्करी सातिपूर्वा च(चा)ष्ट्यत्यष्टी ततो मते ।
धृतिश्चातिधृतिश्चेत्थमुक्तमुत्तरसप्तकम् ॥ ३ ॥
एवं चतुर्दशविधं स्मृतं छन्दो मनीषिभिः ।
चतुर्विंशत्यक्षरादि ज्ञेयं तच्चतुरुत्तरम् ॥ ४ ॥
अत्रैकोनं निचृज्ज्ञेयं द्व्यूनमुक्तं विराळिति ।
एकाधिकं भुरिगिति स्वराड् द्व्यधिकमीरितम् ॥ ५ ॥
पादसम्पूरणार्थाय तदुक्ताक्षरसङ्ख्यया ।
एकादेशयणादेशौ पृथक्कार्यौ मनीषिभिः ॥ ६ ॥
आद्ये तु सप्तके संज्ञाविशेषाः पादभेदतः ।
विराड्रूपा विराट्स्थाना बहूना एव ताः स्मृताः ॥ ७ ॥
द्वादशैकादशदशाक्षराणां जागतस्त्विति ।
त्रैष्टुभो वैराज इति संज्ञोक्ता पूर्वसूरिभिः ॥ ८ ॥

अनादेशेऽष्टकाः पादाः ऋचो ज्ञेयाश्चतुष्पदाः ।
आख्याता परिभाषेत्थं विशेषः कथ्यतेऽधुना ॥ १ ॥

इति प्रथमं कुसुमम् ॥

End :

॥ अतिधृतिः ॥

ख्याता सातिधृतिर्यस्या जागतः षोडशाक्षरः ।
त्रयोष्टिनो जागतश्च ततश्चाष्टक इत्यपि ॥
उक्ताः पादा भवेत्सा वा षट्सप्तत्यक्षरैर्युता ॥ १ ॥

Subject : Chandomañjarī giving the names and definitions of the most important Vedic Metres. 1—8 Kusumas.

Remarks —The Ms. is in good condition. A list of the contents of this work is also separately given at the end of this Ms.

॥ छन्दश्चित्तिः ॥

## 1936. CHANDAŚCITTIḤ.

J. L. Collection No. 181. Substance—Paper. Size—7 × 4 inches. Sheets—4. Lines—7 or 8 to a Page. Script—Devanāgarī. No. of Granthas—22. Author—(?). Complete.

Beginning :

श्रीगणेशाय नमः ॥

ॐ अथातश्छन्दश्चित्तिं व्याख्यास्यामस्तत्रच्छन्दोऽनुक्रमणं गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तिस्त्रिष्टुब्जगत्यतिजगतीशक्वर्यतिशक्वर्यष्ट्यत्यष्टिधृत्यतिधृति ऋतिप्रकृत्याकृतिविकृतिसङ्कृत्याभिकृत्युत्कृत्येकाविंशतिश्छन्दांसि ।

अथ पादलक्षणमुच्यते ॥

एकाक्षरे द्व्यक्षरे त्र्यक्षरे तथा चतुरक्षरे तथा पञ्चाक्षरे तथा

षडक्षरे + पादयोस्थाने यादिपूर्ण कुर्यादित्युक्तं पादा-
क्षराण्युक्तानि ॥ १ ॥

End:

अथ ऋगक्षराण्युच्यन्त एकद्वित्रिचतुष्पादित्युक्तः पादः । तत्रैकाक्षरप्रकृतिश्चतुर्विंशाक्षरपर्यन्तं सर्वत्र ऋड्मन्त्र-
गायत्रं छन्दोऽष्टाविंशाक्षरा उष्णिक्ककुप्द्वात्रिंशदक्षरानुष्टुप्
षट्त्रिंशदक्षरा बृहती चत्वारिंशदक्षरा पङ्क्तिर्विराजो वा चतु-
श्चत्वारिंशदक्षरा त्रिष्टुबष्टाचत्वारिंशदक्षरा + अतःपरं दन्तु-
का भवन्तीत्यृग्लक्षणमग्निः सविता सोमो बृहस्पतिर्वरुण
इन्द्रो विश्वेदेवाश्छन्दो देवतेति ॥ ३ ॥

Colophon:

इति छन्दः समाप्तः(म्) दवे वीरेश्वरसुत(त) माहेश्वरेण
लिखितमिदम् ॥ शुभं भवतु कल्याणमस्तु ॥

इत्यथर्ववेदच्छन्दश्चित्तिः समाप्ता ॥

Subject: Chandścitti giving the names and definitions of twenty-one metres in Vedic texts. 1—3 sections.

Remarks:—The Ms. is in a fairly good condition. On the last page is given— "अथर्वणवेदछन्दश्चित्तिपुस्तकं" ॥ इदं पुस्तकं रङ्गनाथियम्" ॥

This Ms. belonged to one Ranganātha. The scribe is Maheśvara, son of Dave Vīreśvara.

## ॥ निदानसूत्रवृत्तिः ॥

## 1937. NIDĀNASŪTRAVṚTTIḤ.

J. L. Collection No. 182. Substance—Paper. Size—8½ × 4 inches. Sheets—2. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—50. Author—?. A Fragment.

Beginning:

'उप धावे'दित्यादि ब्राह्मणे 'पवस्व वाजसातय' इति तिस्रोऽनुष्टुभश्चतस्रो गायत्रीः करोति आजि वा क्रौञ्चे उद्धरति स्वे आष्णिककुभौत...लु बृहतीषु कालेयमनुकल्पयामः ॥

End:

तथा चायमर्थः। अवयवत्रययुक्तश्छन्दसां भवतीति। एतदुक्तं भवति— छन्दो द्विविधं अवयवयुक्तं निरवयवञ्चेति। तत्रायं चतुर्विंशत्यक्षरा गायत्रीत्यादिना वक्ष्यमाणमृषिच्छन्दस्तस्य देवासुरप्रजापति......... ॥

Subject: Nidānasūtravṛtti containing the introduction only.

Remarks:—The Ms. is in a fairly good condition.

## ॥ ऋग्विधानम् ॥

## 1938. ṚGVIDHĀNAM.

J. L. Collection No. 183. Substance—Paper. Size—10½ × 3½ inches. Sheets—112. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—2175. Author—Śaunaka(?). Complete.

Beginning—Same as No. 1727.

End:

कार्यमाप्यायनं तत्र स्वाध्यायाध्ययनं पुनः।

स्वाध्यायाध्ययनं पुनरिति ॥ १६ ॥

अरण्ये [वा]तिरहस्यस्य प्रयतो वेदसंहिताम्।

मुच्यते पातै(तकैः)सर्वैं पाराशो चादितं तृभिः(?) ॥ १७ ॥

अकारादिहकारान्तान् आग्रा आग्र इहावसे ।

* * * *

वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः ।
तावन्ति हरिनामानि कीर्तितानि न संशयः ॥ ४०० ॥

Colophon:

इति शौनकीये ऋग्विधाने दशममण्डले अष्टमाष्टके अष्टमोऽध्यायः ॥ हरिः ॐ

यदक्षरपदभ्रष्टं + नमस्ते जगदम्बिके ।
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

खरसंवत्सरे शिशिरऋतौ फाल्गुनमासे कृष्णपक्षे अमायां भानुवासरे इदं पुस्तकं सम्पूर्णम् । धमात्कारिशिवेन लिखितं स्वार्थं परार्थञ्च ॥

Subject: Bṛhadṛgvidhāna. 1-8 Aṣṭakas.

Remarks:—The Ms. is old and is in good condition. The Anukramaṇikās of the fourth and fifth Aṣṭakas are also given in 18 sheets at the end of this Ms. The scribe's name is Śiva.

## ॥ ऋग्विधानम् ॥

## 1939. ṚGVIDHĀNAM.

Burnell's Catalogue No. 9479 b. Substance—Palm leaf. Size—12×1 inches. Leaves—27 (50-76). Lines—5 to 7 to a Page. Script—Grantha. No. of Granthas—430. Author—Śaunaka(?). Complete.

Beginning:

श्री गणाधिपतये नमः ॥

अग्निमीळे जपेत्सूक्तं पापघ्नं श्रीकरं जपन् ।
पारायणफलन्तस्य वेदानान्तस्य तत्समाः(?) ॥

अस्य वामस्य सूक्तन्तु जले वाऽन्यस्थले जपेत् ।
ब्रह्महत्यादिकं दग्ध्वा विष्णुलोकञ्च शाश्वतं ॥

सम्पूषन्नध्वनस्सूक्तं[न्तु] यात्राकाले जपेद्बुधः ।
अभयेन भविष्यन्ति(ति) कार्यसिद्धिर्भवेन्नर ॥

End:

उदुत्तिष्ठज्जपेन्मन्त्रं बदर्यान्त्र्ययुतं यदि ।
द्रष्यान्वितं ततः कार्यं सर्वथा न स्पृशेत्तदा ॥

विश्वानिदेवमन्त्रञ्च प्रत्यहं प्रजपेन्नर ।
सर्वारिष्टविनाशञ्च सर्वाभीष्टप्रदायि च ॥

वधेन दस्युमन्त्रञ्च दिनम्प्रति जपेन्नरः ।
शत्रुनाशो व्याधिनाशो मृत्युनाशश्च भूतिदः ॥

Colophon:

इति ऋग्विधानं समाप्तम् ॥

Subject: Ṛgvidhāna—giving the viniyoga (use) of the sūktas of the whole of Ṛg-Veda Saṃhitā.

Remarks:—The Ms. is in a fairly good condition. The other Ms. contained herein is Āśvalāyana pūrva prayoga. This work—Ṛg-Vidhāna—is not noticed by Dr. Burnell under this Ms.

## ॥ ऋग्वेदसर्वानुक्रमणीवृत्तिः ॥

## 1940. ṚGVEDASARVĀNUKRAMAṆĪVṚTTIḤ.

J. L. Collection No. 184. Substance—Paper. Size—12×6 inches. Sheets—76. Lines—15 to 17 to a Page. Script—Devanāgarī. No. of Granthas—3300. Author—Ṣaḍguruśiṣya. Complete.

Beginning:

श्री वेङ्कटेशाय नमः ॥ हरिः ओं ॥

सर्वं कर्म सफलं यत्र तुष्टे रुष्टेन किञ्चित्तमहं नमामि ।
विनायकं गिरिजानन्दपुत्रं महेश्वरप्रियसूनुं घृणाब्धिम् ॥

नमः षड्गुरवे तुभ्यं नमोऽस्मद्गुरवेऽपि च ।
विनायकस्त्रिशूलाङ्को गोविन्दः सूर्य एव च ॥ २ ॥

व्यासश्च शिवयोगी च षट् च तेभ्यो नमः सदा ।
नमो भगवते कात्यायनाय ॥

ललाटडिण्डिमध्वनिप्रकारभक्तवत्सलो
महेश्वरप्रि(यात्मजः) प्रपातु मां विनायकः ।
नमस्त्रिशूलपाणये गुहप्रियाय शङ्कते(त)
उमाकुचार्द्रकुङ्कुमप्रलुप्तभस्मशोभिने ॥

योऽजातशत्रोः प्रचकार दूत्यं
पार्थस्य सारथ्यमथानिनाय ।
आश्चर्यधन्यश्चतुरस्तनूजान्
पायात्स मां यादवराजसिंहः ॥

सर्वानुक्रमणीवृत्तिर्नाम्ना वेदार्थदीपिका ।
तदारम्भाय पूर्वेषामुपदेशागता कथा ॥

कथ्यते श्रुतवृत्तान्ताः सन्तः श्रद्दधते खलु ।
वेदाश्चत्वार उद्दिष्टाः षडङ्गानि तथैव च ॥

उपाङ्गानि च चत्वारि धर्मविद्याश्चतुर्दश ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदस्तथैव च ॥

अथर्ववेदश्चाङ्गानि पाणिपादादिवद्विदुः ।

छन्दः पादौ शब्दशास्त्रञ्च वक्त्रं
कल्पः पाणी ज्यो(ज्यौ)तिषञ्चक्षुषी च ।
शिक्षा घ्राणं श्रोत्रमुक्तं निरुक्तं
वेदस्याङ्गान्याहुरेतानि षट्तु ॥
मीमांसाद्या न्यायविद्या पुराणं
स्मृतिस्तथोपाङ्गचतुष्टयं मतम् ।
अङ्गोपाङ्गोपस्कृत(श्शुद्ध?)बुद्धिः
पश्येद्वेदमितरो नैव पश्येत् ॥
यश्छन्दादीन्विषयान् सेन्द्रियस्तु
भुङ्क्ते स्त्रियो न विजानाति यं द्वे ।
सतिः?... यदि वेद...यद्वा....
....ग्वदन्ति देवीं वाचं... ॥
अङ्गोपाङ्गश्रवणा(स)क्तबुद्धि-
र्वेदज्ञस्स्यात्तावतासौ कृती स्यात् ।
मुख्यं ग्राह्यं गुणलोपेऽपि लोके
दध्याद्यलाभेपि हि भुङ्क्त एच(व) ॥

गुणलोपे च मुख्यस्येत्यत्राग्निहोत्रहवण्याभावेऽपि हवींषि निरूप्यन्त इति न्यायविदः । क....चनश्रवणात्....कृष-न्यस्ती....नेत्यादिभिर्वेदविद्याज्ञेयश्च(?)। ऋचां त्वः पोषम् । उत त्वः । सर्वे नन्दन्ति अविद्वान्विहितो योगे शस्यमान.... मनौ श्रवणात् । श्रुतेः—दुष्कमथरूपां वाल आश्रितम् ॥ सखिविदं । ऋचां त्वः पोषमास्ते पुपुष्वान् । उतत्वः पश्यन्न ददर्श । सर्वे नन्दन्ति यशसा गतेनाज्ञातेन च कश्चविद्वान्वि-

भो(?)। उक्तं हि मन्त्रब्राह्मणयोर्वेदनामधेयमिति। अतः अस्तीत्युक्तं हि जैमिनिना क्लृप्तिवाचने। 'मन्त्रब्राह्मणयोराहुर्वेदशब्दं महर्षयः'। उक्तं हि 'मन्त्रब्राह्मणयोर्वेदनामधेय'मिति आपस्तम्बेन। मन्त्रब्राह्मणमित्याहुरिति च। बोधायनादिभिः 'विनियोक्तव्यरूपो यः स मन्त्र इति चक्षते। विधिस्तु करणं शेषं ब्राह्मणं कथयन्ति हि॥ उक्तं हि 'तच्चोदकेषु मन्त्राख्या शेषे ब्राह्मणशब्दः' इति।

विनियोक्तव्यरूपश्च त्रिविधः सम्प्रदृश्यते।
ऋग्यजुःसामरूपेण मन्त्रो वेदचतुष्टये॥
अहोबुध्नियमन्त्रं मे गोपायेत्य[त्य]भिधीयते।
ऋक्पादव(द्ध?)गीतिस्तु साम गद्यं यजुर्मतम्॥

उक्तं हि जैमिनिना—'तेषामृग्यत्रार्थवशेन पादव्यवस्था गीतिषु सामाख्या शेषे यजुःशब्द' इति। अर्थस्तु अर्थ्यत इत्यर्थ इति छन्दोविचितिशास्त्रमर्थः तद्वशेन यत्र पादव्यवस्था सा ऋगिति न त्वेकवाक्यार्थ एकः पाद इति। अग्निमीळे पुरोहितं यज्ञस्याग्निः पूर्वेभिर्ऋषिभिरीड्यः अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि वृद्धस्य चिद्वर्धतामस्यतनू स्तोमेभिरुक्थैश्च शस्यमाने एवमादिषु पादद्वयवत्स्वेवमादिषु पादद्वयवत्येकवाक्यार्थदर्शनात्(?)।

चतुर्ष्वपि हि वेदेषु त्रिविधो विनियु(धिरु?)ज्यते।
वेदैरशून्य इत्यादौ मन्त्रै(?) त्रैविध्यमुच्यते॥

सर्वैर्विभिरेति सूर्यः ब्रह्मेति सूतेऽपि चतुर्भिरिति नि-

र्णयं प्रस्तु...र्कादिति वाचित्वे भाव्यते सूत्रकारेण निर्दि-
ष्टैरिति ।

ऋग्रूपमन्त्रबाहुल्यादृग्वेदस्स्यात्तथेतरौ ।
एकविंशत्यध्वयुक्तमृग्वेदमृषयो विदुः ॥
सहस्राध्वा सामवेदो यजुरेकशताध्वगम् ।
नवाध्वाथर्वणोऽन्ये तु प्राहुः पञ्चदशाध्वकम् ॥
शान्तिपुष्ट्यादि हृद् ब्रह्मवर्गप्रवणविद्यया ।
सहर्चा यजुषाञ्चैव बाहुल्येन विधायकम् ॥
अध्वा प(पा?)दः श्रुतिः शाखा इति पर्यायवाचकाः ।
भारद्वाजसुताज्जज्ञे शुनहोत्रान्महामुनिः ॥
शौनहोत्रस्तस्य जज्ञे सर्वलोकस्य पश्यतः ।
इन्द्रो जगाम प्रीत्यर्थमृषेर्यज्ञपतिः स्वयम् ॥
इन्द्रमेकाकिनं मत्वा जिघृक्षन्तो महासुराः ।
परिवव्रुर्यज्ञवाटं तदिन्द्रोऽप्यन्वबुध्यत ।
इन्द्रोऽपि यजमानस्य वेषमास्थाय निर्गतः ।
यजमानं पुनर्दृष्ट्वा जगृहुस्तं महासुराः ।
इन्द्रबुद्ध्या शौनहोत्रं सजनीयं ददर्श सः ।
नाहमिन्द्रः स एवाज्ञा सजना इति वर्णयन् ॥
मुक्तस्तैरसुरैरिन्द्र आहूयेनमुवाच ह ।
गृणं मादयसे यस्मात्तस्माद्गृत्समदोऽस्यृषे ।
इन्द्रस्येयमित्येतन्नाम्ना सूक्तं भविष्यति ॥
त्वं तु मुक्त्वा भृगुकुले शुनकाच्छौनकोऽभवः ।

एतत्सूक्तयुतं पश्य द्वितीयं मण्डलं पुनः ॥
इतीन्द्रचोदितो जातः पुनर्गृत्समदो मुनिः ।
सजनीययुतं यो वै द्वितीयं मण्डलं महत् ॥
ददर्श यस्मै व्याचष्ट सत्रे द्वादशवार्षिके ।
वेदव्यासप्रसादेन रोमहर्षणनन्दनः ॥
उग्रश्रवा व्यासशिष्यः कर्ममध्ये महर्षयः ।
महाभारतमाख्यानं हरिवंशकथान्वितम् ॥
हरिप्रियं श्रुतिसुखं कर्ममध्ये महर्द्धिमत् ।
आसीद्गृहपतिर्यो वै नैमिशारण्यवासिनम् ॥
शतानीकाय राज्ञे यो जनमेजयसूनवे ।
उपानयद्विष्णुधर्मान्साक्षात्कारकरान्हरेः ॥
स शौनको मुनिगणैः स्तूयमानो महायशाः ।
द्वितीयं मण्डलं दृष्ट्वा श्रुतभारतसंहितः ॥
संसाराब्धिमहापोतो विष्णुधर्मप्रवर्तकः ।
एकविंशतिशाखः स बह्वृचः स महर्षिभिः ॥
कल्पितः कल्पकारोऽभूदृग्वेद इव चापरः ।
शाकल्यस्य संहितैका बाष्कलस्य तथाऽपरा ॥
द्वे संहिते समाश्रित्य ब्राह्मणान्येकविंशतिः ।
ऐतरेयकमाश्रित्य तदेवान्यैः प्रपूरयन् ॥
कल्पसूत्रं चकाराथ महर्षिगणपूजितः ।
शौनकास्तस्य शिष्योऽभूद्भगवानाश्वलायनः ॥
स तस्माच्छ्रुतसर्वज्ञः सूत्रं कृत्वा न्यवेदयत् ।

स्वबोधपरिशुद्ध्यर्थं शौनकस्य प्रियन्त्विति ॥
सहस्रखण्डं स्वकृतं सूत्रं ब्राह्मणसन्निभम् ।
शिष्याश्वलायनप्रीत्यै शौनकेन विपादितम् ॥
उक्तं तत्स्वकृतं सूत्रमस्य वेदस्य चास्त्विति ।
शौनकीयदशग्रन्थाः स्थिता ऋग्वेदगुप्तये ॥
आर्ष्यानुक्रमणिकयाद्या छान्दसी दैविकी तथा ॥
अनुवाकानुक्रमणी सूक्तानुक्रमणी तथा ।
ऋष्यादयोर्विधाने द्वे बार्हद्दैवतमेव च ॥
प्रातिशाख्यं शौनकीयं स्मार्तं दर्शनमुच्यते ।
स सूत्रदशकं ज्ञात्वा तपसा शतगोत्रजः ॥
शौनकस्य प्रसादेन सर्वज्ञः समपद्यत ।
कात्यायनमुनिर्मेने त्रयोदशकमत्र तु ॥
शौनकीयश्च दशकं तच्छिष्यस्य त्रिकं तथा ।
द्वादशाध्यायिकं सूत्रं चतुष्कं गृह्यमेव च ॥
चतुर्थारण्यकञ्चेति ह्याश्वलायनसूत्रितम् ।
सशिष्यः शौनकाचार्यस्त्रयोदशकविन्मुनिः ॥
वाजिनां सूत्रकृत्स्नानामुपग्रन्थस्य कारकः ।
स्मृतेश्च कर्ता श्लो(का)नां भ्राजनाम्नाञ्च कारकः ॥
आथर्वणा निर्ममे यः सम्यग्वै ब्रह्मकारिकाः ।
महावार्तिककारस्तु पाणिनीयमहार्णवे ॥
यत्प्रणीतानि वाक्यानि भगवांस्तु पतञ्जलिः ।
व्याख्यद्भाष्यदीपेन महाभाष्येन हर्षितः ॥

योगाचार्यः स्वयं कर्ता योगशास्त्रनिदानयोः ।
एवं गुणगणैर्युक्तः कात्यायनमहामुनिः ॥
तपोयोगान्निर्ममे यः सर्वानुक्रमणीमिमाम् ।
सशिष्यः शौनकाचार्यः सर्वग्रन्थार्थवर्णनात् ॥
प्राहुर्बहृचाशिष्यास्तु सर्वानुक्रमणीमिमाम् ।
ऋषेरनुक्रमादार्षां गृहीतानुक्रमण्यथ ॥
छन्दस्सच्छान्दसी वाथ विपाद्विधिः(?) ।
........................कप्रतिशाख्ययुक् ॥
सदेवता दैवती च सबृहद्देवतार्थयुक् ।
सूक्तानां सङ्ख्यानुवाकी मण्डलं प्रतिसङ्ख्यया ॥
ऋग्विधानं शौनकीय [स्मार्त]माश्वलायनकर्तृकम् ।
रोगघ्नोपनिषत्प्रायश्चित्ताद्यखिलवर्णनात् ॥
सूक्तादिपञ्चकोक्त्यैव सर्वज्ञेयार्थवर्णनात् ।
सर्वानुक्रमणीशब्दं निर्ब्रुवन्ति विपश्चितः ॥
तदेव ग्रन्थमाहात्म्यं सूचयन्तः सुविस्मिताः ।
वेदार्थं वेदशब्देन वेदविद्भाषते मुनिः ॥
नोड्डीयमानतनयो जानुभ्यां गन्तुमर्हति ।
तेन वेदानुसारेण व्यत्ययादिव सिध्यति ॥
सर्वानुक्रमणी सैषा कात्यायनमुनेः कृतिः ।
व्यक्तं व्याख्यायते भक्त्या जन्मसाफल्यसिद्धये ।
विनायकस्त्रिशूलाङ्को गोविन्दः सूर्य एव च ॥
व्यासश्च शिवयोगी च ये षट् ते क्रमयूयुजन् ।

ऋग्वेदार्थामृतास्वादे बहुस्वप्नानदर्शनात् ॥
प्रतायते वेदवृत्तिर्नाम्ना वेदार्थदीपिका ।
कात्यायनप्रसादेन वर्णनोदाहृतिक्षमा ॥
यथाश्रुतं यथाज्ञातं यथावाप्ति यथामति ।
सर्वानुक्रमणीविद्या प्रसीदत्विह भक्तितः ॥

हरिः ॐ ॥ अथ ऋग्वेदाम्नाये शाकलके सूक्तप्रतीकऋक्सङ्ख्याऋषिदैवतछन्दांस्यनुक्रमिष्यामो यथोपदेशम् ॥

अथेति मङ्गले प्रस्तावे वा । ऋगंशबाहुल्यादृग्वेदः ॥

End :

ऋषीणामार्षगोत्रज्ञ ऋषिभ्यस्तु सदा नमः ।
ऋषीणां विषयज्ञास्तु यः शरीरात्प्रमुच्यते ॥
सोऽतीत्य तमसः पारं स्वर्गलोके महीयते ।
सहस्रयुगपर्यन्तमहर्यद्ब्राह्ममुच्यते ॥
नाकस्य पृष्ठे तं कालं दिवि सूर्य इव रोचते ।
स्वाध्यायमुत योऽधीते मन्त्रदैवतविच्छुचिः ॥
स तत्र दि(नि)वसन् स्वर्गे सत्रसद्भिरपीज्यते ।

इत्यादि ।

सर्वानुक्रमणी सैका कात्यायनमुनेः कृतिः ।
समाप्तैषाऽध्यायवती षट्सप्ततिकखण्डिका ॥
तस्या वृत्तिरियञ्चापि समाप्ता षड्गुण(रो)ः कृतिः ।
वेदार्थदीपिका नाम षड्गुरूणां प्रसादतः ।
स्वर्गोन्त्यामे(न्मे)षमापेति कल्यहोगणने सति ॥

सर्वानुक्रमणीवृत्तिर्जाता वेदार्थदीपिका ।

लक्षाणि पञ्चदश वै पञ्चषष्टिसहस्रकम् ॥

द्वात्रिंशच्च शतञ्चेति दिनवाक्यार्थ ईरितः ।

विनायकः शूलपाणिर्मुकुन्दः

सूर्यो व्यासश्चिन्न(वयो)गीति षड्वे ।

कामानवीतानि (नमामि तान्सर्वदा पान्तु मान्ते)

यैर्वै षड्भिः सप्तविद्यास्तु दत्ताः ॥

आद्या सर्वानुक्रमणी द्वितीया

महाव्रतञ्चोपनिषद्द्वयञ्च ।

महाव्रतं सूत्रमासां तृतीया

[चकाचतुर्थ] (चत्वारिंशद्ब्राह्मणं वै चतुर्थी ॥)

सपञ्चम्यत्र षष्ठी तु गृह्यं

शाकल्यस्य संहिता(तेयं) समाप्तामिति(प्तेति) ।

इमा दत्तास्सप्तविद्यास्तु (सद्भिः)

यैर्व(र्वै) षड्भ्यो गुरुभ्यो नमोस्तु तेभ्यः ।

(यैर्वैतेभ्यष्षड्गुरुभ्यो नमोस्तु ॥)

Colophon :

इति षड्गुरुशिष्ये(ण) कृता वेदार्थदीपिका ।

सर्वानुक्रमणीवृत्तिः समाप्तेष्टार्थपुष्टये ।

बिन्दुदुर्लिपिविसर्गवीथिका + समीक्ष्य सज्जनाः ॥

गौडवर्तिकुलजन्मसूरिणः(णा) सर्वदेवविदुषस्तनूभुवा ।

पार्वतीतनुरुहा च रामभद्राह्वयेन लिखितं विकारिणि ।

॥ श्रीरामार्पणमस्तु ॥ हरिः ॐ ॥

सर्वं कर्म सफलं यत्र तुष्टे रुष्टेन किञ्चित्तमहं नमामि ।
विनायकं गिरिराजेन्द्रपुत्रं महेश्वरप्रियसूनुं घृणाब्धिम ॥

Subject : Kātyāyana Sarvānukramaṇī Vṛitti, otherwise known as Vedārtha Dīpikā. 1-8 Aṣṭakas.

Remarks :—The Ms. is in a fairly good condition. This is one of the rare Mss. in the J. L. Collection that has not been printed so far in India. The scribe is Rāmabhadra, son of Sarvadeva and Pārvatī, of Godavarti family. The date of the work is probably 1188 A. D.

---

## ॥ चरणव्यूहः ॥

## 1941. CARAṆAVYŪHAḤ.

Burnell's Catalogue No. 10989 (c). Substance--Palm leaf. Size— 17×1½ inches. Leaves—5 (98-102). Lines—5 to a Page. Script—Telugu. No. of Granthas—70. Author—Śaunaka (?). Complete.

Beginning, end and subject.—Same as No. 1754.

Remarks:—The Ms. is in a fairly good condition. The works contained herein are:—

1. जातक(मुहूर्त)निर्णयः ॥
2. प्रतिप्रयाणलक्षणम् ॥
3. चरणव्यूहः ॥
4. नारदीयसंहिता ॥
5. इन्द्रधनुःफलम ॥

This work is not noticed by Dr. Burnell under this Ms.

---

## ॥ यजुर्वेदप्रातिशाख्यविवरणम् ॥

## 1942. YAJURVEDA PRĀTIŚĀKHYA VIVARAṆAM.

Burnell's Catalogue No. 9077. Page 5. Right column. Substance—Palm leaf. Size—16½×1½ inches. Leaves—70. Lines —6 to 8 to a Page. Script—Grantha. No. of Granthas—1300. Author—Somayārya. Incomplete.

Beginning :

भक्तियुक्तः + भूसुरप्रियम् ॥

ॐ अथ वर्णसमाम्नायः ॥ 'मङ्गलानन्तरारम्भप्रश्न-कार्त्स्न्येष्वथे'ति मङ्गलाद्यनेकार्थत्वात्० Same as No. 1782.

End :

ऊष्मपरोऽघोषपरो लुप्यते काण्डमायनस्य ॥

ऊष्मपरो विसर्जनीयः काण्डमायनस्य मते लुप्यते तस्मि-न्नूष्मण्यघोषपरे सति ।

❀ ❀ ❀

ऊष्मा परो यस्मात्स ऊष्मपरः । न घोषवानघोषः । असौ परो यस्मात्स तथोक्तः, तस्मिन्नघोषपरे ॥ (१ ॥)

अघोषपरस्तस्य सस्थानमूष्मणाम् ॥ अघोष-परो विसर्जनीयस्तस्य(स्याघोषस्य स)स्थान(मूष्माणं भ-जते । यथा— 'यः कामयेत + यः पाप्मना गृ-हीतः' ॥ २ ॥).

Colophon : (Leaf No. 69).

इति त्रिभाष्यरत्नेऽष्टमोऽध्यायः ॥

Subject : Yajur Veda Prātiśākhya Vivaraṇa otherwise known as Tribhāṣyaratna. This Ms. contains commentary on the first eight Adhyāyas and on the first Sūtra of the 9th Adhyāya.

Remarks :—The Ms. is in a fairly good condition though many leaves are worm-eaten. It breaks off in the commentary on the Second Sūtra of the 9th Adhyāya. A Transcribed copy of the Ms. in paper is also available in the Library. See Transcript Volume 31, the date of copying being the Tuesday—the tenth day after the new moon—in Phālguna month in Paridhāvi year—Śaka 1834 or 17th March 1913. [Ref. T. V. 31. (No. 26.)].